आगमोद्धारक-ग्रन्थमालायाः त्रयोविंशं रत्नम् ।

णमोत्थु णं समणस्स भगवओ महावीरस्स ।

पू. याकिनीमहत्तरासूनु-आचार्यप्रवर-
श्रीहरिभद्रसूरिपुरन्दरप्रणीता

अधिकार-विंशिका ।

पू. आगमोद्धारक-आचार्य श्री आनन्दसागरसूरिवर-
निर्मितवृत्तिसमन्विता ।

—: संशोधक: :—

आगमोद्धारक-आचार्य श्री-आनन्दसागरसूरीश्वरपट्टधरः

आचार्य-श्रीमन्माणिक्यसागरसूरिः

त्रयः ५००)

(मूल्यम् १-०

वीर सं. २४९०—विक्रम सं. २०२०

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रकाशक :-
आगमोद्धारक-ग्रंथमालाना एक कार्यवाहक
शा. रमणलाल जयचंद
कपडवंज (जि. खेडा)

-: द्रव्य सहायक :-
श्री आदीश्वर जैन श्वेतांबर मंदिरनी पेढी
ज्ञानखातामांथी
अकोला

मुद्रक
श्री मुद्रणालय अकोला

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

किंचिद् वक्तव्य ।

हे सज्जनो ! वृत्तिसहित आ अधिकारविंशिका नामनो ग्रंथरत्न आपना करकमलमाँ अर्पण करवामां आवेछे ।

आ ग्रंथरत्नना मूलप्रणेता १४४४ ग्रंथना कर्ता याकिनीमहत्तरासूनु सूरिपुरंदर पूज्य आचार्य श्री हरिभद्रसूरीश्वरजी महाराज छे । पूज्यश्री संसारी अवस्थामां ब्राह्मण वैदिकधर्मी हता व्याकरण तेमज छदर्शनना प्रौढ पंडित हता । पूज्यश्री याकिनीमहत्तरा साध्वीजी महाराजना वचनथी प्रतिबोध पाम्या हता, अने पूज्य आचार्य श्रीजिनभटसूरीश्वरजी महाराज पासे जैन दीक्षा अंगीकार करी हती । पूज्यश्रीने हंसपरमहंस आदि समर्थ विद्वान् शिष्यो हता । पूज्यश्री आगमशास्त्रोनुं सारुं अध्ययन करीने महान आगमधर थया हता, गुरुमहाराजे आगमनिधान एवा तेमने आचार्यपदवीथी अलंकृत कर्या हता । पूज्यश्रीए १४४४ ग्रंथरत्नोनी रचना करीने संघउपर एवो महान् उपकार कर्यो छे जे हंमेशां अविस्मरणीय छे. ।

पूज्यश्री वि० सं० छट्ठा सैकामां विद्यमान हता । संवत ५८५ मां स्वर्गवास पाम्या । छे विशेषहकीकत बीजा अनेकस्थले प्रसिद्ध छे त्यांथी जिज्ञासुए जाणवुं.

वृत्तिकार पूज्य आगमोद्धारक आचार्यश्रीआनंदसागरसूरीश्वरजी महाराज छे. एमनो जन्म सं० १९३१ मां गुजरात खेडा जिल्लामां कपडवंजशहेरमां नियमावणिग्जातीयकुटुंबमां थयो हतो ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एमनुं जन्मनाम हेमचंद हतुं. एमना पितानुं नाम मगनलाल, मातानुं नाम जमनाबाई अने वडीलबंधुनुं नाम मणीलाल हतुं। एमना पिता मगनलालभाई संसारथी विरक्त हता एमणे बन्ने पुत्रोने दीक्षा अपावी पोते दीक्षा लीधी हती।

हेमचंदभाईए सं. १९४७ मां सौराष्ट्रमां लींबडीशहेरमां आगमशास्त्रना अजोडज्ञाता, वादकलाकुशल गणिवरश्रीजह्वेरसागरजी गुरुमहाराज पासे दीक्षा अंगीकार करी हती, एमनुं नाम 'आनंदसागर' राखवामां आव्युं हतुं। एमनी बुद्धि अत्यंत तीव्र हती एमणे व्याकरण न्याय आदि तेमज आगमोनो अभ्यास कर्यो हतो तेमां तेओ निष्णात थया हता।

पूज्यश्रीए आ सिवाय बीजा सिद्धप्रभाव्याकरण, न्यायावतारनी टीका विगेरे घणा ग्रंथो रचेला छे, पूज्यश्रीए अनेकहस्तलिखितप्रतोनुं स्वयं संशोधनकरीने निर्युक्ति भाष्य टीका विगेरेथी सहित तमाम आगमो तेमज सेंकडो शास्त्रोने प्रकाशित कराव्यां छे. पूज्यश्रीए [1] पाटण आदि अनेकस्थले सात आगमवाचनाओ आपीने श्रमणसंघउपर महान् उपकार कर्यो छे।

पूज्यश्रीने सं. १९७४ मां सूर्यपूरे (सुरतनगरे) पूज्य आचार्य श्री विजयकमलसूरीश्वरजी महाराजे आचार्यपदवीथी अलंकृत कर्या हता. ते शुभ अवसरे सुरतना संघे भव्य महोत्सव कर्यो हतो।

पूज्यश्रीए आगमोने संगेमरमर तथा ताम्रपत्रोमां कोतरावीने अनुक्रमे सिद्धक्षेत्रमां श्री वर्धमान जैन आगममंदीर अने सूर्यपुरे(सुरतनगरे)श्री वर्धमान ताम्रपत्रागममंदिरमां पधरावीने

---

[1] सं. १९७१ मां पाटण, सं. १९७२ मां कपडवंज अने अमदाबाद, सं. १९७३ मां बे सुरत, सं. १९७६ मां पालीताणा, अने सं. १९७७ मां रतलाम।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चिरस्थायी बनाववा वडे श्री चतुर्विधसंघउपर महान्उपकार कर्यो छे ।

पूज्यश्रीए सं. १९७६ मां मालवदेशमां सैलाना नगरमां चतुर्मास कर्युं हतुं, त्यां एमना उपदेशथी हरिश्चंद्र नामे भद्रिक परिणामी राजा प्रतिबोध पाम्यो अने पोताना समग्रराज्यमां पर्युषणाआदिना दिवसोमां बकराविगेरेनो वध न करवानो पट्टक लखी आप्यो छे ।

पूज्यश्रीए जिनबिंबनी अंजनशलाकाओ, प्रतिष्ठाओ, आचार्यादि पदवीओनुंप्रदान, श्री शत्रुंजयआदितीर्थोना छरीपालता संघो, दीक्षाओ विगेरे अनेक धर्मकार्यो करी करावी जैनशासननो उद्योत कर्यो छे ।

पूज्यश्रीए अंतिम चतुर्मास सं. २००६ मां सुरतशहेरमां मंछुदीपचंदनी धर्मशालामां कर्युं हतुं, त्यां एमनुं शरीर वधु अस्वस्थ वन्युं पछी वैशाख वदी ५ ना दिवसे नमते पहोरे ध्यानस्थस्थितिमां एमना पट्टधर आचार्य श्री माणिक्यसागरसूरीश्वरजी म० विगेरे साधुओना मुखथी नमस्कार महामंत्र सांभलतां समाधिपूर्वक पूज्यश्री स्वर्गवास पाम्या ।

आनो विषय विषयानुक्रमथी जाणवो ।

आनुं संशोधन वहु सावधानीथी करवामां आवेल छे, छतां कोइ भूल जणाय तो ते सुधारी वांचवुं ए अभ्यर्थना ।

लि०

लाभसागर

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

। प्रकाशकीय निवेदन ।

प. पू. गच्छाधिपति आचार्य श्री माणिक्यसागरसूरीश्वरजी महाराज आदि ठाणा वि. सं. २०१० ना वर्षे कपडवंज शहेरमां मीठाभाई गुलालचंदना उपाश्रये चतुर्मास बीराज्या हता । आ अवसरे तेओश्रीना पवित्र आशीर्वादे आगमोद्धारक-ग्रंथमालानी स्थापना थएली हती आ ग्रंथमालाए त्यारबाद प्रकाशनोनी ठीक ठीक प्रगति करी छे ।

तेओश्रीनी पुण्यकृपाए आगमोद्धारक-आचार्यश्री-आनंदसागर-सूरीश्वरजी निर्मित वृत्तिसहित आ 'अधिकार विंशिका' नामना ग्रंथने आगमोद्धारक ग्रंथमालाना २३ मा रत्नतरीके प्रगट करतां अमने बहु हर्ष थाय छे ।

आनी प्रेसकोपी स्वर्गस्थ गणिवर्य श्री चंदनसागरजी म० साहेबे करेली अने आनुं प्रुफ संशोधनविगेरे प. पू. गच्छाधिपति आ० श्रीमाणिक्यसागरसूरीश्वरजी म० नी पवित्र गे दृष्टि नीचे शतावधानी मुनिराजश्री लाभसागरजीए करेल छे ते बदल तेओश्रीनी तेमज जेओए आना प्रकाशनमां द्रव्यसहायकरी छे ते बधानो आभार मानीए छीए ।

लि०
प्रकाशक

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

-: विषयानुक्रम :-

पृष्ठ	विषय	पृष्ठ	विषय
२	मंगल ।	४४	सम्यक्त्वनुं महत्त्वादि ।
४	सर्वज्ञनुं स्वरूप ।	४९	दाननुं स्वरूप तेनी विधि अने उत्तमता ।
६	सिद्धनुं स्वरूप ।	५१	पूजानी विधि तेना प्रकार ।
७	इंद्रादिए करेलुं वीरनाम ।	५२	अनुष्ठानमां विधिनी प्रधानता ।
१६	धर्ममाँ पुरुषनी प्रधानता ।	५३	द्रव्यपूजानी पण आवश्यकता ।
१८	पासत्था अने वकुशमुनिनो फरक ।	५४	हिंसानुं खरुं लक्षण ।
,,	उपदेशने योग्य ।	५५	श्रावकधर्म ।
२०	गुरुकुलवास ।	,,	श्रावकने धर्मश्रवणनो अधिकार छे, परंतु उपदेशनो नहिं ।
२९	उत्तमपुरुषना शुभ अनुष्ठानथी दुर्जननी पीडानो नाश ।	५७	धर्मकथननी विधि ।
३२	शुभाशयवाली क्रिया निर्दोष होय छे ।	५९	यतिधर्म ।
३६	उपदेशके बालादिनो विचारकरी उपदेश आपवो ।	,,	यतिशब्दनो अर्थ ।
३८	लोकनुं स्वरूप ।	,,	पासत्यादि साधुविषयकवंदनसंबंधी कुतर्कनुं खंडन ।
९	श्रद्धा अने दृष्टिरागनो भेद ।	६०	उत्तरगुणना रक्षणनी आवश्यकता
,,	'तमेव सच्चं' सूत्रनो परमार्थ ।	६१	श्रावकने साधुधर्म न संभलावो एम केटलाकनुं कथन छे तेनुं निरसन ।
,,	लोकधर्म लोकसंज्ञापरिहारनुं रहस्य ।	,,	ग्रहणशिक्षा अने आसेवनशिक्षानुं स्वरूप
,,	चरमपुद्गलपरावर्त्त ।	६२	ग्रहणशिक्षानी महत्ता ।
,,	पुद्गलपरावर्त्तनुं स्वरूप ।	६३	आसेवनशिक्षानीमहत्ता ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पृष्ठ	विषय	पृष्ठ	विषय
६५	श्रुतनो अधिकारी ।	१०५	ऐदंपर्यार्थः ।
,,	भिक्षानी विधि ।	१०६	तत्त्वज्ञानमाटे आगम अने युक्ति वे जोइए ।
६७	शुद्धिभिक्षानो संभव ।	१०७	कर्मनी प्रबलता ।
६९	भिक्षाना अंतरायो ।	१०९	सूत्रथी अर्थनी अधिकता ।
७२	आलोयणनुं विधान ।	,,	सूत्रदेवामां योग्यायोग्य विचारवुं ।
७५	प्रायश्चित्तथी शुद्धि ।	११०	मध्यस्थतानुं परिणाम ।
७९	हालमां चारित्र नथी ए मान्यतनुं खंडन ।	१२१	विनय वैयावच्च अने एनुं महत्व ।
८०	योगनुं विधान ।	१२२	साधुसेवा अने सेवानो हेतु ।
,,	योगनुं लक्षण ।	१२३	साधुनुं स्वरूप, पासत्थादि अवंदनीय
८२	केवलज्ञान ।	१२६	अनुकंपादानमां केटलाक पाय माने छे तेनुं खंडन ।
८७	सिद्धनुं स्वरूप ।	१२८	शक्तिअनुसार क्रिया । वीर्याचारनुं स्वरूप ।
९१	आनंदगिरि आदिनुं जैनमतनी अज्ञानतानुं प्रकाशन ।	१३०	भव्यनुं स्वरूप ।
९२	सिद्धमां सुख ।		भव्यत्व ए आगमिकभाव छे ।
९३	मुक्तिमां ज्ञान-सुख न मानानारनुं खंडन ।	१३१	पुद्गल परावर्त्तनुं स्वरूप ।
९६	वैराग्यनो अर्थ ।		
९७	सिद्धभगवंतने परम सुख छे ।		

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

शुद्धिपत्रकम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्	पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१५	१७	वर्ज	वर्ज	५७	३	क्विं	विंध
,,	२६	श्रतं	श्रुतं	५८	११	बहुल्वा	बहुत्वा
१९	१७	०रेन्	०रन्	६०	३	चिह्न	चिह्न
२०	१	वासितेव	वासितंव	६७	१८	वधस्य	विधस्य
२१	२५	समय	ससमय	७०	४	त्रमां	तमां
,,	२६	समय	स्वसमय	७२	१	पर्या०	पर्य०
२३	२	युग्	युक्	,,	८	चतुर्व०	पञ्चद०
२७	१८	माहान्तं	महान्तं	७६	१२	क्राते	क्रान्ते
३३	४	विधान	विधान	८०	११	घ्य	घ्या
,,	२३	दृटिष्वाद	दृष्टिवाद	९२	१०	भवतिः	भवति
३८	२०	०नित्यत्वेन	०नित्यत्वे न	१००	५	चिति	चिंति
४४	१२	सम्यक्त्वलाभः	सम्यक्त्वस्य	१०२	२२	दोह	दोहा
,,	२४	सम्यक	सम्यक्	१०९	१६	क्रान्ति	क्रान्ति
४९	१३	स्वसत्वा०	स्वस्वत्वा०	११०	४	व	य
५३	१९	०पचारो	०पकारो	११२	१९	पूव	पूर्व
५४	१३	यदाहुभाः	यदाहुः	११९	१५	त्रि	त्रिं
५५	६	यथावधि	यथाविधि	१२०	१३	णए	णयाए
५६	९	षड्	षड्	१२८	१	अव्यबो	अव्ययो
,,	१०	व्याचक्षे	व्याचचक्षे	१२९	२२	शाशने	शासने

सूचना :– आमां अनेकस्थले तृप्रत्ययांतनामना छट्ठीना बहुवचनमां 'तृ' ह्रस्व छे ते दीर्घ सुधारी वांचवुं ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

। स्थापनासिद्धिः ।

गणेश ! चित्रं दिवि निर्वृतौ गतो-ऽभिधानचित्रादितयोपकारी ।
आलम्बनं त्वं पततां जनाना-मावश्यकादेः करणे च साधोः ॥१॥
इतोऽनुयोगे गणधारिणोदिता-ऽऽचार्याऽऽकृतिः स्थाप्यतया मुनीनाम् ।
न मन्यतेऽसौ भवकूपपाती, पिशाचकी नाथ ! च वातकी वा ॥२॥
क्रियां त्वसौ कस्य पुरो विदध्या-दन्त्याऽर्हतो मार्गमुदञ्चमानः ।
सीमन्धरादेः पुरतो विधाने, कल्प्या तदीयाऽऽकृतिरेव कृत्स्ना ॥३॥
स्थाप्योदिता सा द्विविधा न चाऽसौ, तयोर्न देवे गुरुकार्यताऽपि च ।
सम्बोधनं कस्य भदन्तनाम्ना, करोत्वसौ व्याकरणाऽङ्गहीनः ॥४॥
क्षमान्वितः कः श्रमणश्च तस्य, यो द्वादशावर्त्तविधानयोग्यः ।
सङ्कल्पने वा पुरतो जिनादे-रवग्रहः स्याद्यदमुं प्रयाचेत् ॥५॥
अधश्च कायो ननु तस्य को वा, कः स्पृष्टवान् कं क्षामयति स्वकाऽऽगः ।
सामायिकाद्याङ्गविहीन एष, गृही न नो संयत इद्धवेषः ॥६॥
आलोचनां कस्य ददाति सूरे-र्न तस्य कार्या भवतां यदाकृतिः ।
अदत्तलाता स कथं भवाब्धि-पारङ्गमी साध्यपदप्रहीणः ॥७॥
वन्ध्या क्रिया किं फलमातनोतु, वन्ध्येव गौर्यत् समुदारभासम् ।
न गर्हणाऽस्याऽस्ति गुरोर्विना तत्, त्वत्स्थापना सर्वफलोपकर्त्री ॥८॥
कल्लोलमच्छुद्धरवं जनाना-मानन्दनं नन्दनवन्मुनीनाम् ।
तत्त्वार्थदाय्यष्टकमेतदर्हं, कल्लोलगोऽनेन जनोऽस्तु बद्धः ॥९॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

श्री जिनेन्द्रो–विजयतेतराम् ।

आचार्य–श्रीहरिभद्रसूरिपुरन्दरप्रणीता

अधिकार–विंशिका

आगमोद्धारक–आचार्यश्रीआनन्दसागरसूरीश्वर-

निर्मितवृत्तिसमन्विता ।

भवाब्जबोधी सकलार्थविद्यः, प्रज्ञापनीयार्थविवेचिका गौः ।
यस्येह तं नम्रसुरेन्द्रभूपं, नमामि वीरं जितमारवीरम् ॥१॥
हरिभद्रसूरेर्वाणी दुर्बोधा विदुषामपि ।
क्व क्वेमां तर्करहितो, मादृशो बोधयत्वलम् ॥२॥
नाम्नायो नैव विवृति–रस्याः केनापि सूरिणा ।
विंशिकायाः कृता येन, गतावालम्ब्यते मया ॥३॥
तद्भक्तिप्रवणस्वान्त–स्तथापि तद्विवेचने ।
यते, न किं यथाशक्ति, शुभे यत्नः फलेग्रहिः ? ॥४॥
भद्रङ्करो मतिं मे स सदा भक्तिवशंवदः ।
दास्यत्येवाम्बुधिं किं न, वर्धयत्यभ्रगो विधुः ? ॥५॥

इह हि चतुर्गतिकाऽपारसंसारपाराबारप्रभ्रमणपरिश्रान्तेन शारीरिकमानसिकानेकानल्पव्यथाव्यथितेन तद्दुःखव्रातपरिजिहीर्षुणा ज्ञातस्वर्गापवर्गसुखोपायेन प्राणिना प्रयतितव्यं भवरोगागदङ्कारदर्शिते विवेके । न चासावृते यथार्थोपदेशं । दुर्लभश्चासौ करालकलिकाललब्धप्रादुर्भावानेकविधमिथ्यात्वाध्वदुर्गमधर्मपथेऽधुनातने भस्मग्रहोद्दीपितप्रभावनष्टग्रन्थसार्थप्रभाकरप्रभापटले पञ्चमारके । तथापि पचेलिमपुण्यफलभरभ्राजिष्णुकतिचिल्लघुकर्माङ्गिपुण्यप्रचयलब्धावतारः पूर्वगतापूर्वग्रन्थतद्रहस्याम्भोधिपारगमनसांयात्रिको हरिभद्रसूरिस्तादृग्जनप्रबोधनपटुश्चकारानेक-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सत्तर्कपचेलिमधर्मपान्थिकाधारभूतवृक्षततिप्रभानेकग्रन्थततिम्। तत्र च समासतः सकलकर्त्तव्यमार्गोपदेशकतया प्रतिदिनप्रभातकाल-स्मरणीयाया आरभ्यते विंशिकायाः स्वस्मृतिबीजविवृद्धये किञ्चिद्विवेचनम्। तत्र सुखावबोधाय विहितापरिमितोपकार-प्रवणान्तःकरणः अधिकारसूचिकां प्रथमां विंशिकां चिकीर्षुः तस्याश्चेदमादिगाथायुग्मं प्रेक्षावत्प्रवृत्तये मंगलाभिधेयप्रयोज-नादिसूचकमाह–

नमिऊण वीयरायं, सव्वन्नुं तियसनाहकयपूयं ।
जहनायवत्थुवाइं, सिद्धं सिद्धालयं वीरं ॥१॥

वुच्छं केइ पयत्थे, लोगिगलोगुत्तरे समासेण ।
लोगागमाणुसारा, मंदमइविबोहगट्ठाए ॥२॥ युग्मम् ॥

इह हि शिष्टे वस्तुनि शिष्टाः कृतमंगलोपचारा एव प्रवर्त्तन्ते।'रत्नान्यपायबहुलानी' तिन्यायात् शिष्टानां विघ्नबाहुल्य-विघ्नितत्वात् शिष्टानामपि विधीनाम्। न च श्रोतारोऽपि परमार्थ-भूतनिःश्रेयसादिसाधने धर्मश्रवणेऽपि विघ्नाशङ्काप्रतिहतावधानाः श्रवणोद्यताः स्युरिति निबबन्ध मंगलं निबन्धकारः। न चर्तेपि मंगलं शिष्टप्राप्तिश्रोतृश्रवणदर्शनादपार्थकमिदम्। क्वचिद् विघ्नाल्पीयस्त्वेन शिष्टप्राप्तिदर्शनेऽपि निःशङ्कं श्रोतृश्रवणा-दर्शनात्। न च सर्वत्र विघ्नाल्पीयस्त्वं सिद्धं, येन दृष्टाल्पानला-नुदकविध्यापनोपेक्षितमहानलभस्मसात्कृतसर्वस्वमातृशासित इव न शास्त्रश्रवणज्ञानसिद्धिहीना भवेयुः प्रेक्षावन्त आकर्णयितारः। तत्कार्यमेवादौ विशिष्टाध्यवसायोद्भवनिर्जराकारणतया शास्त्र-सम्पूर्णताद्याधायि शिष्यप्रवर्त्तनाय शिष्टताज्ञापनायच निबन्धनी-यमपि बुद्धिधनेन चेदम्। एवमभिधेयाद्यभिधानस्यापि सफलतोह्या सुधिया स्वधिया। प्रकृतमनुश्रियते। नत्वा वीरं काँश्चित्पदार्थान्

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मन्दमतिविबोधनाय वक्ष्ये इति गाथायुग्मसण्टङ्कः। तत्र नत्वा-पिण्ड-स्थादिभेदेन ध्यानविषयीकृत्य । एवं च तदवधिकोत्कर्षज्ञानं कृतं भवति । यद्वा व्यक्तिभेदाभिधेयाभेदरूपप्रणिधानविषयीकृत्य । एवं च यथार्थगुणध्यानादिद्वाराराधितोऽभीष्टफलदः स्यात् । नहि वीतरागो ददाति स्वयं फलम् । तथात्वे अल्पेभ्य एव तद्दाने बहुभ्यो-ऽदाने च सुतरामवीतरागत्वप्रसङ्गः। किन्त्वाराधकभाव एव चिन्ता-मण्यादेरिव तदचिन्त्यमहिम्नो ददाति फलम् । अनेन प्रातिस्विकन-त्यादिरूपं मंगलमाह । यद्यपि गुणवत्पुरुषवाचकशब्दोच्चारण-श्रवणस्यापि शुभाध्यवसायवत् कर्मक्षयहेतुत्वम् । व्यक्तं चेदं "तहारूवस्से" त्यादिसूत्रे तथापि प्रक्रान्तप्रकरणोपयोगिनिर्जरा-कारणं नत्यादीति तदेवोक्तम् । नतिश्चोद्दिष्टपुरुषगुणा-धीनप्रकर्षेव सफला । न ह्यसुवर्णं सुवर्णतया ध्यातं सत् सुवर्ण-फलकं सम्पद्यत इति नमस्कार्यं निर्दिदिक्षुराह—'वीयरायं' ति । रज्यतेऽनेन स्वरूपस्थोऽपि प्राणी विभावेष्विति रागः । करणे घञ् । अनन्तानुबन्ध्यादिभेदभिन्नौ मायालोभकषायाख्यौ कषायमो-हनीयभेदौ'मायालोभकषायौ चेत्येतद्रागसञ्ज्ञितं द्वन्द्व' (प्रशमरतिः)-मितिवचनात् । यद्वा रञ्जनं रागः । भावे घञ् । परित्यज्यात्म-रमणतां विभावमयात्मपरिणतिः मायालोभकषायोदयसम्पाद्या नोकर्मभावरागप्रतिपाद्या । स विशेषेण—द्रव्यक्षेत्रकालभावभे-दैर्बन्धोदयोदीरणासत्तारूपैर्जीवाजीवादिविषयतया वा इतो-गतोऽ-पुनर्भावेन क्षपकश्रेण्या निःसत्ताकक्षयकरणात् तदुद्भवबीजक्षय-करणतो वा यस्मात् स वीतरागस्तं । द्वेषोपलक्षणं चैतद्रागक्षयस्य द्वेषक्षयानान्तरीयकत्वात् । यद्वा-द्वेषोद्भवो रागमूलः । सति कस्मिँ-श्चिद्रागे तदपकारिणि रुष्यतीति । दृष्टादृष्टविषयतया रागस्य बहुविषयतेति तद्ग्रहणम् । अनेनापायापगमातिशयो ध्वन्यतेऽभीष्ट-देवतायाः । वीतरागश्च क्षीणमोहोऽपि स्यादित्याह—'सव्वन्नुं'

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सर्वान् मूर्त्तामूर्त्तप्रज्ञापनीयाप्रज्ञापनीयान् कथञ्चिन्नित्याऽनित्य-सामान्यविशेष-भावाभावात्मकान् उपसर्जनीकृतसामान्यप्रधानीकृत-विशेषलक्षणेनोपयोगविशेषेण जानातीति सर्वज्ञः । नह्यसर्वज्ञ एकमपि सर्वपर्यायैरर्थं वेत्तुमलम् । एकेनाप्यर्थेन स्वपरपर्यायैः सकलवस्तुसम्बद्धतोपगमात् । न चासर्वज्ञोऽमूर्त्तानात्ममोक्षादीन् वेत्तुमलम् । न चासम्भूतं सर्ववेत्तृत्वं, तारतम्येन तद्विश्रान्तिसिद्धेः । तत्प्रतिबन्धकरागादिक्षयस्तु प्रतिप्राणि क्वाचित्क कादाचित्कोपलब्धेः सार्वदिकसार्वत्रिकतद्भावानुमानात् पूर्वहेतोरेव वा । प्रतिबन्धकता च रागादेर्न साक्षाज्ज्ञानस्य, किन्तु पारम्पर्येण । प्रतिपादितं च 'केवलियनाणलंभो नन्नत्थ खए कसायाण' मितिवचनादार्षे ज्ञानप्रतिबन्धकता च कषायाणां, अनुभूयते तीव्ररागाद्यवस्थायां ज्ञानाद्युपप्लवः। अत एव च प्रथमं 'वीतराग' मिति। अनेन ज्ञानातिशयः। अस्ति चातीर्थङ्कराणामपि कैवल्यलाभः, प्रतिपक्षबन्धहेत्वभावनिर्जरासाध्यत्वात्तस्य । न च ते शासनप्रवर्त्तकतया परमगुरुवद् भव्यप्रबोधहेतुकेन्द्रादिकृतप्रातिहार्यरूपां प्रतिपत्तिमर्हन्तीत्याह— 'तियसनाहकयपूयं' तृतीया दशा जन्मनो येषां ते त्रिदशाः । भवन्ति हि देवाः पर्याप्तमात्रा यौवनदशावन्तः । असुरादीनां कुमारता तु कुमारवल्लालनादेर्न तु शरीरलाघवद्युत्याद्यपेक्षया। तेषां नाथाः-अप्राप्तप्राप्तिरूपयोगप्राप्तरक्षणरूपक्षेमविधानपटवः। केषाञ्चित्केचिदन्ये भवन्तोऽप्यधीशा न स्वकल्पवर्त्तिनां सर्वेषामन्तरेणेन्द्रान् प्रभवो भवन्ति । न च सम्भवति सर्वकल्पाधिपत्यं कस्यचिदेकस्य । नानिन्द्राणामत्राधिकारः। यद्वा स्वापेक्षया नाथता तेषामन्ययोगक्षेमानुपजीवनात् । ते च तत्रस्था एव पूजयन्ति पूजाधामभगवन्तमर्हन्तम् । इन्द्राश्च विंशतिर्भवनेशाः, भेददशकेऽपि श्रेणिद्वयभावात्। तथैव षोडश व्यन्तराणां वानमन्तराणां च, चलेतरभेदद्विविधज्योतिष्काधिपौ द्वौ,नवमदशमयोरेकादशद्वादशयोश्चै-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कैकेन्द्राधिष्ठितत्वेन दश कल्पोपपन्नवैमानिकानां, कल्पातीतास्त्वहमिन्द्राः सर्वे, न च तेषामागमनादीनि, इति चतुःषष्टिरिन्द्राणां, तैः कृता–विहिता, अचिन्त्यभाग्यभरलभ्यभगवद्भक्तिज्ञानजातभक्तिप्राग्भारपूर्णहृदयेन स्वयमेव । कारितानुमतिसद्भावेपि प्राधान्यात् कृतग्रहणम् । ज्ञाप्यते च देवगुरुधर्मकार्याणां यावच्छक्ति स्वयंविधान एव वीर्याचारप्रतिपालनम् । पूजाऽशोकाद्यष्टमहाप्रातिहार्यरूपा यस्य स त्रिदशनाथकृतपूजस्तम्। 'एकार्थं चानेकं चे' (सि० ३-१-२२)-त्यत्रानेकग्रहणाद् बहुपदोऽपि बहुव्रीहिः । जन्माभिषेकादिकाले कृतायामपि पूजायां शासनप्रवर्त्तनकालविहिताया एव प्राधान्यात्तद्ग्रहणम् । अनेनोचिवान् पूजातिशयं भगवतो भगवान् । न हि कदापि लब्धे केवले जिना इन्द्रादिसपर्याशून्याः सम्बोभवन्ति । सति च समवसरणेऽवश्यंभाविनी तीर्थकृतां देशनाप्रवृत्तिस्तीर्थस्थापनाऽनेहसि वाऽवश्यंभाविनी समवसरणादिकृतिः। प्रोक्तातिशयत्रिकयुक्तश्च ददाति देशनां, करोति वा स्थापनां तीर्थस्येत्याह-(अथवा) सन्ति चोक्तातिशयत्रिकयुता मूककेवलिनोऽपीत्याह-'जहणाय-वत्थुवाइं' ति । यथाज्ञातं-करामलकवल्लोकाऽलोकावभासकेन मत्यादिज्ञाननिरपेक्षेणानन्तेन सम्पूर्णेन केवलज्ञानेन ज्ञातमुपलब्धं, यथा-तदनतिवृत्त्येति यथाज्ञातम् । अनेनास्याऽऽप्ततां दर्शयति, अभिधेयज्ञानवद्यथाज्ञाताभिधायकतायास्तन्मूलत्वात् । वसन्त्यस्मिन् गुणपर्याया इति वस्तु-द्रव्यं । एतदभिधानेन गुणपर्याययोरपि तदवस्थाभूततयाऽभिन्नत्वेनाभिधानम् । वसन्ति वाच्यत्वज्ञेयत्वादयोऽस्मिन्निति वस्तु-द्रव्यं गुणाः पर्याया वा । वस्तुशब्देन ध्वन्यते परमार्थसद्देशकत्वं, न तु बौद्धवेदान्त्यादिवत् कल्पितार्थदेशकत्वम् । वस्तु-द्रव्याद्यात्मकं वदतीत्येवंशीलस्तम् । शीलार्थप्रत्ययेन व्यङ्ग्यतेऽस्योपकारानपेक्षं सूर्यवत् स्वाभाविकं देशनाकरणम् । व्यक्तवागर्थकधातुप्रयोगेना ऽस्पष्टध्वनिदेशकता-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ङ्गीकर्त्तुः अदेशकतामानिनः अपौरुषेयागमस्वीकर्त्तुश्च कुनयस्य व्यवच्छेदः । नहि सर्वज्ञतां निरुणद्धि विरुणद्धि वा वक्तृता । न चर्त्तेऽतीन्द्रियार्थदेशिनमतीन्द्रियपदार्थगोचरं प्रमाणभावमाविशति । असम्भवश्चातिशयेनापौरुषेयीणां वाचाम् । अनेन वागतिशयमाह स्याद्वादिनः । सत्यपि चतुस्त्रिंशत्यतिशयेषु पादत्रिकेण रूपस्थावस्थाविष्करणप्रधानेनातिशयचतुष्कमेव भावार्हन्त्यनिबन्धनं निबद्धं भगवतो वीरस्य । ननु भवत्वाद्यातिशययुग्मस्य क्षायिकत्वेन भावार्हन्त्यनिबन्धनता, अन्त्यद्वयस्य तीर्थकरत्वभाषापर्याप्तिनामकर्मोदयजत्वेन कथं जाघटीति तन्निदानता ? । सत्यं, तत्प्रभवविपाकवेदनकाल एव च भावार्हत्ताऽरुहताम् । यद्वा मिथ्यात्वादिमोहनीयश्रुतावरणीयादिक्षयाङ्गत्वादपरेषामसाधारणसम्यक्त्वादिगुणोत्पादकतया क्षायिकादिहेतुतेति न विरोधः । न चेदं परेषां भवदप्येवंविधम् । साम्प्रतं रूपातीताऽवस्थामधिकृत्याह– 'सिद्धं' शेषभवोपग्राहिकर्मचतुष्टयक्षयेण निष्ठितार्थम् । अपुनरावृत्त्या पञ्चमगतिप्राप्त्या जन्मादिदुःखरहितं शाश्वतानन्दधामस्थायिनम् । न हि दग्धे कर्मबीजे भवाङ्कुरोद्गमः सम्भवी, तपोयमनियमादिवैयर्थ्यापत्तेः । मुक्ता अपि 'मुक्ताः सर्वत्र तिष्ठन्ति व्योमवत्तापवर्जिता' इति वचसा कैश्चित्सर्वव्यापितयाऽभ्युपगताः । न चायं तेषामभ्युपगमो न्याय्यो, यावच्छरीरं तथाभावे प्रत्यक्षविरोधः, इतरत्र ज्ञानानुत्पत्तेः । शरीरस्य ज्ञानावच्छेदकत्वेऽपि परशरीरादिव्यवस्थाऽनुपपन्नैव । विभुतायां विमुक्ते बाह्याभ्यन्तरे शरीरे न क्रिया, यया व्याप्तिः स्यात् । न च तथास्वभावे मानं किञ्चित् । न च तथाविधः पूर्वप्रयोगोऽप्यस्ति । न च शरीरं परिमाणप्रतिबन्धकं, येन तदभावे स तथा स्यादित्यभिप्रेत्याह– 'सिद्धालयं' । सिद्धचन्ति स्म-निष्ठितार्था भवन्ति स्म कर्ममलहीना

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

जन्तवोऽस्यामिति सिद्धिः-व्यवहारत ईषत्प्राग्भारालक्षणो विशिष्टो भूभागः, सैवाऽऽलयो–निवासस्थानमप्रतिपातितया तत्प्राप्तेः यस्य, स सिद्धचालयस्तम् । अनेन विशेषणयुगलेनाऽर्हतश्चरमशरीरिता-नियमं निश्चिनोति निश्चयप्रवीणः प्रवचनानूचानः । यद्वा-रूप-स्थाऽवस्थापेक्षमेवेदं विशेषणयुगलम् । तत्र सिद्ध इव सिद्धो निर्दग्ध-रज्जुकल्पभवोपग्राहिसद्भावाद् अन्तरा क्षणस्थायिवेदनीयमन्याऽदृष्ट-समुच्चयनाभावाद् भवतीहापि सिद्धसमानता, केवललाभे वाऽवश्यं तद्भवमुक्तिगामितेत्येवं ज्ञापनायैवं व्यपदेशः । सिद्धचालयता त्वन्यैः अणिमाद्यष्टसिद्धिधामतयेश्वरता कल्पितपुरुषविशेषे गृहीता, तान् शिक्षयितुमामर्षौषध्याद्यनन्तसिद्धिनिलयोऽयमिति ज्ञापनाय । न चाभिमानिकसिद्धचालयता प्रभुतानिबन्धनं मुमुक्षूणाम् । एवं पूर्वोक्तविशेषणषट्कभावमहन्महिमालयं नामतो निर्दिशति–'वीर' मिति । जन्माभिषेकसामयिकवामपादाऽङ्गुष्ठस्पर्शमात्र-सुरसानुसञ्चालनज्ञातबलपराक्रमशचीपतिविहितवीराभिधानम् । यद्वा–वृन्दारकविभुविहितवर्धमानवीरताप्रशंसाऽसहिष्णुसुराश्रिता–सुररूपेक्षणाक्षुण्णधैर्यवज्रमुष्टिविदारिताऽरात्युपसर्गबुद्धिविक्रमाक्रा-न्तचेतोऽमराभिहितवीरनामानं, यद्वाऽनेकभवशुभभावितान्तः-करणतातितानन्तदुःखाऽऽकरभवसागरोद्वेगप्रतिज्ञातशिवगमनोपायो-पस्थितानेकाल्पसत्त्वसत्त्वदुस्सहपरीषहोपसर्गव्रातवात्याऽचलितधैर्या-धरीकृताऽमर्त्यमहीधराऽलोकनलोकविहितवीराख्यं, यद्वाऽर्थि-जनार्थनानुकूलार्थवितरणविख्यातदानानिष्टाखिलात्ममोहनमहाप्र-तापमोहराजोदीर्णपराक्रमापरापरातिदुस्सहोपसर्गादिभटोद्भटसुभ–टतानिराकरणनिपुणावधृतक्षमादिप्रगुणशस्त्रवित्तयुद्धविक्रमामरप–तिप्रतिचित्यचलपरिणामज्ञापितधर्मधीरताज्ञापितयथार्थवीराभिहृवं चरमतीर्थपतिमासन्नोपकारिणं नत्वेति योगः । क्त्वाप्रत्ययस्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तुल्यकर्त्तृकोत्तरकालीन क्रियासापेक्षत्वादुत्तरगाथयोत्तरक्रियामाह – 'वुच्छं' ति । वक्ष्येऽभिधास्ये, अन्तरात्मनि सिद्धत्वेऽपि प्रकरणरूपतया निरूपयिष्यामि । सकर्मकाख्यातस्य कर्मानन्तरीयकत्वादाह- "केइ पयत्थे" त्ति । काँश्चिद्, युक्त्याऽऽगमसिद्धा अपि तथाविधसुकुमारमतीनां शास्त्रानभ्यासिनां तदनर्हाणां वाऽज्ञातत्वेन ज्ञानश्रद्धानाचरणयोग्या ये पदार्थाः, पद्यन्ते–गम्यन्ते जीवाद्या अर्था एभिरिति पदानि-समयापेक्षयैकार्थनिरूपकश्रुतभागास्तेषामर्था– अभिधेयाः सम्बद्धासम्बद्धरूपास्तान्, यद्वा–पदार्था लोकाद्यवस्थानिश्चित्यादयो लोकोत्तराः, आवेणिकादयो लौकिकाः प्रतिपाद्या अर्थाः पदार्था वस्तूनीतिकृत्वा तान् । इदं च जिनवचनमहोदधेरशक्यसङ्ग्रहतां मन्वानोऽपि एकाद्यपि महोपकारकर्त्तृ जिनवचः, सामायिकमात्रपदप्रभवानन्ताऽऽनन्दपदप्राप्तिप्रतिपादकपारमर्षप्रामाण्यादिति कतिचित्तदुद्धारोऽपि श्रेयसे इति ज्ञापनपरं पदद्वयम् । कीदृशाँस्तान् लौकिकलोकोत्तरान् । लोके–परमर्षिप्रतिपादिताऽऽगमनिरपेक्षप्रवृत्तिपरायणे सामान्यजने भवा लौकिका, लोकोत्तराः-अतीतदोषतालब्धानन्तज्ञानपुरुषविशेषप्रतिपादिताऽऽगमसिद्धास्तेषां लोकस्वभावादीनामबाधितवाक्यप्रतिपादितत्वाल्लोकोत्तमता विद्यत एवेति लोकोत्तरास्तान् । समाधास्यति च लौकिकपदार्थप्रतिपादनायोग्यताशङ्कां स्वयमेव सूत्रकारः सूरिः सूत्रेऽग्रे । तेन नात्र तच्चसूर्या । न च लोकागमसिद्धत्वेन तादृक्पदार्थप्रतिपादनं सफलप्रवृत्तिव्याप्तप्रेक्षावत्ताञ्चितनरोचितमित्याहाऽस्य सफलतां-'समासेन'–सङ्क्षेपेण । सन्ति हि विचित्राः श्रोतृरुचयो, येन सङ्क्षिप्याभिधानं फलवत् । यद्वेदानींतनजनानां तादृङ्मेधायुर्बलधारणावर्जितानां नानीदृशेन सम्पद्यते बोध इत्युचितोऽयं सङ्क्षेपप्रयासः । नच स्वमनीषाशिल्पिनिर्मितं ग्राह्यतामेति किञ्चिदपि लोके लोकोत्तरे वा, सुनिश्चितासम्भव-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

द्वाधकप्रमाणसिद्धस्यैवोपादेयत्वात्। नचाऽनुपासितगुरुकुलमयूरनृत्यवदुपादीयते शिष्टैः शिष्टाऽप्रतिपादितं सुन्दरमपीत्याह-'लोगागमाणुसारा'। लोको-व्यवहारार्हप्राणिगणः आप्तोदितिनिरपेक्षप्रवृत्तिपरः, आगमाश्च–स्याद्वादमर्यादया जीवादिपदार्थज्ञानसाधनानि सर्वज्ञवचनानि, तेषामनुसरणं–तदुक्तस्वरूपानतिक्रमेण तदुल्लेखनं, तस्मात्। हेतुपञ्चमीयम्। भवन्ति हि आवेणिकादिपदार्थप्रतिपादने लोकाऽऽगमा हेतव इति। अत्र पूर्वं च लोकलौकिकशब्दयोः पूर्वंनिपातो दृष्टेष्टाऽविरुद्धप्रतिपादकत्वेन तयोरितरतुल्यकक्षताज्ञापनाय, यद्वा–लोकव्यवहारकुशलकुशलाभिसन्धिमत एव लोकोत्तरादियोग्यताभावात्तत्प्राधान्यमिति। यद्वा–धर्मार्थादेराकृतिगणत्वात् अत्रापि विकल्पेन पूर्वंनिपातविधिः। अस्तु वाऽऽनुपूर्व्येण प्राग्निपातः। यथाधिया समाधेयं सुधियाऽऽगमाऽविरोधेन। समासकरणप्रयोजनम् अर्थापत्त्याक्षिप्तमपि साक्षादाह नहि सर्वोऽपि वेविद्यतेऽर्थापत्तिसिद्धमर्थमिति तद्वचनसफलतेति–'मंदमइविबोहणट्ठाए' त्ति मन्दा–तथाविधन्यायाद्यनवगाहितया सुकुमारा मतिः-बुद्धिर्येषां ते मन्दमतयः। अनेनैतेषामेतादृशप्रकरणाद्यन्तरेण व्यवहारव्यवहार्यपदार्थकुशलतासम्पत्तिरपि असम्भाविनीतिदर्शनेन महोपकारोद्भूतिरनेन दर्श्यते। तेषां विबोधनं–विविधं यथा तस्य बोधोत्पत्तिः स्यात्तथा 'यो यथा बुध्यते जन्तुस्तं तथा बोधये' दित्युक्तेः बोधनंप्रतिपाद्यपदार्थस्वरूपज्ञापनं, स एवार्थः–प्रयोजनं, अनेन 'न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात्। ब्रुवतोऽनुग्रहबुद्धया, वक्तुस्त्वेकान्ततो भवती' ति वाचकवर्यव्यक्तवचनेनैकान्तिकी धर्मसम्पत्प्राप्तिर्ज्ञायते प्रकरणकारस्य। तस्मै, उद्देश्यत्वार्था चतुर्थी, तेनैतत् प्रकरणकर्त्तुरन्यफलनिरपेक्षताध्वननेन केवलधर्मोपदेशकता परमार्थपरायणता वा ज्ञाप्यते। नह्यन्तरा परमपुरुषमतिशयसेवधिं भवति

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

धर्म-तत् फलमोक्षाऽन्यपदार्थनिःस्पृहो, 'मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुष' इत्याप्तोक्तेः । न चान्तर्गडुनैतद्गाथायुगलान्तर्गतेनाभिधेयादिन्यासेन प्रयोजनं, यावता सति तादृश्याभिधेयप्रभृतौ तत एव बोधादसति च नाभिधेयप्रभृतिन्यासमात्रेण सिद्धिरितिवाच्यम् । संशयस्यापि प्रवृत्तिजनकत्वादुपादीयते चापोहवादिनापि तत्तच्छास्त्रादावभिधेयादिसूचकं वाच्यम् । अधिकार्युल्लासनायेति केचित्, नान्यथाऽऽमूलाच्छ्रवणमननावधानतातेषामितिगाथायुगलार्थः ।

लौकिकलोकोत्तरपदार्थव्युत्पादने लोकागमानुसारात्प्रतिज्ञाते शङ्कते–यद् आगमानुसारेण लोकोत्तरपदार्थव्युत्पादनं न्याय्यं, लोकोत्तराणां परं 'लोकसञ्ज्ञां परित्यज्ये' तिवचनाल्लौकिकपदार्थव्युत्पादनं न घटामञ्चत्यञ्चितक्रमस्य भगवत इति । अत्राह–

सुंदरमिइ अन्नेहि वि, भणियं च कयं च किंचि वत्थुंति ।
अन्नेहि वि भणियव्वं, कायव्वं चेति मग्गो यं ॥३॥

अन्यैरपि–आप्तोदितागमाननुसारिभिरपि, अपिनाऽऽस्तां तावत्सम्यग्दर्शनादिपूतात्मभिर्भणितं कृतं च । व्यवस्थायां चेदपिः, तदागमानपेक्षयापि स्वबुद्धिकल्पनया यद् व्यवहारादि अविरोध्यागमादिनेति ज्ञेयं । भणितं–व्यवहारप्रधाने शास्त्रे निर्दर्शितं, चकारेण न केवलं निर्दर्शितं किन्तु युक्त्या गुणकारणतया व्यवस्थापितमपि, कृतं च–तत् तथाविधभणितिभणितमेवाचीर्णं क्रियया निष्पादितं, चकारेण कारितं प्रशंसितं चेति द्वयोर्ग्रहणम् । यद्वा चकारद्वयेन लौकिकोक्तिकृत्योर्देशकालादिभेदेन वैचित्र्यमाह । जायत एव देशकालादिभेदोऽवस्थावदामयावि–भोगभेदे आचारवैचित्र्ये हेतुः । तादृशैर्भणितं कृतं च यदि सर्वज्ञवाङ्मयानुसारिविहितं स्यादित्याशङ्क्याह–किञ्चिदपि–चित्प्रत्ययस्य सामान्यार्थ-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तयाऽनिर्दिष्टं यत्किमपि लोकोत्तरमार्गानुयायिभिरनुमतमननुमतं वा माध्यस्थ्यफलमेवैतद् अन्यथा न किञ्चिदपि गुणकरमाप्तागमाभणितमस्ति, यद्वा वर्त्तमानागमापेक्षयाऽलभ्यवचनविषयताकमाचारमङ्गीकृत्येदं वचः, । अथवाऽनिषिद्धमपि साक्षादनुक्ततयाऽऽचारानुमेयाऽऽगमवाक्यवैषयिकोऽयमुद्गारः । 'वत्थुं' ति वसन्तीष्टप्राप्त्यादयोऽस्मिन्निति वस्तु–आवेणिकादिराचारः । इतिर्हेतौ, तस्य प्रयोगं दर्शयिष्यामः । अन्यैरपि–परिहृतलोकसञ्ज्ञैरागमप्रधानतया लोकोत्तराध्वानुवर्त्तिभिरपि, अपिना न तावल्लौकिकमार्गानुगामिभिः प्रकृतिजनैरेव केवलं, किन्तु तदन्यैरपि पूर्वोक्तैः । भणितव्यं–तत्पूर्वोपदिष्टं तद्गुणप्राप्तियोग्यतदर्थिने उपदेष्टव्यं, न केवलं लोकाचरितत्वेन तस्यावमतामवधार्योपेक्षणीयम् । कर्त्तव्यं च-वैदिकादिमार्गप्रणेतृप्रमुखैरहिंसादिवाक्यं यथा जैनमनोरञ्जनाय न्यस्तं केवलमागमे, अनुष्ठितं च विरुद्धमेव होमाद्यनादित्वादाप्ताध्वनः, न तथात्र किन्त्वाचारविषयीकार्यं, सतां श्रद्धानक्रिययोरेकरूपता निश्चयात् । चकारः कारणादिसमुच्चयार्थः । एवं च यावल्लौकिककर्त्तव्यकार्यतापत्तौ गुणज्ञानाभावेन गतानुगतिकत्वापत्तौ च लोकोत्तराणामाह–'सुन्दरं' बलवदनिष्टाननुबन्धीष्टसाधनं यदेव लोकप्रवृत्तमेवंविधं स्यात्तल्लोकोत्तराणामप्युपदेशनीयं तैरादरणीयं च । इतिर्हेतौ, न केवलं लोकाचरितत्वेन लोकोत्तराणां विधेयतया जेगीयते मया, किन्तु यल्लोकप्रवृत्तं सदपि परिणामापातसुन्दरं निश्चीयते धीधनैर्धर्मिभिस्तत्कार्यं, एवं ज्ञापनायेतीति । ननु भवत्येंव लोकमतादरवतो मिथ्यात्वादिमार्गप्रवृत्तिस्तथा च गर्ह्योऽयमुपदेश इति चेत्। अहो ! अभिप्रायाऽज्ञता भवतां, सुन्दरादरणस्यैवाभिहितत्वादभियुक्तैर्नात्र मिथ्यात्वादिप्रवृत्तिप्रसङ्गः, तस्य तु सर्पविषानलशल्यजन्ययातनाधिकयातनाहेतुतया सुतराम-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सुन्दरता। ननु दध्यानयननोदनया दध्याधारानयनवत् लौकिकानुष्ठानप्रामाण्ये लौकिकमार्गप्रामाण्यापत्तौ लोकोत्तरमार्गव्यवच्छेद इति चेदाह-'इति मग्गो यं' ति। अयमेव लोकोत्तरो मार्गो-यदुतान्यैरपि बिहितं यत्सुन्दरं, तद्भूणितव्यमाचरणीयं च, न लोकविहितत्वमात्रेण परिहर्त्तव्यं, किन्तु यदसुन्दरं तद्धेयं, यत्तु सुन्दरं तद् ग्राह्यं। इतिः हेतौ। अतो लोकोत्तरागमानुसारिपदार्थप्रतिपादनपरायणेनापि मया लोकानुसारादपि पदार्थप्ररूपणं प्रतिज्ञायते। नहि शिष्टमार्गप्रवृत्तः प्राप्नोति पातं कदाचिदपि गुणश्रेणेस्तदपहाय प्रवृत्तस्यैव गुणगणविशरारुता-प्राप्तभवचक्रदारिद्र्यभावानुगमात् ॥३॥

एवं कृतेपि समाधाने दृढीकृतेऽपि सुन्दरलौकिकविधेर्विधेयत्वे ये केचिदनाकलय्याऽऽर्यतिं लौकिकत्वमेव परिहारे बीजमवबुद्धय लौकिकपदार्थानभिधाने एव कृताग्रहा नानुमन्यन्ते पूर्वकृतां युक्तिं तान्शिक्षयितुमाहाऽऽचार्यवर्यः-

इहरा उ कुसलभणिईण चिट्ठियाणं च इत्थ वुच्छेओ।
एवं खलु धम्मो वि हु सव्वेण कओ न कायव्वो ॥४॥

इतरथा-पूर्वगाथोक्तप्रकारानभ्युपगमे सुन्दरत्वेन नोपादेयं, किन्तु लौकिकत्वेन हेयमेवेत्येवमङ्गीक्रियमाणे इतियावत्। तुर्विशेषणे। एकस्तावन् मार्गविरोधः पूर्वोक्तोऽपरं चेदमितिविशेषणाय। किमित्याह-'कुसलभणिईण' कुशलाश्च ता भणितयः कुशलभणितयस्तासां-व्यावहारिकानेकगुणगणप्रकटनप्रभविष्णुसामाद्यनेकनीतिविवेचनविचक्षणवाचां, यद्वा-कुशलानां-अलब्धसम्यक्त्वानामपि माध्यस्थ्येन योगाचार्यादिवद्यथार्थवस्तुविचारविवर्त्तानां, भणितीनां-वृत्तिनिरोधनिदानाभ्यासवैराग्ययमनियमादिवाक्यानां।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

न केवलं वाक्यानां किन्त्वन्येषामपीत्याह–'चेष्टितानां च' तादृक्-शास्त्रप्रेरितबुद्धिजातप्रवर्त्तनानां सामादिप्राणायामाद्यावेणिकादि-क्रियाणां, चकारः पूर्वोक्तभणितीनां समुच्चयार्थः। किमुभयेषां भणितीनां चेष्टितानां चेत्याह-'इत्थ वुच्छेओ' अत्र-लोकोत्तरे मार्गे तत्त्वतो भवदभ्युपगमाङ्गीकृतियुते वर्त्मनि, व्युच्छेदः–सर्वथाऽ-भावः। स्यादिति क्रियाध्याहार्या। इदमत्रैदंपर्यं-यल्लोकं शास्त्रं चोभयमपि मार्गं मृगयमानेन प्रवर्त्तयित्रा चावश्यमन्वेष्टव्यं, आश्रित्य चोभे वक्तव्यं, प्रवर्त्तितव्यं च तदुभयानुसारेणैव, तत्करणे कुशलताऽन्यथा तु जायाजनन्योः स्त्रीत्वेन तुल्यत्वात् उभयत्रापि प्रवृत्तिसाम्येनोन्मत्ततोद्भव एव प्रसज्येत। न च तद-प्रतिपादितं केनाप्यालम्ब्यते क्रियते वा तदुक्तमिति सुष्ठूक्तमित-रथा कुशलभणितीनां चेष्टितानां व्युच्छेदः स्याच्चेल्लौकिकत्व-मात्रेण परिहारः क्रियेत। एवमपि यथार्थमार्गमप्रतिपद्यमाना-न्निरीक्ष्य निरीक्षणानिपुणो परानत्याग्रहग्रहिलान्धर्ममानिनः प्रोवाच प्रोत्साहयितुं यथार्थमार्गेऽन्त्यं हेतुं-'एवं खल्वि'त्यादिना। एवं यदि भवतां लोकाङ्गीकृतितामात्रेण द्वेषस्तदैवंभूतासदाग्रहे 'धर्मोऽपि' दुर्गतिप्रपतज्जन्तुजातधारणक्षमो दानादिरूपः सदाचारोऽपि, अपि-नाऽऽस्तामावेणिकसामप्राणायामादिकं, तत्तु वर्त्तमानागमानुदिततया तावन्नाङ्गीकार्यमेव सुन्दरमपि। हुर्निश्चये। न खलु भवादृशोऽर्ध-जरतीमालम्बन्ते यत्किञ्चिल्लौकिकाभ्युपगतं दानादिकं कार्यं, किञ्चिच्चावेणिकादिकं तादृगपि न कार्यं। न च न लोकानां समस्त्येव धर्मप्रवर्त्तनमतो न धर्मस्याकर्त्तव्यतापत्तिरिति वाच्य-मित्याह–'सर्वेण' व्यवहारविदा यावदास्तिकेन, कृत–आदृतः, व्यवच्छेदफलत्वाद्वाक्यस्य कृत एव। न खलु लोका दानादि न कुर्वन्ति, न वा न्यायसम्पन्नविभवतादि तेषां नास्ति। चेदस्ति तदा तदङ्गीकृतिमात्रपरिहारवादिनो भवन्तश्चानालम्बमाना अर्धजर-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तीयमिति भवदनुयायिभिर्भवद्भिश्च न कार्य एवासावपि। तथाच लोकव्यवहारोपयोग्यावेणिकादित्यागेन लोकव्यवहारबहिर्वर्तिता धर्मादिव्युत्सर्गेण च पुण्यशम्बलशून्यता च देवानांप्रियानामिति हा ! कदाग्रहग्रहिलताफलानुभवभावुकताऽनुचिता भवादृशां, सम्पन्नश्चाजामपनयतः क्रमेलकप्रवेश इतिन्यायः। यदि चोच्येत भवद्भिर्यदनादिकालीनमोहमहामलिम्लुचमुपितमहार्घ्यज्ञानाद्यसपत्नरत्नप्रापणप्रवणतया आपातपरिणामरम्यो धर्मः किमिति परिहि्यते ?। नं खलु चिन्तामणिर्गृहीतो (तमुक्तः) नरापसदेन केनापीति तत्प्रभावो न विद्वद्वृन्दवर्णनीयो, नवा तदङ्गीकारकर्त्ता न वर्ण्यते वर्णनाशालिभिः सूरिभिस्तदायाता भुजङ्गमनलिकान्यायेनाप्यस्मदुक्तं सुन्दरत्वाल्लौकिकमपि ग्राह्यमेव विचक्षणैर्विशदमिति रुचिरः मार्गः। आनन्दोऽयं महानस्माकं यद्भवादृशां महिमवन्मार्गावतार इति ॥४॥

एवं लौकिकपदार्थप्रदर्शनविषये विहिते समाधानेऽन्य आशातनार्थमजानानाः सम्यग् ग्रन्थस्यैव प्रस्तुतस्य महापुरुषाशातनाभीरुभिरकर्त्तव्यतां प्रतिजानानाः स्वकमत्या कर्त्तव्यकार्यमेतदन्यदुपदर्शयन्त आहुः –

अन्ने आसायणाऽओ महाणुभावाण पुरिससीहाणं ।
तम्हा सत्तणुरूवं पुरिसेण हिए पयइयव्वं ॥५॥

अन्ये–पूर्वोक्तवादिनो भिन्नाः, यद्वा–यथार्थहिताऽऽशातनास्वरूपानभिज्ञतया यथावच्छ्रद्धानशून्याः केचन भणन्तीति वाक्यशेषः। किमित्याह–'आसायणा' आ-अभिविधिना, शात्यते-विनाश्यते, ज्ञानाद्यात्मस्वरूपं मोक्षमार्गो वाऽऽत्मोन्नतिविघ्नकरणेन यया साऽऽशातना मानहानिर्भक्त्यन्तरायो वा। कुत इति चेदाह–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'अओ' अस्माल्लोकागमानुसारेण लौकिकलोकोत्तरपदार्थवचनात्समासेन । एतच्छास्त्ररसिकतयाववुद्धयन्तेऽवबोद्धारो, यदुत न तादृशी शक्तिश्चिरन्तनानां यत्सङ्क्षेपेण मन्दमत्यवगमनानुरूपं प्रतिपादयेयुः पदार्थम्, यद्वा-अरण्यरुदितमिव वृथा विहितो व्यायामो विस्तरेण वस्तुव्याख्याने भव्यभव्यभावानुत्पादके, यद्वा—न ते न उपकारकाः, यन्न तद्वचनादेरुपयोगोऽजनि कदाप्यस्माकं, अवगतविस्तराणां तत्रभवतां ग्रन्थकृतां भवतु सुतरां स इत्युपकारापलापः । केषामाशातनेत्याह— 'महाणुभावाण पुरिससीहाणं' महाननुभावः-श्रुतकेवलि-दशपूर्वधर-पूर्वधरत्वादिरूपः, यद्वा—गभीरिमतिरस्कृतान्त्यसरित्पतिनिम्नतावाक्यप्रवाहार्थगाम्भीर्यालङ्कारादिरूपो ग्रन्थरचनाप्रभावो येषां ते तथा । अस्त्येवानन्ताद्यर्थप्रतिपादकप्राचीनानूचानानामपूर्वः प्रभावो योऽशतोऽपि नापरेषाम्। न सा महानुभावता यथावदवगम्यते तदागमावबोधरहितैर्या च नग्नाटवदवबुध्यते सापि न तथाविधगुणगणस्वरूपानवगमान्वयिनी चिरभाविनी हृदये सहृदयानां, न वा पारमार्थिकी । सापि भविष्यत्याशातना लौकिकमहानुभावानां देवादीनामिवान्येषाम् । न च सा तथानर्थाय वर्जनीयत्वेऽपि तदाशातनाया इत्याशङ्कासम्भवे उक्तं—'पुरिसे' त्यादि । पुरुषेषु सिंहा इव पुरुषसिंहास्तेषां तीर्थंकरगणधरादीनाम् । ते हि प्रबलाऽज्ञानतमस्ततिविस्तारणदक्षज्ञानावरणीयादि-कर्मराजप्रधानसुभटोद्भटवीर्यविनाशाय सिंह इव पराक्रमन्ते एवान्यथाऽनादिकालीनासङ्ख्यप्रदेशप्राप्तसाम्राज्यकर्मणः पराभवासम्भवात् । अनेन विशिष्टवाक्येन तादृक्परमपुरुषाशातनया बहुलसंसारभ्रमणं ज्ञापयन्ति । यदागमः—

* "तित्थयरपवयणसुयं आयरियं गणहरं महड्ढीयं । आसायंतो बहुसो अणंतसंसारिओ होइ ॥१॥" न च भवादृशां

* श्रीतीर्थंकरप्रवचनश्रुतं आचार्यं गणधरं महर्द्धिकम् ।
आशातयन् बहुशः अनन्तसंसारिको भवति ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ज्ञातसमयसद्भावानां कार्यं एतादृशेऽनन्तभ्रमणनिवन्धने युक्तो यत्नो; लाभमिच्छतो नीविहान्यापत्तेः। किं कार्यं तर्हि ज्ञाताऽऽगमसतत्त्वैर्मुमुक्षुभिरित्याह–"तम्हा" यस्मात् सङ्क्षेपेणापि परमपुरुषप्रणीतसिद्धान्तानुसारादपि नूत्नाऽविगीतग्रन्थग्रथंने तत्प्रणेतृजनाशातनाया दुरन्तापारावारदुःखपारावारभवभ्रमणभावो भवति, ततो हेतोः "सत्तणुरूवं" शक्ति-प्रशस्ताध्यवसायजातवीर्यान्तरायादिक्षयोपशमसमुत्थात्मसामर्थ्यमनतिक्रम्य, तदतिक्रमणे हि महान्प्रत्यपायः, यथावीर्यमाराधनैव फलवती ज्ञानादीनामन्यथा तु विधानेपि यथाकथञ्चिन्न तथा फलप्राप्तिः, परिणामवृद्धयनुगुणा हि सम्पद्वृद्धिः। न च भवति वीर्यगोपकस्य तथाभूता सेति, अतिक्रम्यापि तां प्रवर्त्तते चेल्लभते पातमेव। नहि मनोमात्रेण शारीरिकसम्पत्सम्भवोऽभावे च तस्याः प्रतिज्ञातपरिहारेणार्त्तादिध्यानोद्भूतेर्वा महाननर्थप्रसरः समुद्रोत्तरणक्षममरालतरप्रेक्षणाविचारित–निजसामर्थ्यजलकल्लोलमालामालिपारावारपारप्रापणप्रवृत्तध्वाङ्क्षवत् जिनकल्पश्रवणमात्रजाताऽविचारितसामर्थ्यप्राचीनानल्पकूटक्रोधविकारप्रेरितनग्नाटगुरुजिनकल्पाङ्गीकृतिरिव वा। न चासौ हितकृदात्मने कथञ्चिदपीति शक्त्यनुरूपमित्युच्यते। क्रियाविशेषणमिदम्। तथा च नपुंस्त्वं द्वितीया च। किमित्याह–'प्रयतितव्यं' यत्नो विधेयः, न केवलं विचारमालामालिनाऽवबोधमात्रवता वा भाव्यं, किन्तु पुरुषकारोऽपि कार्यः। उपादानकारणज्ञानचिकीर्षाप्रयत्नविघ्नजयादिभिरेव कार्यसिद्धेः। केनेति चेदाह–'पुरिसेणि'त्ति। पुरुषेण, पुरुषकथनं च तेषामतिशयेन प्राधान्यताख्यापनार्थं, पुरुषज्येष्ठो धर्म इति कृत्वा प्रतिपादितं चाऽऽगमेऽपि पुरुषप्राधान्यम्-'वरिससयदिक्खियाए अज्जाए अज्जदिक्खिओ साहू' इत्यादिना। न चानेन स्त्रियां हित उद्यमोऽविधेयः, तासामपि पुरुषवत्सम्यक्त्वज्ञानचारित्रशालितया निर्वाति-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सांसारिकाशेषद्वन्द्वनिर्वाणप्राप्तिसम्भवात् । पुरुषप्रधानता च तासां 'तुच्छा गारवबहुले' त्यादिनाऽऽगमेन 'चञ्चलत्वं निस्त्रिंशत्व' मित्यादिना व्यवहारशास्त्रेण प्रकटीकृतामवस्थामनुभूयमानां चाऽऽश्रित्येति । क्व? इत्याह–'हिते' ज्ञानदर्शनचारित्रतपःस्वाध्याय-वैयावृत्त्योपदेशभावनादौ, एतद्विषययत्नस्यैवात्मोपकारकत्वेन विधेयत्वात् । परतप्तिकरणेन किञ्चिन्न प्रयोजनमात्मतप्त्यैव यतितव्यमिति भावार्थः ।

इति पूर्वपक्षकारेणाऽऽक्षिप्ते समाहितात्मा प्रवृत्तो निर्वचनं वितरीतुं गाथायुग्मेनाऽऽद्यगाथयोद्धारकरणप्रवृत्तिं दर्शयन् वाद्युक्त-दूषणप्रतीकारमाह–

तेसिं बहुमाणाओ ससत्तिओ कुसलसेवणाओ य ।
जुत्तमिणं आसेवियगुरुकुल–परिदिट्ठसमयाणं ॥ ॥६॥

'तेषां' अतीन्द्रियार्थवेदिवचनागोचरगुणवत्तीर्थंकरगणधार्यादीनां प्राचीनातिगूढार्थयथावद्विस्तृतशास्त्रशास्तृणां, बहुमानात्–आन्तरप्रीतिसम्बन्धात्, ज्ञाप्यते चैष प्रतिग्रन्थं सविशेषनमस्कारादिना । तथा च नूतनरचनादर्शनप्रारम्भ एव तन्महिमविलोकन-श्रवणे न भवत्येव श्रोतृपाठकयोस्तीर्थनायकादौ समस्तजननिस्तारणनिपुणेऽवज्ञालेशोऽपि, किन्तु पूज्यस्यात्यन्तपूज्यत्वात् पूजितृजकत्वाच्च लोकानां भवत्येवातितरामाराध्यताबुद्धिः तत्रभवति स्मिन् भगवति, कृते च बहुमाने यदि कोऽपि निर्भाग्यशेखरो वाद्युक्तकुत्सितविचारप्रवृत्तः स्यात्तदापि न दोषोऽयं ग्रन्थकर्तृणाम् । नहि कस्यचिच्छुभाशयोद्भूता शुभा प्रवृत्तिः नास्तिकानामवाशुभाशयोद्भवेन दोषास्पदम्, अन्यथा तीर्थकृद्देशनाप्रभवात्सम-तकुमतानां न विधेया स्यात्सापि भुवनगुरुभिरनेकभवभावितान्तः-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

करणतावाप्ततीर्थकृत्कर्मफलभूता। क्रियते च तैर्बोभूयन्ते च कुनया, न चाकरणीयता, शुभाशयप्रवृत्तशुभप्रवृत्त्यात्मकत्वात्तस्याः। न च 'स्वार्थभ्रंशो हि मूर्खते' तिवत्स्वहितं विहाय सा क्रियमाणा कार्यकरी,न च क्रियते इत्याह-'ससत्तिउ' त्ति। स्वशक्तितः। पञ्चम्यास्तसुः आद्यादेराकृतिगणत्वात्पञ्चमी च 'गम्ययपः कर्माधारे' (सि० २।२।७४ इत्यनेन। तथा च दुःषमारजनीप्रचारपटुतालब्धप्रबलप्रभावाया अवसर्पिण्या दोषेण यद्यपि तथाविधा क्षपकश्रेण्यादियोग्याध्यवसायवज्रर्षभनाराचादिसंहननाभावेन यावती स्वकीया शक्तिस्तामनतिक्रम्य। एतदेव हि पार्श्वस्थवकुशत्वयोर्भेदकत्वं,यदाद्योऽकारणप्रतिसेवाविधानविधुरो, न च प्रायश्चित्तादिप्रतिपत्तिभावुकः। इतरस्तु न तथा, किन्तु यावच्छक्ति प्रतिसेवापरिहारपरः, कृतायां च कारणे तस्यामवश्यं यथायोगमालोचनादिविधाता। अनेन न केवलं उपदेशप्रदानमेवास्माभिः श्रेयस्करनिःश्रेयसप्रापकतयाअभ्युपगतं हितविषयकप्रवृत्तिविरहेण, किन्तु परप्रबोधनवत् स्वात्महितचिकीर्षुतया यथाशक्तिप्रवृत्तिरपि हितविषया। तामाश्रित्य किमित्याह–'कुसलसेवणाओ य' त्ति। कुशलो–मोक्षस्तस्यैव निखिलानिष्टनिर्गतत्वेन कश्मललेशेनाप्यकलङ्कितत्वात् केवलसुखरूपतासम्पत्तिसम्पत्तेः, तत्प्रापकं तत्प्रतिबन्धपराकरणपटिष्ठं वा सम्यग्दर्शनज्ञानचारित्राद्यनुष्ठानमपि 'कारणे कार्योपचारात्' कुशलमेव, यद्वा–पदैकदेशे पदसमुदायोपचारात्कुशलपदेन कुशलानुष्ठानमेव ग्राह्यम्। नहि भवति सशरीराणां मोक्षभाक्त्वं, कुशलानुष्ठानं स्यादेव चरमपुद्गलावर्तीनजन्तूनां लघुकर्मणामिति। तस्य सेवना-द्रव्यक्षेत्रकालभावानुरूप्येणाऽऽचरणा, तस्याः। अनेनाहैतद्यदुत-यः स्वयमशुभसमाचारः,केवलं नटवत्परोपदेशमात्रप्रवीणो, नासावुपदेशदातृपदवीमर्हत्याऽऽर्हतीम्। प्रपञ्चितं चैतत् 'स्वयं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

परिहार' इति प्रस्तुतप्रकरणप्रणेतृप्रणीतश्रीधर्मबिन्दुवृत्तौ प्रवचन-प्रभावकश्रीमन्मुनिचन्द्रसूरिभिः, प्रतिपादितं च दुर्गमव्याख्यानाति-गूढपदप्रकराऽऽचारकल्पविभाषणविज्ञ-श्रीभाष्यकरणकृतिभिः श्री-निशीथभाष्ये 'धम्मो जिणपन्नत्तो' इत्यर्धगाथया, किमधिकमी-क्षणेनात्र, प्रकरणकृद्भिरेव श्रीपुज्यैर्न्यगादि 'चारित्रेण विहीनः श्रुतवानपि नोपजीव्यते सद्भि'रित्यादि प्रभूततमम् । न चैतदुपदेश-दानयोग्यताज्ञापनपरं वाक्यव्रजमिति नात्रार्हत्युपयोगमिति वा-च्यम् । ग्रन्थप्रणेतृणामप्युपदेशफलत्वादेव ग्रन्थग्रथनस्य । यद्यपि कैश्चित्स्वस्मृतिबीजवृद्धया इति प्रतिज्ञायते, परं तदात्मलाघवदिद-र्शयिषयैव, तत्त्वं तूपदेशदान एवान्यथा तथाविधस्पष्टोल्लेखवद्र-चनाद्यभावात् । चकारेण पूर्वोक्तबहुमानमुत्तरत्र वक्ष्यमाणं च समुच्चिनोति । उक्तकारणद्वयसम्पत्तेः किमित्याह-'जुत्तमिणं' ति । एतल्लौकिकलोकोत्तरपदार्थप्रतिपादनं युक्तं, पूर्वपक्षोक्तदोष-लेशेनाप्यश्लिष्टत्वाद् गुरुमहिमार्हगुणगौरवाधायकत्वाच्च । न खलु जनानामेदंयुगीनानां सर्वेषां तथाविधं बोधपाटवं बोबुध्यते, येन ते तथाविधातिगूढविस्तृतग्रन्थावगाहनसामर्थ्यं प्रथमतो देधीयेरेन् । शनैः शनैर्लघुतमलघुतरलघुग्रन्थाभ्यसनादिना प्राप्त-पाटवास्तु तथाविधे पदार्थरत्नाकरे वेविश्यन्ते शीघ्रम् । न चैतच्चि-रन्तनर्षिबहुमानादि अपर्युपासितगुरुकुलानां, नवाऽदृष्टसमयनिश्च-यानां, नैव च स्वयं गृहीतपुस्तकसाराणां केषाञ्चिदपीत्याह-'आसेवियगुरुकुलपरिदिट्ठसमयाणं'ति । आ-मर्यादया, श्रीमान् गुरुर्हि भवभ्रमिरुजार्त्तागदङ्कारोऽयमिति सबहुमानं, न तु-

* जस्स गुरुंमि न भत्ती न य बहुमाणं न गउरवं न भयं ।
न वि लज्जा न वि नेहो गुरुकुलवासेण किं तस्स ॥१॥ (उप०)

---

* यस्य गुरौ न भक्तिर्नच बहुमानं न गौरवं न भयम् ।
नापि लज्जा नापि स्नेहो गुरुकुलवासेन किं तस्य ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

इत्यादिशास्त्रशिष्टनिरर्थकगुरुकुलवासितेव, 'नाकार्यकृत् कारणमामनन्ति कारणलक्षणवेदिनः' सेवितं–आराद्धं दैवतमिव, गुरूणां–ज्ञानादिसङ्ख्यातीतगुणगौरवाणां, कुलं–गच्छः यैस्ते, तत्प्रसादलभ्यत्वादेव सकलासपत्नहितानाम् । यदुवाच वाचकमिश्रः–शास्त्रागमादृतेर्नं हितमस्तीति–

गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।
तस्माद् गुर्वाराधन-परेण हितकाङ्क्षिणा भाव्यम् ।।१।। (प्रशम०)

इत्यादि च । अत एव भगवन्तः श्रुतकेवलिनः श्रीभद्रबाहुपादा अपि प्ररूपयाञ्चक्रुर्यविज्जीवं गुरुकुलवासवासितां ज्ञानादिरत्नत्रितयार्थिनामुपादेयतया । तथा च तद्गाथा–

* नाणस्स होइ भागी थिरयरओ दंसणे चरित्ते य ।
धन्ना आवकहाए गुरुकुलवासं न मुंचंति' ।।१।। त्ति

किं बहुनोक्तेन, यावद्गुरुकुलं परिहरतो धर्माभाव एव निरूपितो निरन्तरभक्तिभरनम्रसुरासुरशेखरमणिविभावनविभाकरपादयुगलनखावलिकश्रीमद्भगवन्महावीरहस्तदीक्षितश्रीमद्धर्मदासगणिभिः सविस्तरं-'इक्कस्स कओ धम्मो' इत्यादिगाथाकदम्बकेन मोक्षरुचिमनःप्रमोदप्रदानपटुकदम्बेन उद्घुष्टा च कल्पभाष्यकारादिभिरपि गुरुकुलवासिनामेवाज्ञातोञ्छादिशुद्धिरपि । कृतं प्रसङ्गेन । न आसेवितगुरुकुलमात्रतैव ग्रन्थोद्धारे हेतुर्न वाऽपारभवानर्वाक्पारपारप्रापणप्रभविष्णुः, किन्तु सुविनिश्चितसमयज्ञतैवेति दर्शयन्नाह–'परी' त्यादिना । परितः–सर्वतोभावेन, न तु सूत्राद्यात्मक एव किन्तु निर्युक्तिभाष्यचूर्णिरूपनिरवशेषावगमेन, यद्वाऽऽसमाप्तेः। नहि दृष्ट आगमोऽशांशग्रहणाधीतः फलदः, पदार्थ-

* ज्ञानस्य भवति भागी स्थिरतरको दर्शने चारित्रे च ।
धन्या यावत्कथं गुरुकुलवासं न मुञ्चन्ति ।।१।।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वाक्यार्थंमहावाक्यार्थैंदम्पर्यतया श्रुतचिन्ताभावनासारतया वा दृष्टो–गृहीतः, न तु प्रोत्तुङ्गपर्वतप्रणालिकावत् श्रवणमात्रसारत्वेन अनवधारितः, समयः–अखिलार्थावगमालम्भविष्णुकैवल्यावलोकितलोकालोकतीर्थप्रवर्त्तनफलकतीर्थकृत्कर्मोदयवज्जिनवरेन्द्रवचनानुगुण्येन दृब्धो गणधारिभिर्धारणाद्यप्रतिमगुणगणगरीयोभिः सिद्धान्तः यैस्ते तथा, समयशब्देन सङ्केतोऽपि गृह्यते, सचात्राऽऽचरणादिरूपो यथार्हमवगन्तव्यः। ततश्चाऽऽसेवितगुरुकुल-परिदृष्टसमयपदयोः कर्मधारयस्तेषां। ज्ञाप्यते चानेन गुरुकुलवासिनां महात्मनां भववैराग्यविधानव्यग्रापूर्वापूर्वश्रुताभ्यासाभ्याससम्भवः। भवति च तादृशानामेव पुरातनर्षिबहुमान-यथाशक्तिकुशलानुष्ठानयुक्तता ॥६॥

एवं च परिहृतं पूर्वपक्षोक्ताऽऽशातनाहितविघ्नाख्यं अनुक्तं चाऽयथार्थप्ररूपणाप्रभवमनन्तसंसारभ्रमणकार्युत्सूत्रभाषितादि च दूषणं सूरिणा। अथ प्रकरणतया क्रियमाण उद्धारः समयावगमाय जायते भव्यानामित्याह–

जत्तो उद्धारो खलु अहिगाराणं सुयाउ न उ तस्स।
इय वुच्छेओ तद्देसदंसणा कोउगपवित्ती ॥७॥

यद्-यस्मात् कारणादुद्धारः, खलुरवधारणे। इष्टितश्चावधारणविधेरत्रोक्तोऽप्यग्रे योक्ष्यते। अधिकाराणां-वक्ष्यमाणलोकानादित्वादीनां, श्रुतात्–अखिलात्युदग्रभवभ्रमणभाविदुःखनिर्दलननिपुणादाप्तोक्तागमात्, अवधारणस्याऽत्र योगात् श्रुतादेव, न स्वकीयकल्पनाबुद्धेः, अतीन्द्रियार्थविधौ तस्यैव मानत्वात् 'परलोकविधौ मानं वचन' मिति महापुरुषोक्तेः। अनेन हि–

* 'जो हेउवायपक्खे हेउओ आगमे य आगमिओ।
सो समयपण्णवओ सिद्धन्तविराहओ अन्नो' ॥१॥

---

* यो हेतुवादपक्षे हेतुक आगमे च आगमिकः।
स समयप्रज्ञापकः सिद्धान्तविराधकोऽन्यः॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

इति पारमार्षवचनानुसारेण प्रज्ञापनां कुर्वतः स्वस्याविराधकतां ज्ञापयति । भवति च स्वमनीषिकयोच्यमानं भव्यानां भववृद्धयेऽनन्तजिनवरकेवलिपरमप्रभावकागमाशातनाप्रसक्तेरुक्तं चैतत्स्पष्टं श्रीभगवत्यां मट्टुकाख्याने श्रीमता चरमतीर्थाधिपेन । 'श्रुतादि'त्यनेनैतदाह-यदुत-परलोकविधौ मानतयाभिमतमपि वचनं न यस्य कस्यचित्, किन्तु अतीन्द्रियार्थवेदनविज्ञपुरुषस्यैव । न च श्रुतसामान्यादेव उद्धारे प्रतिज्ञायमाने कथं कषच्छेदतापशुद्धागमरूपादनवगिर्दशिदृब्धादुद्धारप्रतिज्ञाऽवगम्यतेऽधिजिगांसुभिरितिवाच्यम् । सामान्यशब्दा अपि वक्त्रादिवैशिष्ट्याद्विशिष्टार्थप्रतिपादकतया प्रतिपद्यन्त एव लोके शास्त्रेऽपि च । यद्वा-'व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षण'मितिन्यायान्न श्रुतशब्दार्थसन्देहमात्राद् व्याहतताऽस्य, किन्तु ग्रन्थारम्भकृतनमस्कारविषयनिखिलार्थावलोकनालम्भविष्णु–श्रीजिनवरेन्द्रवाक्यरूपादेव श्रुतादिति विशेषप्रतिपत्तिः कर्त्तव्या । यतः श्रुतादेवोद्धारस्ततः किमित्याह–'न उ' इत्यादि । एवं क्रियमाणे तस्य–भगवतः श्रुतस्यातिमहतोऽतिमहाविषयस्य निर्युक्तिभाष्यादिरपि सर्वथाऽनुन्मुकुलितस्य, व्युच्छेदोऽभावः पठनपाठनाद्यभावेन पूर्वपक्षोक्तनीतिना प्रतिपादितस्तत्तद्ग्रन्थाभ्यासकाले पठनाद्यभावेऽपि द्रव्यतो भावतस्तद्वाच्यार्थप्रतिपत्तेः । न हि शब्दमात्रे तात्पर्यं, प्रयोजनं तु यथाश्रुतेनार्थप्रत्यायनं, तदेवानेनापि । तथा अकृते चोद्धारे नैदंयुगीनास्तथाविधधारणादिहीनास्तत्प्रथमतो निर्मुद्रसमुद्रप्रतरणप्रयासमुररीक्रियेरन् । अभ्यस्तग्रन्थतया अवगतपदार्थतत्त्वतत्प्रतिपादनपद्धतयश्च सुखमवतीर्युर्धारणादिसमुल्लसितमानसाश्च विशेषतरमुपयुक्ताः स्युः तरणविततव्यायामितनरागाधसमुद्रतीर्थतरणवत् । एवं श्रुताऽव्युच्छेदमभिधाय पूर्वपक्षानुक्तश्रुतव्यवच्छेदाख्यं दूषणं समाहितम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अथोद्धारे फलं दर्शयन्नाह–'तद्देसदंसण' त्ति । अपरिमित-द्धिमद्गणभृत्कर्मोदययुग्–श्रीमद्गणधारिप्रणीतस्य प्रवचनस्य देशोऽवयवः । नहि कोपि व्यक्तिकरमन्तरेण दर्शयति समग्रश्रुत-सर्वस्वम् । यद्वा–न तेषामपि तत्सामर्थ्यं लघुग्रन्थेन तादृशाधि-कारविततने, सम्भवति चैतस्मिन् सूत्रस्य सूत्रतोच्छेदापत्तेः । अत एवावोचन् वाचकचक्रचूडामणयः–'कः शक्तः प्रत्यासं जिनवचन-महोदधेः कर्त्तुं' (तत्त्वार्थं) प्रत्यासमिति सङ्ग्रहं–तमेवार्थं सूत्रगत-शब्दाल्पशब्देनाभिधातुमित्यर्थः । इति सुष्ठूक्तं–'तद्देश' इति । तस्य दर्शनं–वार्त्तमानिकनरनिकायस्य प्रतिपादनं, तस्मात् । न च वाक्यं वाच्यं यदुत-प्रकरणादिनैव शब्दशक्तिस्मृतेर्भिन्नप्रकरणदर्शनजनित-भिन्नशक्तिस्मृत्याऽनर्थावाप्तिः सुतरां अभिप्रेतादन्यत्र शक्तिग्रहाद्, भवत्येव सीताशब्दसमभिव्याहृतरामशब्दस्य दाशरथिरामशक्यत्वे-ऽपि भार्गवशब्दसहचरितेन तेनैव विरोधात् परशुरामविशेष्यक-बोधोत्पादकतेति नार्थोऽनेन देशदर्शनेनापीति । शब्दस्य तथाविधे स्वभावे सत्यप्यवगततत्त्वैर्यथास्थानमेव नियोगाद् । नहि स एवार्थोऽ-न्यथाभिप्रेतुं व्युत्पादयितुं वा न शक्यते तथा व्युत्पादनाभावेऽपि । किञ्च–जिनवचनस्य त्वेकस्यापि यथार्हमवबुद्धस्य सामायिकनि-र्वाणपदादिवद् निःश्रेयसकारित्वात् तद्देशदर्शनं यथार्हतयाऽनल्पस-त्त्वसत्त्वानल्पातिशयकरमेवेति 'ग्राह्यं धार्यं वाच्यं च' (तत्त्वार्थ०) व्यासतः समासतोऽपि । न चैतत् स्वमनीषिकोट्टङ्कितं टङ्कनं, यदभ्यधायि पूज्यैः–'श्रूयन्ते चानन्ताः सामायिकमात्रपदसिद्धाः' । (तत्त्वार्थ०) अन्यत्रापि निर्वाणपदमप्येकं,भाव्यते यन्मुहुर्मुहुः । तदेव ज्ञानमुत्कृष्टं' (ज्ञानसार०) मित्यादि । 'कोउगपवित्ती' ति । अल्पे तावदेतावद् रहस्यं, महति तु तर्हि कीदृशं तद् भविष्यतीति कौतुकाद् भवत्येव श्रुते प्रवृत्तिर्न तु तदवज्ञा, वर्णिकाग्रहणात् समुदायग्रहण-प्रवृत्तिवत् । अनुभवसिद्धं चेदं वर्णिकादर्शनतः समग्रग्रहणोत्सुकता,

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सति तद्दर्शने आनन्दोत्कर्षे । सम्भवति चानधिगततथाविधानल्प-ग्रन्थानामल्पग्रन्थेन महतीं व्युत्पत्तिमुपलभ्यागाधग्रन्थरत्नाकररत्न-समीहया बुद्धियानेनाऽतिनिविडेन तत्रापि परिपूर्णप्रज्ञापनीयार्थ-प्रज्ञापनपटुनि श्रुते करोत्यवगाहनम् । तन्न तद्देशदर्शनमयौक्तिकं, किन्तु सुतरां बालादीनामुपकारायेति निर्जरायै स्वस्याऽन्येषां च । न चैवमाशातनाकणोऽप्युद्धारकस्याधिकाराणां, किन्तु स्तवनादिक-रणवत् साहाय्यकर्त्तृवद्वाऽत्यदभ्रोदर्कसमागमः । तथाच तदर्थिनामिदं कर्त्तव्यम् । नहि यो यदर्थी स तदुपायेऽलसः स्याद् । भव्यानां तत्त-च्छ्रुतोदीरितार्थबोधनेनानल्पार्थरत्नरोहणाचलजिनमहोदध्यवगा-हनार्थिनश्च सूरय इति योयुजीत्येव तेषामयमायासः स्वपरानु-ग्रहनिपुणः ॥७॥

एवमुद्धारस्य कर्तव्यतां प्रतिपाद्यापि पूर्वपक्षगूढाभिप्राय-मुद्घट्टयन्नाह–

इक्को उण इह दोसो जं जायइ खलजणस्स पीडत्ति ।
तहवि पयट्टो इत्थं दट्ठुं सुयणाण संतोसं ॥८॥

एक एव, नान्यः कश्चन वक्ष्यमाणलक्षणाद् । 'पुन'रसूयोद्भा-वने। श्रूयतां तावत् सभ्याः तत्त्वपरीक्षाकषपट्टा यदुत-उपक्रम्यमाणे प्रस्तुतशास्त्रेऽयं वादी महापुरुषाणामाशातनापदेशेन तावत् प्रत्यति-ष्ठत यावत् केनाप्यंशेन गूढाभिप्रायिककार्यसिद्धिसम्भवो नास-म्भवाघ्रातो, दृष्ट्वा तु तं तथाविधं मलिनास्यतया गूढाभिप्रायं सर्वेषामाविष्करोतीङ्गिताकारैरिदमत्र गूढतत्त्वं, यत् केनापि क्वचिदपि दुर्गमे शङ्कोद्भवो विहितस्तत्प्रतिकृतिश्च चेद्विहिता, तथापि न चेत् पर्यनुयोजकस्य स्वास्थ्यं, न च तत्रापि सन्देहोद्भवः, केवलं विच्छायवदनेन पलायनेच्छादर्शकनेत्रविभ्रमस्तदा स्पष्टं ज्ञायते-यन्नैष तत्त्वाधिजिगांसुतयाऽऽरेकादि व्यधात् किन्तु परोत्कर्ष-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्वापकर्षासहिष्णुतयाऽन्यानज्ञाततत्त्वान् विप्रतारयितुम् । एष समग्रोऽपि समाचारः पूर्वपक्षिहृद्गत उपलक्षितोऽपि ग्रन्थान्तभवविरहपदयोजनलब्धत्रिदशगणविततवचनव्रातावबोधितभवविरहतावित्त-श्रीहरिभद्रसूरिभिर्नैतावन्तं कालमुद्घाटितः,तादृशानामपि यावदस्ति बोधकणसम्भवोऽपि तावत्तेऽनुवर्त्तनीया एव कृपाकूपारैः, पश्चादपि न ते निन्द्याः, यदा ते वितण्डाशून्या अजात्यादिवचनाः स्युः न चायं तथेति विनश्यमानापरभव्योद्दिधीर्षया प्रकटीचक्रुस्तद्दौर्जन्यं, पुनःशब्देन काक्वोपलभ्यत एवेदृशस्थले एतादृशोऽर्थ एतादृक् शब्देनेत्यलं पापानां कथया । संस्कारपरावर्तसम्भवात् । प्रकृतमनुगम्यते–इह मन्दमतिविबोधनार्थं क्रियमाणे आगमानुसारादुद्धारे दोषः प्रत्यपायजनकोऽपि शास्त्रप्रणेतुरीर्ष्यालूनां कौशिकानामिव भास्करोऽपायहेतुः । असूयादोषाघ्रातास्ते न स्वयं समर्थाः शास्त्राम्भोधिप्रवेशे,न चाभिमानाद्यपरिमितोन्मत्तताकारणाऽऽविलतयोद्धृतं बहुमन्यन्ते तत्रोद्यमं च कुर्वन्ति स्वावबोधायापि, केवलं दन्दह्यन्ते परोत्कर्षोद्वीक्षणेनेति तेषां स्वकल्पनादुष्टमनोविकारमात्रजनितदुर्गदुर्गतिगमनार्हाभीष्टविघातानिष्टोत्पादककर्मकारणताख्य एव दोषोऽत्राधिकृतश्चारिसञ्जीवनीचारहितैषिणा भावनाबोधाक्रान्तहृदयेन सूरिणा । ज्ञाप्यते चानेन यदुत–सूरिर्विचारनिम्नगापत्यवगाढ एव ग्रन्थकरणकाले तादृशानामपि अपिहितहितविधाने दोषपोषपेषणे । न च तेषां तथाविधातिनिष्ठुरस्वभावाच्छक्ये विधातुमिति दोषवत्ताऽत्राऽऽचचक्षे । अन्यथा दिवान्धानामन्धत्वापत्तिर्न दिनकरोदये दुष्टताधायिनी । तमेव दोषं निर्दिदिक्षन्नाह–'ज'मित्यादि । यत् अव्ययशब्दत्वात्, येति सामान्यनिर्देशेन लक्षयत्याचार्यो-यदि सापि कथञ्चिदुच्छेद्या चेदुच्छिन्द्यां, न चैषा ईदृशीति । यद्वा-यदिति क्रियाविशेषणम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तथा च नपुंसकद्वितीयेयम् । यद्वा-पूर्वप्रक्रान्तैकदोषदुष्टतां व्याचक्षाणो हेतुमाह-यद्-यस्मात् कारणात् जायते-उत्पद्यते, अवश्यंभावज्ञापनायैवं प्रयोगः । दुर्जनस्वभाव एवायं-यत् किमपि कार्यं केनापि क्रियमाणं प्रेक्ष्यातिहिमदग्धव्रततिरिव म्लानास्य एव स्यात् । न च तत्र कोऽपि प्रतिकारः । न हि यूकाभिया वासःपरिधानपरिहृतिं कुर्वन्ति कदापि कलितकलनीयकलावद्धृदयाः सहृदया इति न्यायात् तदुपेक्षैव योग्येति पर्यवसिष्यति । 'खलजनस्ये' ति । खलति-दुर्गतिदुर्गदौर्गत्यद्वाराऽनुकूलकर्माध्वनि गच्छति, स्खलति कादाचित्कादपि प्रसङ्गप्राप्तात् सज्जनमार्गप्रशंसादिवर्त्मन इति वा खलः-दोषैकदृष्टिश्चालनीवद् गुणपिष्टोज्जिहानपूर्वकल्पितदोषकर्कराऽऽदायी, स चासौ जनश्च खलजनस्तस्य । खलत्वं हि व्यवच्छेदकं धान्यैकीकरणभूमेरपि खलशब्दवाच्यत्वेन, जनानामनेकविधताया अनुभवसिद्धत्वाच्च सम्भवव्यभिचारसम्भवेन व्यवच्छेद्यव्यवच्छेदकभाव इति सुस्थता समासस्य । अतिदुष्टताज्ञापनाय च सत्यपि विशिष्टे खलपदे नीचक्रूरादिदोषविशिष्टार्थवाचके 'पिशुनः सूचको नीचो, द्विजिह्वो मत्सरी खल' (अभिधानचिन्तामणि) इति कोशवाक्यात् विशेष्य पृथक् प्रयोगः । यद्वा-जनशब्दयोजनेन वक्रोक्त्या तस्य जनस्वभावरहितत्वं ज्ञापयन् पशुताऽलाभेन तस्य दैवमुपलभते । न चैवमनौचित्यमीदृशानां, यदाहुश्चौलुक्यचूडामणि–श्रीकुमारपालाभ्यर्चिताङ्घ्रियुगलाः श्रीहेमसूरिपादाः–

अनेडमूका भूयासुस्तेषां ये त्वयि मत्सरः ।
शुभोदर्काय वैकल्य-मपि पापेषु कर्मसु ।।१।। (वीतराग स्तव०)

प्रोचिवांसश्च प्रोद्यत्प्रभावप्रभाप्रभापतयः श्रीदिवाकरपादा अपि–

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'उन्मार्गयायिषु हि शीघ्रगतिर्य एव, नश्यत्यसौ लघुतरं न मृदुप्रयातः ।' अलं दुर्जनदुर्गुणदौहार्देनेति । 'पीड' त्ति । पीडा अत्र मानसिकी वाचिकी वा । यद्वा–गाढतरगुणगणावगणनगरिष्ठ-सामर्थ्यासुकृतप्रचयप्रगुणनरूपैवाऽत्र पीडा ग्राह्या । अथवा–कायि-क्यप्यसहिष्णुत्वात् परोपकारप्रवणाप्राकृतप्रभावत्पुरुषप्रभावाणां करोत्येवासौ शिरउरःस्फोटनस्फाटनादि वराक इति प्रच्छन्नपाप-पराभूतात्मन आत्मदुर्गुणाविर्भावशङ्कया स्यादेव तथाविधा पीडा । न च तथापि सत्पथोपदेशप्रवृत्तैः परावर्त्तनीयं मनागपि महन्म-हिमवद्वाक्यं अतनुक्लेशावासवसनविभ्रान्तैः–

'रुसउ वा परो वा मा विसं वा परियत्तउ ।
भासियव्वा हिया भासा सपक्खगुणकारिया' ॥१॥*

इत्यागमवचनात् । इतिना पूर्वोक्तखलजनपीडानान्तरीयकतैव सुकृतसमुदायसङ्ग्रहस्य ध्वन्यते । यद्वा–पूर्वोक्तवदितरदोषाभावं ख्यापयित्वा कर्त्तव्यतानिर्विघ्नत्वमादिशति । न च वात्ययेव मेरुराचार्यचेतस्तादृशकोलाहलैरवाप्नोति कम्पमिति स्वप्रवृत्ति-मविकम्पामाविर्भावयति–'तहवी' त्यादिना । यद्वा–परमपदपथ-प्रवृत्तेन परमपुरुषप्रवचनानुसारिणाऽऽयव्ययतुलनापूर्विका प्रवृत्तिः कार्येति यथाकथञ्चिद् भाविनं दोषमुपदर्श्य माहान्तं गुणं स्वप्रवृत्ति-हेतुं दर्शयन्नाह–'तहवी' त्यादि । तथापि पूर्वोक्तावश्यंभाविदोष-दर्शिखलजनपीडालक्षणदोषसद्भावेऽपि प्रवृत्तो विहायाऽऽन्दोलित-चित्ततां श्रुतसागरसमुत्तरणतरणीकल्पैतत्प्रकरणे आयबहुलतां विभाव्याऽऽरब्धा प्रवृत्तिः । 'इहे'ति । प्रस्तुतापूर्वनिश्चयप्रचुरे ग्रन्थे आयबहुलतादर्शनायाह–'सज्जनानां' सन्तः ग्रामरागमूर्छनादि-

* रुष्यतु वा परो मा वा विषं वा पर्याददतु ।
भाषितव्या हिता भाषा स्वपक्षगुणकारिका ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वैदग्ध्यवतो युवतियुतस्य या रतिः किन्नरगेयश्रवणे तदधिकरतिमत्त्वाद् जिनवचनामृतपाने । अत एव श्रेयःसमाचारपापपरिहारस्वरूपेष्टफलावाप्तेः । ते च ते जनाश्च सज्जनाः । यद्वा–गुणग्रहणगरिष्ठमाहात्म्याः सज्जनाः । यदवादि–

कोऽत्र निमित्तं वक्ष्यति निसर्गमतिसुनिपुणोऽपि वाद्यन्यद् ।
दोषमलिनेऽपि सन्तो यद्गुणसारग्रहणदक्षा' ॥१॥ इत्यादि ।

अत्रापि पूर्ववद् गुणगणवदतिशयितमहिमानं दर्शयति युग्माभिधानेन । तेषां, किमित्याह–दृष्ट्वा–'नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मन' इतिवाक्यात्तेषां तथाप्रकाराह्लादाद्यन्यथानुपपन्ननेत्रादिविकारैरनुमाय । यद्वा–तत्पठनश्रवणाकाङ्क्षादिभिस्तेषां तदनुमाय, किमित्याह–'अतितोषं' अतिशयितं–वचनगोचरातीतं तोषमानन्दं, भवत्येवातिकष्टसाध्यं कार्यमत्यल्पप्रयत्नसिद्धं दृष्ट्वा सतामानन्दः, प्रवर्त्तन्ते चापि तत्र तथाविधास्ते, महानुपकारश्चैवं तेषां तत्सिद्धेः, न चास्ति सतामृते परोपकारेण कश्चित् सम्पादनीयः कार्यलेशोऽनित्यासारमनुजजीवितव्येन, सम्पद्यते चासावेव प्रवृत्तौ पूर्वोक्तप्रकारेणेति न्याय्यैव प्रवृत्तिः प्रकरणसौधसूत्रधारश्रीमद्धरिभद्रसूरेः प्रस्तुतेऽत्युपयोगिनि प्रकरणे । अनेन प्रवृत्तिबीजं परेषां कर्त्तव्यं चोक्तम् ।

ननु नूतननव्यग्रन्थग्रथने सज्जनसन्तोषसद्भावेन पूर्वोक्तयुक्त्याऽऽयबहुलतायामपि दुर्जनप्रचुरत्वाद् लोकस्य तेषामपायसम्भवाद् व्ययबहुलतापि ज्ञायत एवेति नायं यत्नः फलेग्रहिस्तत्रभवतां भवतामिति द्वापरद्वारमायातं वीक्ष्य वादिनं व्ययात्ययप्रत्ययं बम्भणिष्यन् व्ययरहितत्वं दृढयन् दृढानन्तज्ञान–प्रज्ञापितप्रवचनेनाऽऽह–यद्वा-सज्जनजनानन्दातिशयफलं रसायनलेशेनापि गदगणो-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पशमवद् दर्शयन्नाऽऽह दुर्जनदुर्बुद्ध्यपगमं–

तत्तो वि य जं कुसलं ततो तेसिंपि होहिइ न पीडा ।
सुद्धासया पवित्ती सत्थे निद्दोसिया भणिया ॥१॥

'ततोऽपि च' पूर्वोक्तप्रकारेण प्रस्तूयमानप्रकरणाज्जायमान-सज्जनमनःसन्तोषप्राचुर्यात् उपलक्षणत्वात् हेयोपादेयादिज्ञानोद्भूतहानोपादानादिप्रवृत्तिप्रफुल्लातितमशुभाध्यवसायस्ववशीकृताऽनेकाप्राप्यगुणगणात् । अपिना ग्रन्थार्थयोर्वीक्ष्यातिशयितां फलवत्तां कदाचिदुपशाम्येत्तेषामप्रतीकार्यापि दिक्चक्रवालप्रपूरकस्तनयित्नुस्तनयित्नवाऽऽसारविध्यातदावानलज्वालेव अनेकविधापि पीडा प्रथममेवेति नात्ययसम्भवः । अस्ति चैवमपि न्यायवाक्यं-'गुणग्राही जनः प्रान्ते' इति । न जातस्तथापि ततः तेषामानन्दश्चेद्-अवश्यम्भाव्यनेन सज्जनमनःप्रमोददर्शनेन 'परिणामे न को दक्ष' इति वाक्यात् । चकारेणोभयोर्व्ययव्ययनतत्परतां वितानयति । यद्वा-'अपिचे'त्यव्ययमखण्डमेव कारणाभ्युच्चये । न तावद् दुर्जनमनःपीडा ग्रन्थारम्भविघ्नविधानपट्वी, परं सापि न स्थास्यत्येवेतिदर्शनाय । किमित्याह–'यत्कुशलं' यच्छब्देन सन्मार्गवितीर्णत्यंक्तदौर्जन्यानां सज्जनानां फलातिशयो न केनापि कल्पान्तकालवातप्रकरोल्लसदम्बुपूराम्बुधिप्रान्तायातरत्नराशिवत् प्रत्यक्षोऽपि निरूनयितुं शक्यते इत्यनल्पगुणगणसाधनतां साधयत्याचार्योऽस्य नकरणस्य । कुशलं–अनवद्यं कर्म । न च वाच्यं दुःखद्वारा भवभ्रमणकारकपापौघवत् सुखद्वाराऽनेकभवभ्रान्तिहेतुरिति सुकृतनपि नेष्टसाधनतया प्रवृत्तिकारणमिति । द्विविधत्वाद् धर्मस्य नज्ज्ञानयोगेन भवक्षय एव क्रियते, नाल्पोपि बन्धो, न चेदयमेवंविधो, मोक्षाभाव एव स्यात्, परं आरम्भकस्वभावत्वाद्दोषाणां, न तावत् प्रादुर्भवेत् मोक्षकारणिकी शैलेशी कैवल्यादिप्राप्तिर्वा ताव-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दवश्यम्भाविनः कर्मबन्धस्य कुशलानुबन्धितामनवद्यतां च क्रियादित्युपदिश्यते उपदेशविधिनिपुणेन निपुणेन 'सविशेषणे ही' तिन्यायादनवद्यतायामेव विश्रामाद् । बन्धस्तु अनूद्यते,न विधीयते न वा प्रशस्यते । यद्वाऽस्तु सोऽपि प्रशंसास्पदं, क्षयोपशमजन्यदानादि-प्रादुर्भूतपुण्यप्रचयप्राप्तवैरस्यमार्गविघातकपरिवारर्द्धिरूपानुत्तरा-मरत्वादिवत्, तीर्थकृत्त्ववद्वा कुशलपदवाच्यमोक्षानुसारित्वाद् । दुःखस्याप्येवंविधत्वसम्भवश्चेदन्यदेतत्, प्रायिकं व्यवहारानुगतमेव च व्याख्यायतेऽत्र । यद्वा-ततः सज्जनसन्तोषादपि च यत् कुशलं विवक्षासद्भावेऽपि वचनागोचरातीतं नत्वे च मोक्षमार्गादिधितोपदेशोऽ-स्ति जगति कृत्स्नेऽस्मिन्' (तत्त्वार्थ०) इतिवाक्यात् परमपदपथ-प्रगुणप्रवृत्तिभावादवश्यम्भावि तथाविधं कुशलं कुशलानुबन्धि ग्रन्थ-कारकस्य । अत्र पक्षेऽपिना 'वक्तुस्त्वेकान्ततो भवति' अत्र धर्म इति शेष इति परममुनिवचनप्रामाण्याद् ग्रन्थारम्भकाले शुभा-ध्यवसायाद् ग्रन्थकरणाऽनेहसि चोपकारादिधिया अस्त्येव कुशलप्राप्तिः तथाप्युपकारसम्भवे च कुशलप्राप्तिर्महतीयमिति-ज्ञाप्यते । ततः किमित्याह- 'तत्तो' इत्यादिना । उद्धृतप्रकरणजात-सज्जनातिसन्तोषप्रभवात् कुशलात् । यद्वा—लघुप्रयत्नलभ्यग्रन्थार्थ-बोधप्रादुर्भूतोपादेयादियोग्यप्रवृत्त्या झटिति कुशलानुष्ठानाबाप्ति-र्निर्मलता चात्मपरिणतेः सविशेषं या भवति, तद्रूपात् कतिचिद्दु-र्जनत्यक्तदौर्जन्यजातसुजनताप्रभवकुशलाद्वा तेषामपि सामान्येन खलानामवशिष्टानां वा अपिना सज्जनजनगुणोत्पत्तेः कतिचिद्-दुर्जनानां सौविहित्याच्च फलवत्त्वेन आयबहुलत्वमेवोद्धारक्रियाया यद्यप्यस्ति, तथापि प्रोच्यमानवचनज्ञापितकुशलप्रभावेनापहृते दुर्जनातिकृच्छ्रे कष्टे एकान्तभद्रभावोद्भवनभावुकतैव ज्ञेयेति दर्श-यति। यद्वा-भिन्नक्रमोऽपिः । तेन तुल्याऽऽयव्ययताकारिका पीडाऽपि

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दुर्जनानां न भविष्यति पूर्वोक्तयुक्त्येत्येवं पीडाशब्दाऽग्रे योजनीयोऽपिः । तेषामपि किमित्याह-'होहिइ न पीड'त्ति । । न भविष्यति-न भाविनी । भविष्यत्प्रयोगेण प्रस्फुटयति प्रायोऽयं यदुत-तथाविधातिनिबिडकर्मता न चेत्तेषामधुनैव व्यथा समस्ताऽस्तमेष्यति । यदि च न ते तथाविधास्तर्हि भविष्यति तु भविष्यत्येव तेषामपायापगमः समग्रः । न चाऽऽपातमात्रेक्षिणस्तत्त्वेक्षिणो येन भविष्यत्पीडापरिहारसम्भवे नोद्यच्छेयुः सज्जनसदुपकारसाक्षाद्दर्शनेऽपि प्रकरणकरणे । न चैतदसम्भव्याशंसनं, यत्तथासम्भवति बोभूयेरन् सर्वेऽपि सत्त्वाः समग्राऽसुभृत्सुखसाधनसावधानान्तःकरणसमस्तार्थसार्थसाक्षात्कारकश्रीस्याद्वाद्यवर्ण्यगुणशासनशासनश्रीशासनाधीश्वरैश्वर्येण मुक्तिभाजः, तन्नैतद्युक्तमितिवाच्यम् । यद्यपि न भवति कर्मसङ्क्रमोऽन्येषामात्मनः सकाशादन्यस्मिन्नात्मनि, चेत्सङ्क्रामेयुः कर्माणि क्षपकश्रेण्यारूढ एक एव महात्मा क्षपयेत् सर्वेषामखिलकर्माणि अनादिकालीनान्यपि समग्रेन्धनदाहकदवाग्निवत् । न च तत्सङ्क्रमोऽस्तीति । सर्वैः स्वकृतं शुभाशुभं वेद्यमेव, तथापि भवत्येव वैरशमनाय सोपक्रमवेदनीयाद्युपशान्तये सम्यक्त्वादिलाभाय च लब्धलक्ष्यसुविहितजनविहितविध्यनुष्ठानप्रभवप्रभूतपरमपदानुकूलकुशलोपचयः । यथा पार्श्वसेवितपार्श्व-श्रीपार्श्वसार्वाभयप्रदानुष्ठानं मेघमालिनि, उपसर्गोपचयचेतनसादरसुराधमसङ्गम-शूलपाणि-कटपूतनादीनां वा वैरोपशमादिश्चरमभवीयवपुर्धारकाऽचरमतीर्थकृत्सामान्यानुष्ठानं सिद्धिसीमन्तिनीशृङ्गारायमाणकेवलकलाकल्पकं निरीक्ष्य, अथवा चिरप्रारूढकल्पनातिगवैरावासालब्धधर्मामृतस्य कर्षुकस्य देवशर्मणश्च श्रीचरमतीर्थकरमाहात्म्यपूरपूरितवचनश्रवणनटालिकसर्वज्ञत्वाहङ्कृतिलब्धयथार्थपदार्थावगमप्रणीतप्रकृष्टातिशयद्वादशाङ्गीद्राधीयोयशःशरीरानेकामर्षौषध्यादिलब्धिश्रीकुशे-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

शयकल्पदीक्षामात्रदानकेवलसत्यङ्कारकरणप्रवणकरुणाकरभगव-च्छ्रीगौतमस्वामिवचनानुगक्रियाकलापाकलनाद् ननाशैव पीडा काकनाशम् । इति नोक्तं किञ्चिदपि अतिशयोक्तियुक्तमभि-युक्तैः 'यत्सज्जनकुशलाद् दुर्जनानामपि भविष्यति पीडानाश' इति । सम्भवत्येवंविधे दुर्जनानां पीडाया अपहारे, यदि कदाचिन्न भवि-ष्यति तथाविधानां केषाञ्चिद् निकाचितकर्माविकचितचैतन्यानां स,तदा दुरनुबन्धोद्धारोऽयं समुद्धारः प्रकरणस्येति चेदाह- 'सुद्धा-सये' त्यादिना समाधानविधिं समाहितान्तःकरणेन । शुद्धः-परा-पकर्षाऽऽत्मोत्कर्ष- ख्याति - पूजा - परिवाराद्याशंसारहितः, आशयो-मनःपरिणामोऽध्यवसाय इतियावत् शुद्धाशयः, तस्मात् 'गम्ययपः' कर्माधारे' (सिद्धहेम० २।२।७४) इतिपञ्चमीविधानात्, निर्मला-ध्यवसायप्रयोज्या प्रवृत्तिः उद्धारदेशनाप्रभावनादिका क्रिया । यद्वा-शुद्धः आशयो यस्यां सा शुद्धाशया । पूर्वं स्वपरोपकारबुद्धिम-त्त्वात् मध्येऽनाशंसादेः अन्ते आत्मानुत्कर्षादेः प्रवृत्तेः शुद्धाशयत्वम् । तादृशी प्रवृत्तिर्निर्दोषिका ।भावेऽपि दुर्जनानां स्वकपोलकल्पनाकल्पि-ताकल्पविचारश्रेण्युद्भावितपीडालक्षणदोषस्य, पूर्वोक्ता प्रवृत्तिर्न तेन दुष्टा, दुष्टादुष्टत्वनिबन्धनत्वादध्यवसायस्यैव । दृष्टश्चायं न्यायः शास्त्रे यदुत-ईर्यासमितसाधुसङ्क्रामितक्रमन्यग्भागाऽऽगता-ङ्गिविनाशे नाप्रमत्तत्वात्तस्य सूक्ष्मोपि बन्धः । तदेवमत्रापि भावनीयं भावद्भिर्भवद्भिः । न च शुभाशयस्य निर्दोषताऽत्रैव विश्राम्यति, यावदसत्पदार्थश्रद्धानेऽपि न व्याहतिः सम्यग्दर्शनस्य स्यात्, स्याच्चेत् शुद्धाशयवतो गुरुभिस्तथोपदिष्टमलक्ष्यमाणकदाग्रहैः उपदिष्टं वा यथार्थमनाभोगतोऽन्यथा श्रद्धावतोऽपि । यद्वा-अलमन्येन यावद-शेषजन्तुजीवातुकल्पदेशनाविधानपटुतीर्थकृतामपि देशना भवत्येव-असमशूलायाऽभव्यत्वरुजार्दितचेतनानामभव्यानाम् । यदाहुः पूज्या

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एवान्यत्र-अभव्येषु च भूतार्था, यदसौ नोपपद्यते, (अष्टके) यद्वा-वाग्रसायनं सार्वमरुजमभयङ्करमपि कुतीर्थिकानां कुदृष्टीनां वा भवत्येव कुधर्माय । यदूचुश्चतुश्चत्वारिंशदधिकचतुर्दशशतीप्रकरणविश्वविधानलब्धहरिशतगुणप्रभावप्रख्याताः पूज्या-'अन्यथा देशनाप्यलं कुधर्मादिनिमित्तत्वात् दोषायैव प्रसज्यते' (अष्टके) इति सुष्ठूक्तं शुद्धाशया प्रवृत्तिर्निर्दोषिका । न चैतत् स्वमनीषिकामात्रप्रयुक्तयुक्तिप्राबल्योज्जृम्भितम्, तथात्वे हि हेतुवाद एवैकान्तेनावलम्बितः स्यात् । न चायं सर्वासुखनिवृत्तिर्निर्वृतिमार्ग इत्याह-'भणिता' शास्त्रे-हितोपदेशादिना निर्णीतसर्ववित्प्रभवे सिद्धान्ते प्रतिपादिता युक्त्या सविस्तरं निरूपिता । अत एव च प्रमत्तस्याभावेऽपि कस्यचिद् हिंसाया जन्तोः प्रबल एव कर्मबन्धः समाम्नातः, अविरतेरपि चेदमेव साम्राज्यम् । शुद्धाशयप्रवृत्तेर्निर्दोषतायां । यद्वा-उत्तरार्धमन्यथैव व्याख्येयम् यदर्वाग्दर्शिभिर्भवद्भिरुच्यमानं प्रकरणं कदाचिदन्यथाभूतमर्थं प्रतिपादयिष्यति, न च छद्मस्थानामसम्भव एतस्य । यदाहुराचार्यमिश्राः– 'नहि नामाऽनाभोगश्छद्मस्थस्येह कस्यचिन्नास्ति । ज्ञानावरणीयं हि ज्ञानावरणप्रकृतिकर्म' ॥१॥ इति १ आयार पन्नत्तिधरं दिट्ठिवायमहीज्जगं ।

वायविक्खलियं नच्चा न तं उवहसे मुणी' ॥ १ ॥ इति चोक्तेः तथाविधस्याप्यवोचन्नेव वाक्स्खलनसम्भवम् । सुतरां तु भवादृशां पूर्वगतकतिचिन्मात्रतारतारकदर्शनमात्रपटुलोचनानां तत्रभवतां शुभवतां भवतामित्यारेकातिरेकसम्भवे आह-शुद्धाशया प्रवृत्तिर्निर्दोषिकैव शास्त्रे भणितेति । * यद्यपि उस्सुत्तभासगाणं

---

१ आचारप्रज्ञप्तिधरं दृष्टिवादमधीयानं
वाग्विस्खलितं ज्ञात्वा न तमुपहसेन्मुनिः ॥

* उत्सूत्रभाषकानां बोधिनाश अनन्तसंसारः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

बोहिनाशो अणंतसंसारो' त्ति वाक्यात् पर्यटत्येव अनाद्यनवदग्रे संसारकान्तारेऽशरणा नष्टबोधिका गोष्ठामाहिलादिवद् उत्सूत्र-भाषकाः तथाप्यभिनिवेशाद्युद्भूतस्यैव तस्य तथाफलत्वम् । अनाभोगतः सहसात्काराद्वा जातस्य तु तस्य मिथ्यादुष्कृतनिकृति-मात्रपर्यवसानाद् । अन्यथा भगवतो गौतमस्वामिनोऽपि न चरम-शरीरिता चरमशरीरवर्णनीया सम्भावनापथमियृयात् । भवत्याऽ-नाग्रहादिना च तिरस्कृतत्वादेतद्दोषस्य । अत एव 'विश्रृंखलापि वाग्वृत्तिः, श्रद्दधानस्य शोभत' (वीतरागस्तवः) इति प्रघोषो महर्षिपरम्परया । प्रतिक्रमणसूत्रेऽपि प्रतिदिनपापप्रक्षालनप्रवणेऽपि 'उस्सुत्तो उम्मग्गो' इत्यादिना अनाभोगविधानस्यैव तथा प्राय-श्चित्तोपदेशः । अलमतिप्रसङ्गेन ॥९॥

ननु यद्यपि शास्त्रे शुद्धाशयप्रभवप्रवृत्तेर्निर्दोषताऽऽम्नाता आम्नायैदम्पर्यवेदिभिरभियुक्तैः, तथापि तत् 'सिद्धस्य गतिश्चि-न्तनीये'ति न्यायात् जातकथञ्चिद्दोषभावस्य पुनर्विध्याद्युद्यमो-ल्लासाय 'जिनोक्तमिति सद्भक्त्या, ग्रहणे द्रव्यतोऽप्यदः । बाध्यमानं भवेद्भावप्रत्याख्यानस्य कारण' ॥१॥ (अष्टके) मित्यादिवत् ननु प्रथमतः प्रवृत्त्यर्थमिति चेदाह—

इहरा छउमत्थेणं पढमं न कयाइ कुसलमग्गंमि ।
इत्थं पयट्टियव्वं सम्मंति कयं पसंगेणं ॥ १० ॥

इतरथा-उत्सूत्रदोषसम्भावनामात्रेण सन्मार्गाऽप्रवृत्तौ, यद्वा— कथञ्चिदनिवर्तमानखलदोषदुष्टतासम्भवेन सन्मार्गप्रवृत्तिप्रति-बन्धकताया न्याय्यत्वे। नहि गरुत्मतां गतं पन्थानं वीक्ष्याऽपरपत-त्रिणा तत्र गमनंन विधेयं, नवा विततच्छदविहङ्गमवर्यस्यापार-विष्णुपदयानमवधार्य विहगेन तथा कार्यं योग्यतामञ्चेत्, येन

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

श्रीमत्तीर्थंकरणशीलस्यावश्यंभाविकेवलस्य श्रीजिनेशितुराचरणमवलम्व्येत अस्माभिः यतो भवेत् प्रथमतो निरतिचारैव प्रवृत्तिः, को वा किमाह-भगवद्भिरेव विहिता पूर्वभवे छद्मस्थैस्तथा प्रवृत्तिर्भविष्यति, निर्विवादं च देशनादिविधानमिति चेतस्यवधार्याह-'छद्मस्थेन'। छादयति स्वभावभूतानप्यात्मगुणानिति छद्म 'छदेरिस्मन्त्रडि' (४।२।३३) ति मन् प्रत्ययः। घातीनि चत्वारि ज्ञानावरणीयादीनि कर्माणि, तत्र तिष्ठतीति छद्मस्थः-अनवाप्तकेवलः पुमानित्यर्थः। यद्वा-छद्मनि-केवलज्ञानावरणावृतेऽपि जीवसूर्ये निर्गता या छाद्मस्थिकज्ञानप्रभा, तत्र तिष्ठति—तन्मात्रोपयुक्तो भवतीति छद्मस्थः तेन। 'प्रथमं' केवलोत्पादादर्वाक्, समूलकाषङ्कषता वा यावन्न खलस्वभावस्य जगति ततःप्राक्, किमित्याह-कदाचिदपि—लभ्यमानायामपि शुद्धचवस्थायां तारतम्येन, आस्तां श्रुतसतत्त्वाविज्ञानदशायाम्। अपिरनुक्तोऽपि गम्योऽध्याहारेण, तस्यापि व्याख्यानाङ्गत्वान्न दोषः। क्वेत्याह-'इत्थं कुसलमग्गंमि'त्ति। इह यद्यपि 'न त्थः' (सि० ८।३।७६) इतिसूत्रेण सूत्रितः सूत्रकारेण सप्तम्यां त्थविधानप्रतिवन्धः, परं त्रबादेशत्थविधानं नानौचित्यमञ्चेत्। इह—प्रस्तुते, विपरिवर्त्तमानत्वादेतदधिकारस्य इदमा प्रत्यक्षवाचिना निर्देशः। 'कुशलमार्गे' कुशलो-मोक्षः, तस्यैव तत्त्वतः कुशलरूपत्वाद् अनन्ताक्षयारुजाचलाव्याबाधकैवल्यादिमयो हि स इति-तस्य मार्गः। धर्मोपदेशप्रकरणोद्धारादिरूपः, तस्यैवाधिकृतत्वात् तस्मिन्। यद्वा-कुशलानाम्—अबाध्यसिद्धान्तप्रतिपादकानां जिनादीनां मार्ग-आचीर्णः पन्था उपदेशादिः तस्मिन्, किमित्याह-'न प्रवर्त्तितव्यं' प्रवृत्तिर्न कार्या। नहि जगत्यपि जगच्चक्षुरस्पृष्टंतमस्तत्या वर्त्म लभते प्रयातुमभ्राङ्गणे। तथाऽत्रापि दुर्जनानभिरुचितं न किमपि सज्जनविधेयं जाघटीति यत् क्रियेत सज्जनैः तदप्रीतिपरिहारपरायणैरपि। न च कदाचनापि बलिभुग्वलक्षत्वा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

शंसया मानसानन्दितमरालग्रहो न कार्य इति । ननु शास्त्रे यदि छद्मस्थानां देशनादिविधानं प्रत्यपादि, प्राप्नोति च तत्कारी परमपदमपि परम्परया, तर्हि तदेव कार्यं कार्याकार्यविचक्षणैरक्षुण्णविश्रमैः सर्वैर्वा मुमुक्षुभिः । करणे च तथा बालादिविचारणं नार्हत्येव अर्हदुदितापि परिषदि वर्ण्यमाना वर्णनालेशमिति चेदाह-'सम्मं'ति । सम्यग्-अविपर्ययेण,तत्प्रकृत्यभिमुक्त्यादि-बालादिज्ञानेन सञ्जाते चोत्सर्गापवाद-तदुभय-भय-वर्णनाद्यनेकप्रकारसूत्रसर्वस्वसेवधिलाभे द्रव्याद्यपेक्षयैव च । अनेन अन्यथा प्रवृत्तस्योत्सूत्रभाषितां सूत्रयति । न चैतत्कल्पनाकल्पितं, यदाहुः प्रकरणकारपादा एव

'पापं खलु देशना परस्थाने उन्मार्गनयनमेतद्भवगहने दारुणविपाक' (षोडशके) मित्यादिना । भाष्यकारा अप्याहुरेतदेव १ 'पगप्पजइणा कहेयव्वो'त्तिवचनेन । अत एव च सत्पथोपदेशिनामपि सागरचन्द्राऽऽचार्याणां श्रीमन्मुनिचन्द्राऽऽचार्यप्रवरभागिनेयानामनन्तसंसारसंसृतिः सूत्रोक्ता सङ्गच्छते । नहि तैरसत्यं देशितं, किन्त्वसमीक्ष्य पर्षदाद्येव केवलमुपदिष्टं, जातश्च श्रोतृणां प्रत्युत विपरिणामः शासनद्वेषश्च । सत्युपाये चाऽप्रमत्तेन शास्त्रार्थोऽवश्यमेव कार्यः प्राप्तुकामेन पारगततां तथा, यथा नाऽन्येषां कुगतिनिमित्तं स्वयं भवतीत्यलं क्षुण्णाचारक्षुण्णात्मभिः प्रसङ्गेनेत्याह सूरिवर्योऽपि- 'कयं पसंगेणं'ति । प्रसङ्गेन अतिकुटिलगतिकर्मपरवन्मनुष्यैर्विवेकवर्जितैर्निष्फलवादविवादरूपेण कृतं-पर्याप्तम् । न खलु उलूकोद्दीप्त्यै दीपनीयं दिननाथेनेति । एतावता सेवितगुरुकुलपरिदृष्टसमयेन स्वशक्तिकुशलानुष्ठानानुष्ठानस्थितिमता पूर्वपुरुषश्रुतातिशयादिनिरीक्षणादिसञ्जाततद्विषयकबहुमानेन श्रुतोद्दिष्टाधिकाराणामुद्धाराय श्रुतोक्तिश्रवणकौतुकोत्पादानुकूलमुद्धरणीयं सम्यक् छद्मस्थेनापीति सिद्धम् । अथ प्रकृतमनुसरन् श्रोतृ-

१ प्रकल्पयतिना कथयितव्यः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पाठकयोः सुखावधारणादिहेतोः प्रत्येकविंशतिकाभिधेयाधिकारनिदर्शनाय अनुयोगद्वारादिवत् क्रममभिधेयं च गाथापञ्चकेनाऽऽह–

अहिगारसूयणा खलु १ लोगानादित्तमेव बोद्धव्वं २ ।
कुलनीइलोगधम्मा ३ सुद्धो वि य चरमपरियट्टो ४ ॥११॥
तव्बीजाइकमो वि य ५ जंतु सम्मत्तमेव पुण चित्ते ६ ।
दाणविही य तओ खलु ७ परमो पूयाविही चेव ॥१२॥
सावगधम्मो य तओ ९ तप्पडिमाओ अ हुंति बोधव्वा १० ।
जइधम्मो इत्तो पुण ११ दुविहा सिक्खा य एयस्स १२॥१३॥
भिक्खाइ विही सुद्धो १३ तयंतराया असुद्धिलग्गंत १४ ।
आलोयणाविहाणं १५ पच्छित्ता सुद्धिभावो य १६॥१४॥
तत्तो जोगविहाणं १७ केवलनाणं च सुपरिसुद्धंति १८।
सिद्धविभत्ती य तहा १९ तेसिं परमं सुहं चेव २०॥१५॥

अत्र व्याख्या- अधिक्रियन्ते-प्रतिपादयितुमिष्यन्ते, हेयज्ञेयोपादेयाः पदार्था एषु इत्यधिकाराः-विशिष्टवस्तुप्रतिपादकग्रन्थभागाः । यद्वा-अधिक्रियन्ते—व्याख्येयतया ग्रन्थे अभिमन्यन्ते इत्यधिकाराग्रन्थप्रतिपाद्या अर्थाः । अत्र कर्मणि, पूर्वत्र च भावे भावाऽकर्त्रो- (सि० ५।३।१८) रिति घञ् । तेषां सूचना-सङ्क्षेपेण शास्त्रानुपूर्वीविन्यासार्थमुद्देशमात्रप्रतिपादनम् । सूच्यते इतिसूचनेति 'णिवेत्त्यासे' त्यादिना भाव एव अनविधानात् । न च -नाऽर्थोऽनेन, यतो ज्ञास्यन्त्येवाध्येतृश्रोत्रादयः पाठ-श्रवणादिनाऽभिधेयार्थम् । अन्यच्च-न प्रथमविंशिकायामुच्यमानं प्रथमविंशिकाभिधेयार्थाभिधानं घटामञ्चतीतिवाच्यम् । अधिकारिदर्शनाय प्रमोदमेदुरत्वाय च श्रद्धालूनां प्रस्तावनाग्रन्थस्यापि मङ्गलादिनिवन्धबन्धुरश्लोकवत् ग्रन्थाङ्गताख्यापनायैतद् । अभिप्रायोऽप्येवमेव सूरेः यद् वक्ष्यत्यग्रे षोडश्यां गाथायां-'एए इहाहिगारा वीस' मित्यादि । विंशिकानां विंशतिरप

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पूर्यत एवमेव । अन्यच्च-न केवलमस्यामेतदधिकारसूचैव किन्तु ग्रन्थान्तःप्रतिपादिताधिकारिज्ञापना तत्फलं तत्साधनान्यपि च प्रतिपादितान्येव । न चाप्रकृतमेतत्, तदन्तरा यथावदधिकारित्वाऽप्राप्तेः । खलुरवधारणे । तेन चास्या अवश्यं कर्तव्यतामाह । नह्यज्ञातसम्बन्ध-प्रयोजनं श्रोतुं प्रवर्तते श्रोतेति ।१।

द्वितीयस्यां (विंशिकायां) लोक्यते-रूप्यरूपिपदार्थप्रत्यक्षकारकैरीक्ष्यते इति लोकः । धर्माऽधर्माऽऽकाश-पुद्गल-जीवलक्षणपञ्चास्तिकायमयः । तस्य न आदिरनादिः तस्य भावोऽनादित्वं, स्वरूपार्थे भावे त्वप्रत्ययः । लोकाऽनादित्वस्योपलक्षणत्वाद् अप्रच्युतिरपि ज्ञेया । न च अनादित्वकथनेन गतार्थेति । विचित्रत्वाद् भावानाम् । केचित् अनाद्यनन्ता जीवादिवत्, केचिच्च साद्यनन्ता यथा सिद्धादयः, केचित्तु सादिसान्ता यथा देवत्वाद्याः, केचित् पुनरनादिसान्ता अतीतकालभव्यत्वादिवदिति ज्ञेयैव उपलक्षणविधया अनवदग्रताऽस्य । एवकारोऽत्र व्यवस्थायाम् । तेन द्रव्यापेक्षयैव अनाद्यन्तताऽस्य, न पर्यायाऽपेक्षया, द्रव्यपर्यायोभयात्मकत्वाद् वस्तुनः ।

नच द्रव्यपर्याययोरभिन्नत्वात् पर्यायनाशेनानित्यता, द्रव्यानाशेन नित्यता वोचिता स्वीकरणीया, लोकस्योभयात्मकत्वात् उभयदोषापत्तिश्चैवं-'प्रत्येकं यो भवेद्दोषो, द्वयोर्भावे कथं न स' इति प्रवादादिति वाच्यम् । कथञ्चिदभेदेऽपि कथञ्चिद्भेदवत्त्वात् । जात्यन्तरात्मकरूपे च नित्यानित्यत्वेन पक्षद्वयाऽऽपतितवज्रदोषलेपः । दृश्यते च घटनाशे घटोत्पादे वा मृत्तिकाया अवस्थितिः । परैरपि परमाणुनित्यत्वादिना स्वीकृतैव द्रव्यत्वेन नित्यता, कार्यानित्यत्ववादेन पर्यायाणामनित्यता च, स्वीकृतैव च शकुन्तपोतन्यायेन स्याद्वादमुद्रा । न च स्याद्वादे अनिश्चितज्ञानान्न सम्यक्पदार्थनिश्चयः स्यादिति । स्याद्वादस्य पितृपुत्राद्यपेक्षया पुत्रपितृत्वादि-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वद् आपेक्षिकनिश्चयाभिधानपरत्वात् । न च निश्चयाभिधाने प्रतिज्ञाविरोधो, यतस्तस्यापि तद्भवाद्यपेक्षयैव तथात्वात् । अभिमतं च शास्त्रेऽपि * 'दव्वट्ठयाए सिय सासये' त्याद्यभिधानेन । भेदाभेदयोर्व्यवहारादि च अर्पितानर्पितसिद्धया स्यादेव इत्यलं प्रसङ्गेन एकान्ताभ्यासादेव अनेकान्तसुधादीधितिदर्शनेऽप्येकान्तद्विष्टेन दुर्जनेन सह । बोद्धव्यं-ज्ञातव्यं, युक्त्याऽऽगमादिना, न तु मातृमोदकवद् यथा तथा परिग्राह्यम्, श्रद्धा-दृष्टिरागयोरेतावानेव भेदः,यदुत - सत्पदादिना अवधार्य पदार्थान् यथार्थतया श्रद्दधाति आगमिकाँश्चाप्तोक्ततया श्रद्दधाति यदा, तदा श्रद्धा, अन्यथा प्रत्यक्षविरुद्धानप्यर्थान् श्रद्दधतः स्यादेव दृष्टिरागता सत्पुरुषैरपि दुरुच्छेद्येति । न च माषतुषादीनां तद्वत्त्वप्रसङ्गः, तेषां मिथ्यात्वक्षयोपशमेन विरोधानवगाहनात् । बोधेऽपि पार्श्वे गुरोः जीवादीनां धारणाहीनतयाऽवधारणाभावात्त्वज्ञानिता । यद्वा-सन्नपि 'ज्ञात एव फलप्रद' इत्युक्तं बोद्धव्यमिति । * 'तमेव सच्चं नीसंक' (भगवती) मित्यादि त्वशवयनिर्णये वस्तुनि, न तु सर्वत्र । सर्वत्र तथाभावे च न करणीयं स्यात् ज्ञानादि जीवादीनाम् उपदिष्टं चैतच्श्रुते । अलं प्रसङ्गानुप्रसङ्गेनेति । नहि अश्रद्धायां लोकस्य भवति किञ्चिदपि व्यवहारादि, यमनियमानुष्ठानाद्यपि च । जीवादीनां नित्यतादि आस्तिकस्य एव स्यादिति प्रथमतो लोकाऽनादित्वाधिकारः । यद्वा-न किञ्चिज्जायते धर्माधर्माऽऽकाशाद्यन्तरेणेति सर्वसदनुष्ठानमूलभूतत्वेन आदौ लोकस्वरूपनिरूपणं चकार कारुणिकचक्रचूडामणिः । तृतीयस्यां कुलस्य–अभिजनस्य, नीतिः– मर्यादा । नहि अकुलीनस्य लङ्घितस्वमर्यादस्य वा भवति निर्बाधं धर्मसाध-

* द्रव्यार्थतया स्यात् शाश्वतः । तदेव सत्यं निशङ्कम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नादिप्रायः । यद्वा-न वर्णसङ्करप्रजानां संस्काररहितत्वाज्जायन्ते विनयादयो गुणाः,न च तानृते औचित्याचरणं धर्मयोग्यता च स्यादिति कुलनीतिनिरूपणा फलवत्येव । न केवलैव कुलनीतिः, किन्तु लोकधर्माः । अत्र लोक्यते-अपेक्ष्यते, व्यवहारवृत्त्यै विवेकिभिर्यः स लोकः– व्यवहारवेदिनो जनाः । अपेक्ष्यते च लोकः साधुभिरपि, येन तद्विरुद्धानां द्यूतादीनां जुगुप्सितकुलभिक्षादीनां च त्याग उपदिश्यते, क्रियतेऽपि च । यदाह –

लोकः खल्वाधारः, सर्वेषां ब्रह्मचारिणां यस्मात् । तस्माल्लोकविरुद्धं, धर्मविरुद्धं च संत्याज्य ॥१॥ मिति लोकसङ्ज्ञापरिहारोपदेशस्तु मिथ्यादृग्लोकविहितकुशास्त्रानुसार्यनुष्ठानत्यागापेक्षः, नान्यथा । अवदिष्यदाचार्यः ' अदेशाकालयोश्चर्यां, त्यजन् जानन् बलाबलं । प्रसिद्धं च देशाचारं समाचरन्नि' त्यादि । न चैतद् गृहस्थधर्मापेक्षमिति नालम्बनीयमाकाशवत् निरालम्बनैर्यतिधर्मावलम्बनैरिति । तत्त्यागानुपदेशात् तेषां विशेषतो गणधारिभिः तस्य संयमनिश्रास्थानतया प्रतिपादनात् पूर्वत्र च ब्रह्मचारिशब्देन अनूनापूर्वपूर्वविशारदेन साधूनामेवाभिधानाच्च तेषामपि तदालम्बनान्यथानुपपत्तेः(तदालम्बनाविनाभावित्वात्) संयमस्येति । तस्य धर्माःसदाचारा लोकधर्माः, पश्चाद् द्वन्द्वे कुलनीतिलोकधर्माः । न च पृथगधिकारत्वाद् विंशिका पृथक्कार्येति । तयोरेकरूपत्वेन लौकिकत्वेन चैकस्यां समावेश एवोचितः । न च प्रसिद्धत्वाल्लोकलज्जादिनापि तत्परिपालनभावाच्च तत्र बहुवक्तव्यमस्ति, येन पृथगधिकारो विंशिका वा क्रियेत । अत्र उभयोच्चारणं तु द्वयोः पार्थक्यावबोधाय । यतः सन्त्यनेके एवंविधा अपि अनभिज्ञा वस्तुस्वरूपस्य, यल्लौकिकं वंश्यं लोकोत्तरं च न भिन्नतया प्रतीयन्ते, तदुपकाराय चैवमेकविंशिका–प्रतिपाद्यत्वेऽपि न्यस्तावधिकाराधिकारे पृथक्तयेति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चतुर्थ्यां शुद्ध :–निर्वाताशेषशारीरिक-मानसिकानेकद्वन्द्वनिर्वाणप्रापणप्रवणसम्यग्दर्शन-ज्ञान-चारित्राराधनयोग्यत्वात् निर्दोषः, न च अनन्त्यपरावर्त्ते भवति मोक्षगमनाऽऽशयोऽपि, कुतस्तरां च तदनुकूलक्रियाविधानसम्यग्दर्शनाद्यवाप्तिवार्त्ता । पर्यटितश्चैकैको जीवोऽनन्तशः पुद्गलपरावर्त्तान् । न चैतेन शेषतथाभव्यत्वपाकतदर्थंक्रियमाणचतुःशरणगमनाद्यनर्थकम्, तद्युतस्यैव अस्योत्तमत्वात्, तेषामपि चैतज्जन्यत्वाद्वा । कालवादोऽपि कथञ्चित् स्वीक्रियत एव 'कालो नियइ' इत्यादिना । वक्ष्यति चाऽत्र सविशेषमग्रे प्रकरणकार इति नात्र तच्चर्चा । 'अपिचे' ति अखण्डमव्ययमभ्युच्चये । तेन आगमपरिणति-तद्बहुमान-तदुदिताचाराचरणादिव्यञ्जकत्वमस्य ज्ञापयति । यद्वा-लोकोत्तरधर्मप्रारम्भज्ञापनाय अपिचेन विशिष्टता । अतःप्रभृति लोकोत्तरतत्त्वप्रतिपादनं यावत्सम्पूर्त्तिम् । अथवा-षष्ठ्यां विंशिकायां प्रतिपाद्यमानसम्यक्त्वस्य हेतुता यथा सत्कुल-नीतिलोकधर्माणां, तथैव चरमपुद्गलपरावर्त्तस्य तद्बीजादिक्रमस्य चेति ज्ञापनाय अत्राग्रे च 'अपिचे'ति । अन्यथा वा यथा पदसाफल्यं स्यात् तथोह्यमूहावद्भिः सुधीभिः ।

चरमः– अन्तिमो, नान्योऽतो भविष्यति पुद्गलपरावर्तो, यतो न मुक्तौ पुद्गलग्रहणम्,अकर्मत्वान्न च तद्विना तदुत्पन्नपुद्गलपरावर्त्तवार्त्तापि, पुद्गलग्रहण-परिणमन-विहानरूपत्वात्तस्य । स चासौ पुद्गलपरावर्त्त इति । पुद्गलानां पूरणगलनधर्माणः पुद्गलाः परमाणोरारभ्याचित्तमहास्कन्धान्ताः औदारिकवैक्रियाहारकतैजसभाषाऽऽनपानमनःकार्मणाऽयोग्ययोग्यायोग्य- ध्रुवाध्रुवशून्यवर्गणारूपापन्नाः । न कदाचिदनीदृशं जगदिति कृत्वा नैकविधस्यापि पुद्गलस्याभावः कदाचिदपि । कियन्तो जघन्यपदिन उत्कृष्टपदिनो वर्गणा पुद्गला भवन्तीति चेत् सामान्येन सर्वेऽपि पृथक् पृथक् अनन्त-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सङ्ख्यासङ्ख्येया एव कथ्यन्ते । विशेषतः परिणामावधारणप्रयोजनार्थिना तु कर्मप्रकृत्यादयोऽवलोकनीयाः । मन्दबुद्धिबोधप्रयोजनत्वात् प्रस्तुतारम्भस्य । निरूपयिष्यते तदधिकारस्थले च किञ्चिन्मयापि स्थानाशून्यतामात्रोपयोगीति । तेषां ग्रहणादिना परिवर्तोऽवस्थान्तरापादनं पुद्गलपरावर्त्तशब्दाभिधेयः । न च तन्निरूपणेन विना अवाप्तसम्यक्त्वादेर्दुलम्भताऽनादरे च धर्मस्य जननमरणानन्तता प्रतियेतेति युक्तं पुद्गलपरिवर्त्तादित्वेन धर्मयोग्यकालस्य निरूपणमिति । इति प्रथमगाथार्थः । पञ्चम्यां विंशिकायां तद्बीजादिक्रमः । तस्य-प्रसिद्धस्य धर्मरागस्य किं वा सम्यग्दर्शनादेः । न च तच्छब्दस्य पूर्वपरामर्शशक्तत्वात् पूर्वं च धर्मरागसम्यग्दर्शनाद्योरेकतरस्यापि न निरूपणमभूद् येन तत्परामृश्यते इति वाच्यम् । बुद्धितत्तोपलक्षितेऽपि तस्य शक्तत्वात् । धर्मरागः सम्यग्दर्शनादिर्वा बुद्धिस्थं त्वस्त्येव । यतस्तत्कारणतैव चरमपुद्गलपरावर्त्तप्रज्ञापनस्य । उक्तं चैतत्पूर्वमेव शुद्धपदव्याख्यावसरे । बीजं गोधूमादेरिव गोधूमादिपरिणामिकारणं, तदादिक्रमः परिपाटी, बीजता च धर्मरागादेरनुबन्धाबन्धत्वाद्यङ्कुरादिजनकत्वात् सति शुभाध्यवसायजलसमायोगे । न च पर्यन्तवर्त्ति निर्वाणाख्यं फलं निर्हेतुकं, सदा सत्त्वासत्त्वभावप्रसङ्गात् । 'नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणा'दित्यभिज्ञोक्तेः । न च फलं कुत्रापि सहसैव बीजाद्युत्पादशीलं, किन्त्वङ्कुरादिक्रमेण । न च धर्मरागसम्यग्दर्शनादेर्हेतुर्वाच्य इति, चरमपुद्गलपरावर्त्तस्यैव तद्धेतुत्वात् । तस्य तु तथाभव्यत्वमेव-हेतुः एकविधत्वेऽपि कालस्य पृथक् पृथक् जीवेषु पृथक् पृथक् फलजननात् । तच्च पारिणामिकमिति नानवस्था । यद्वा-तस्यापि चतुःशरणाङ्गीकृत्यादिः । तस्य तु तथाक्षयोपशमाद्यपूर्वकरणोद्भवम् । न च नियत्यादिनिरपेक्षं किञ्चिदपि कार्यमभ्युपगम्यतेऽनेकान्तामृतपा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नपीवरैः कदाचिदपीति । कारणतायां धर्मरागादेः स्यादन्यथासिद्धिः, कथञ्चिद्बीजत्वादिरूपेणाङ्कुरादिकं प्रत्येव कारणत्वात्तस्य परमवश्यक्लृप्तस्य न कदाचिदप्यन्यथासिद्धत्वम् । नहि स्वर्गोत्पादजनकादृष्टहेतुकदानादेरन्यथासिद्धत्वं कक्षीक्रियते केनापि कोविदकुलसरःसरसीरुहेण कलाविदा । तन्नैतद्बीजादिरूपं धर्मरागादि मोक्षादि फलरूपं प्रत्यन्यथासिद्धम् । चक्रजीवकजनकस्य तु घटं प्रत्यकिञ्चित्करत्वादेव तथात्वम्, बीजादि तु वृक्षे परिणामिकारणं, तथाऽत्रापि धर्मरागादिहेतुकनिर्मलतैवोपादानकारणं मोक्षावस्थाया इति सौष्ठवं बिभर्त्ति धर्मरागादेर्बीजाद्युपमानम् । नहि घटे परमाणुपुञ्जस्योरीकृतं केनाप्यन्यथासिद्धत्वम् । इत्यलं प्रसङ्गेन । आदिशब्देनोत्तरोत्तरोत्पद्यमानशुभशुभतरशुभतम-शुभतरतम-शुभतमतमाङ्कुरकाष्ठपत्रपुष्पफलसूचनीयावस्थाग्रहः । नहि एतदन्तरेण बीजस्य फलोत्पादनसामर्थ्यमिति तु निर्णीतं पूर्वमेव। धर्मसिद्धिरेव वा केवला फलतयाभिप्रेया धर्मरागस्य बीजत्वेन यदाधिकारः । 'अपि चेत्यस्याभ्युच्चयद्योतकत्वादागतेऽपि चरमपुद्गलपरावर्त्ते नालब्ध्वा धर्मरागबीजादि प्राप्नोति धर्मसिद्धिं, अशेषकर्मविगमाऽवाप्यात्मशुद्धदशारूपां वा सिद्धिं वा कश्चनाप्यङ्गी । नहि चरमावर्त्तप्रारम्भ एव सर्वोपि धर्मरागाद्यवाप्नोति, किन्तु तस्मिन्नेवावर्त्तेऽवाप्नुयात् सकलज्ञाज्ञाज्ञानादिसामग्री सकला । नहि बीजमप्यङ्कुरादीनुत्पादयति सर्वम्, न च तेन तत्तत्कारणं न, मरुदेव्यादीनां जगदानन्दननन्दननन्दिन्यादीनां तद्भव एव सधर्मरागादि समक्लेशक्लेशनपटुसमभावप्राप्यं केवलं च श्रूयते यतः प्राप्तम् । न चाश्चर्यं तद्दशानामुपलक्षणत्वादिति वाच्यम् । यन्न नियमोऽस्ति तथाविधो विधिप्रतिषेधप्रतिपादनपटौ जिनागमे अन्त्यपुद्गलपरावर्त्तप्रारम्भ एव धर्मरागादिलाभः । आसतामन्ये, यावन्न तीर्थंकराणां-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तीर्थंकरणशीलानामपि नैतावतः कालाद्धर्मप्राप्तिः प्राक् । परिपाटी चात्र नियमितकारणकार्यभावसूचया यथागुणस्थानानामपि केषाञ्चिदनुक्रमोऽन्तकृत्केवलिनि लघुजीविनि शास्त्रकारैः शिष्टः-तथाऽत्रापि । नह्याकस्मिकी धर्मप्राप्तिर्भवतीति ज्ञापनाय । स्पष्टयिष्यति च स्फुटमेतत्प्रकरणे ह्येतत्तत्त्वजलनिधिः । षष्ठ्यां विंशिकायां पुनः येषु चरमपुद्गलपरावर्त्तबीजाङ्कुरादिषु सत्सु । अनेन पूर्वपूर्वस्योत्तरोत्तरेण सम्बद्धतामाह । न च भवति भविष्यत्यभूद्वा कस्याप्यनन्त्यपुद्गलपरावर्त्ते सम्यक्त्वलाभः तल्लाभेऽपार्धपुद्गलपरावर्त्तस्यान्तरेवान्तकरणनियमात् ।

★ 'अंतोमुहुत्तमित्तंपि फासियं हुज्ज जेहि सम्मत्तं । तेसिं अवड्ढपुग्गलपरियट्टो चेव संसारो' ॥१॥ इतिशास्त्रोपदेशात् । नच वाच्यं सम्यक्त्वलाभः जघन्याराधनायामपि सप्ताष्टभिर्भवैर्भवोत्तारश्रवणात्,

"आराधनास्तु तेषां तिस्रस्तु जघन्यमध्यमोत्कृष्टाः । जन्मभिरष्टत्र्येकैः सिद्धचन्त्याराधकास्तासा ॥१॥ मिति वाचकवर्यवचनात् कथं पुद्गलपरावर्त्तार्धं किञ्चिन्न्यूनं यावत्पर्यटनं प्राप्तसम्यक्त्वानां, कथं च तथान्त्यावर्त्त एव तद्योग्यः कालोऽन्यत्रापि

≑ 'सम्मत्तम्मि उ लद्धे पलियपुहुत्तेण सावओ होज्जा ।
चरणोवसमखयाणं सागरसंखंतरा हुंति' ॥ १ ॥

इतिवाक्येनाल्प एव संसारकालोऽवगम्यते इति । सत्यप्यल्पैर्भवैर्निर्वाणसम्भवे केचिदाशातनाबहुलतया परिभ्राम्यन्त्येवापार्ध-

★ अन्तर्मुहूर्तमात्रमपि स्पृष्टं भवेत् यैः सम्यक्त्वम् ।
तेषामपार्द्धपुद्गलपरावर्त एव संसारः ॥ १ ॥

≑ सम्यक्त्वे तु लब्धे पल्यपृथक्त्वेन श्रावको भवेत् ।
चरणोपशमक्षयानां सागरसङ्ख्यान्तरा भवन्ति ॥ १ ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पुद्गलपरावर्त्तं ≑ ' आसायणबहुलाणं ' तिवचनात्-केषाञ्चित्तथाभ्रमणमपि स्यादेव । अत एव च अनन्तकालप्रतिपतितानां समयसिद्धिकवक्तव्यतायां विभागो दर्शितः । अल्पभवैर्मुक्तिस्त्वविराधकभावेनैतदाराधकानाम् । तथा च न काप्यनुपपत्तिः । अग्रेतनार्धपुद्गलपरावर्त्तस्य हेतुतयाऽनिरूपणे तु विवक्षाभाव एव हेतुः । यद्वाप्राप्तधर्मरागादेरनुक्रमेण प्राप्तिः सम्यक्त्वस्य सम्पद्यते इति तद्योग्यकालसहचारज्ञापनाय चरमपुद्गलपरावर्त्तस्य योग्यताऽभिमता । यद्वा-अवाप्नोत्यवाप्स्यत्सम्यक्त्वो जन्तुरन्त्ये क्रियारुचित्वम् । तेन च सम्यक्त्वमिति कारणकालनिरूपणायेति । न चर्ते अन्त्यपुद्गलावर्त्तनियमं न किञ्चित्फलदं मुक्तिसाधनमिति शङ्कनीयम् । तत्साधनस्य तत्साधनबुद्धेरेव च तन्निर्णायकत्वात् । नहि गुणस्थानकनिर्णयेन क्रियाप्रवृत्तिः किन्तु तत्प्रवृत्त्यैव तन्निर्णयः । एवमत्रापि भावनीयं सुधीभिः । ' जस्सि'ति पाठे तु यस्मिन्नङ्कुरादिसद्भावे एवेति नियमतया व्याख्येयम् । अत एव तद्बीजादिक्रमस्य, पृथगधिकारः, कारणकार्ययोः कथञ्चिद्भेदवत्त्वात् । न च सर्वथा सदसदेव वोत्पद्यते कार्यम्, तथा सति क्रियावैफल्यक्रियाऽविरमणकार्याकरणव्यपदेशाभावकार्यासिद्ध्यादिदोषात् सर्वथा सति, असति चासदकरणोपादानग्रहणसर्वसम्भवाभावशक्यकरणकारणभावाभावप्रसङ्गात्कथञ्चित् सदसदेव कार्यमुत्पद्यते इतिध्येयम् । ' सम्मत्तमेव'त्ति । सन्पूर्वकाञ्चतेः क्विपि सम्यक् । केवलज्ञानरूपत्वाज्जीवस्य ज्ञानात्मना सर्वपदार्थव्यापनात् सम्यक्छब्देनात्र जीव उच्यते, तस्य भावः सम्यक्त्वं-सम्यग्दर्शनं,व्यापकतासम्बन्धेऽव्यभिचरितसम्बन्धे वा त्वप्रत्ययः । च जीवस्य ज्ञानादित्रयात्मकत्वात् सम्यक्त्वशब्देन स्वरूपाभिधायिना सम्यग्दर्शनादीनां त्रयाणां ग्रहणमापद्यते इति । त्रयाणां

≑ आशातनाबहुलानाम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्वरूपत्वेऽपि सम्यक्त्वाविनाभावित्वादितरयोरस्यैव सम्यक्त्वशब्दाभिधेयत्वात्। व्यक्तं चैतत् शूरसेनवीरसेनदृष्टान्ते आद्याङ्गवृत्त्यादौ गतदर्शनस्य शब्दवेधाद्यखिलक्रियाणां नैरर्थक्यद् दृष्टिमतैव सकलासपत्नसपत्नपराजयस्य भातृरक्षणस्य च विधानात्। यद्वा-लब्धसम्यक्त्वस्यैव बोधप्रवृत्त्योः सम्यक्त्वेनेतरथा ज्ञानाज्ञानकष्टरूपत्वेन तत्राप्येतदनुभावोद्भावित एव सम्यक्त्वव्यपदेश इति सुष्ठूच्यते सम्यग्दर्शनस्यैव सम्यक्त्वमित्यभिधानमिति। समञ्चति-व्याप्नोति सकल-रूप्यरूपिद्रव्याणि तत्प्रथमतया श्रद्धेयतया वा यः स सम्यक्रुचिरूपो भाव आत्मपरिणामविशेषः। ☆ सव्वगयं सम्मत्तं सुए चरित्ते य पज्जवा सव्वे'त्तिवचनात्। केवलस्य सर्वविषयत्वेऽपि न श्रद्धेयतयेति व्युत्पत्तौ तन्निवेशः। यद्वा-सम्यगिति प्रशंसार्थो निपातस्तस्य भावः सम्यक्त्वम्। भवत्येव मिथ्यात्वविषमविषमूर्छितस्य सकलमपि कुत्सनायोग्यम्। अवाप्ते त्वस्मिन् घट्टकुटीप्रभातन्यायेन सकलमपि दानादि सफलतामेत्येव। सदपि श्रुतचारित्रयुगलमप्यभव्येषु नाभीष्टफलदतया अनुभूयतेऽन्यत्र परिणामकटुपौद्गलिकसुखामरत्वाद्याप्तेः। यद्वा-सहचस्तिासहचरितयोः सहचरितस्यैव ग्रहणमितिन्यायाद् ज्ञानचारित्रयोः केवलयोरपि प्रयोगदर्शनात्। दर्शनस्य तु न क्वचनापि तमन्तरेण प्रयोग उपलभ्यते इति सम्यग्दर्शनस्यैव ग्रहः। पदैकदेशे पदसमुदायोपचारस्तु त्वप्रत्ययानर्थक्यापत्तेर्नोचित इति। एवकारोऽत्रापि व्यवस्थायाम्। तेन यथाप्रवृत्तिकरणापूर्वकरणानिवृत्तिकरणजन्यत्वं व्यवस्थापयति। ज्ञापयति चैतस्यावश्यमुपादेयताम्। एतेन ये केचिदाहुः-यन्नार्थोनेन, यतः पूर्वमगुणेनाप्यनेन यथा सागरोपमकोटीकोटचूना क्षपिता कर्मसप्तकस्थितिस्तथा क्षपयिष्यत्यन्यामपि शेषामिति निरस्ता

☆ सर्वगतं सम्यक्त्वम्। श्रुते चरित्रे च पर्यवाः सर्वे।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ज्ञातव्याः । कचवरापनयनन्यायेन विद्यासाधनन्यायेन वा पश्चात्तनस्याल्पस्यापि दुःखसाध्यत्वेन तत्फलप्राप्तये क्रियमाणविघ्नोच्छेदमहत्क्रियावदत्रापि कर्मकचवरापनयनविधौ निर्वाणविद्यासाधनविधौ सविशेषमुत्तरक्रियाविधानस्य योग्यत्वात् । अन्ये च ये एवमाहुर्यदुत नागुणत्वात् सम्भवति प्राप्तिरस्य । अन्यच्चाविरत (सम्यग्दृष्टि) त्वेन महाबन्धकत्वमप्यस्य विद्यते इति । तेप्येतेन परास्ता बोद्धव्याः । यतः प्रायिकं हि तत्प्रभूततरकर्मबन्धज्ञापकं वचः, अन्यथेयताकालेन सर्वेजीवैस्तथा प्रभूततरकर्मबन्धः कृत एवाभविष्यदभविष्यत् तदा कर्मपुद्गलोच्छेदः । न चैवं पश्चाद्बन्धः, पुद्गलाभावादेवेत्यायाता लाभमिच्छतो मूलक्षतिः । न चैवं मोक्ष एतावती प्रत्यक्षीक्रियमाणा च गुणसम्पदपि जाघटीति । तथा चागमप्रत्यक्षप्रमाणविरोधरूपप्रबलशृङ्खलाबद्धता सम्पद्यते देवानांप्रियानां तेषामिति । अगुणत्वं च न हेतुः । भवतु वा तस्योपयोगलक्षणत्वाज्जीवस्यास्त्येव सम्भवः, इतरेषां नेतरकारणसामग्रीति न कार्योद्भवः, इतरकारणसापेक्षत्वात् कार्योत्पादस्येति सुस्थम् । पुनःशब्दो विशेषताद्योतनाय अस्य । विशेषता च सत्यस्मिन् शेषसमग्रकुशलानुष्ठानभावात् । व्यञ्जितं चैतत्प्रागिति । यद्वासत्येवास्मिन् महादानदानसम्भवः, अन्यथा तु दानमात्रं, यदाह–न्यायात्तं स्वल्पमपि हि भृत्यानुपरोधतो महादानं । दीन-तपस्व्यादौ गुर्वनुज्ञया दानमन्यत्तु ॥१॥ इतिविशेषः । अथवा अनादिकालीनापरिमितमिथ्यात्वामयशान्त्युपलम्भकत्वेन विशेषो भवति, तस्मिञ्छान्ते आगमवचनपरिणतेर्यथायथमौचित्येन वर्त्तनम् । यदाहुः प्रकरणकरणनिपुणकरणाः पूज्यपादाः–

'सर्वज्ञवचनमागमवचनं परिणते ततस्तस्मिन् ।
नासुलभमिदं सर्वं ह्युभयमलपरिक्षयान्नियमात् ' ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'विधिसेवादानादौ सूत्रानुगता तु सा नियोगेन ।
गुरुपारतन्त्र्ययोगा–दौचित्याच्चैव सर्वत्र' ॥२॥

न चाप्राप्तेऽस्मिन् भवति गुरुपारतन्त्र्यं, न च तदृतेऽस्ति कश्चनोपायो रागद्वेषमोहापकर्षे, यदाह– 'गुणवत्पारतन्त्र्यं हि, तदनुत्कर्षसाधनम्' । तथा 'इदं तु यस्य नास्त्येव, स नोपायेऽपि वर्त्तते । भावशुद्धेः स्वपरयोर्गुणाद्यज्ञस्य सा कुतः' ॥ तदवश्यं यतितव्यं मुमुक्षुभिरस्मिन् सर्वप्रयत्नेनैहिकामुष्मिकहितहेतौ परमनिर्वृतिनिर्वृतिबीजकल्पे प्रशमसंवेगनिर्वेदानुकम्पास्तिक्याभिव्यक्तिव्यञ्जके तत्त्वार्थश्रद्धानलक्षणे । एतदन्तरा दानादेरकिञ्चित्करत्वाच्छवपुराध्वनि । यत :–

* आणाइ तवो आणाइ संजमो तह य दाणमाणाइ ।
आणारहिओ धम्मो पलालपूलु व्व परिहाइ' ॥

इति विशेषणाय पुनःशब्दप्रयोगः । क्वेत्याह चित्ते–मानसे, यद्यपि सम्यक्त्वमात्मगुणो, वर्त्तनं च तस्य तस्मिन्नेव स्याद् गुणिनं विना गुणस्यान्यत्राऽवृत्तित्वात् । चित्तं तु मनोवर्गणापरिणाम इति जडीभूतम्, तेन न तत्रास्य वर्त्तनं घटाकोटीमाटीकते, तथापि चित्तप्रभवत्वेन विशिष्टताख्यापनायैवमुपदेशः । यतो न तावत्सङ्ज्ञित्वेऽवाप्तिमन्तरेण भवति यथायोग्यमनोवर्गणोपादाननिष्पन्ना चित्तपरिणतिस्तल्लाभश्च चेन्नावाप्नुयात् प्रमादिनो धर्मभ्रष्टस्यानन्तं कालं यावन्निगोदभवपर्यटनादतिक्रान्तपुद्गलसङ्ख्याकोऽपि कालो गच्छेदेवेति न विहाय सञ्ज्ञिनमवाप्नोति कोऽपीदं क्रोधादिदर्शनमोहादिशान्तिजन्यम् । अत एवोक्तमन्यत्र धर्ममधिकृत्य 'धर्मश्चित्तप्रभवो यतः क्रियाधिकरणाश्रयं कार्यम्' इति । न च

* आज्ञायां तप आज्ञायां संयमः तथा च दानमाज्ञायाम् ।
आज्ञारहितो धर्मः पलालपूल इव परिभाति ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

यावत्सञ्ज्ञिलाभोऽस्य, येन तल्लाभमात्रेण भवेन्मनोरथपूर्त्तिः, किन्तु पुष्टिशुद्धिमच्चित्तवतामेवेति । अयं च विशेषः पुनःशब्दस्य डमरुकमणिन्यायेनात्रापि सम्बन्धाल्लभ्यते ।

सप्तम्यां विंशिकायां 'दानविधिश्च ततः खल्वि'ति । अत्र पदैकदेशे पदसमुदायोपचारेण सर्वत्र दानशब्देन महादानमेव ग्राह्यं, पूर्वोक्तयुक्तेर्न वा विवक्षितोऽत्र प्रकरणकारैरेव महादानदानयोर्विशेषोऽन्यत्र स्वयमेवाधिकृतोऽपि । दानं चानुग्रहार्थं स्वस्यातिसर्गो, ज्ञानादेरपि स्वत्वात् । न चाऽसम्भव्यस्य दानं, ज्ञानजीवितयोरदेयत्वाद् देयत्वे तु भवत्येव सर्वो प्राणिप्रकरः सर्वज्ञोऽनन्तजीवितश्चातिशयरत्नाकरदयाखनिश्रीसर्वज्ञकृपयेति वाच्यम् । वाचनादिना देयत्वात् । सर्वज्ञता तु भवत्येव कथितानुकारी स्यात् यदि, भवति चानन्तजीवितोऽपि तथाप्रवृत्तः । न चान्तरेणोपदेशादि तल्लाभ इति । न च स्वसत्त्वापरित्यागान्न तस्य दानत्वं परित्यक्ते स्वत्वासम्भवात् । तस्य दानस्य विधिर्दातृ–प्रतिगृहीतृविषयः सेवितगुरुकुलादिविनयसम्पन्नतादिलक्षणः, तद्विशेषादेव फलविशेषोत्पत्तेः । यदाह सङ्ग्रहकारो–'विधिद्रव्यदातृपात्रविशेषात्तद्विशेष' (तत्त्वार्थ) इति । तद्विशेषो–ऽनुग्रहविशेषोऽनुग्रहविशेषतायां चावश्यंभावी फलविशेषः, अनुग्रहप्रज्ञाप्राप्यत्वात् फलस्य । चकारो द्रव्यदातृपात्रादीनां समुच्चयार्थः । 'ततः' सम्यक्त्वव्याख्यानानन्तरमनन्तरोपदेश्यत्वादस्य । खलुशब्दस्यावधारणार्थत्वात्तत एव नार्वाक् । नहि सर्वज्ञवचनापरिणतावुपदेश्यमस्ति बुधानां किञ्चिदकिञ्चित्करत्वात् तस्य, प्रत्युत शासनद्वेषित्वाद्यापत्तेः । यदाह –

अप्रशान्तमतौ शास्त्रसद्भावप्रतिपादनम् ।
दोषायाभिनवोदीर्णे शमनीयमिव ज्वरे" ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

धर्मोऽपि तदाराधनयैव। अन्यथा त्वधर्म एव। यदुक्तम्- 'वचनाराधनया खलु धर्मस्तद्वाधया त्वधर्म' इति। एतच्चापेक्ष्य बुधानुपदेश्यान्। अन्यथा दानादेरपि प्रथममुपदेष्टव्यत्वाद् बालादीनां यथायोगदेशनाविधानेनैवेष्टसिद्धेः। अयथार्हविधाने तु

'यद्भाषितं मुनीन्द्रैः पापं खलु देशना परस्थाने।' उन्मार्गनयनमेतद्भवगहने दारुणविपाक ॥१॥ मित्यादि शास्त्रशास्त्रितानर्थपरम्परापरिभवभावः। यद्वा- खलुशब्देनैतदवधारयति यत्- न खलु 'दानमौरभ्रिकेणापि चाण्डालेनापि दीयते। येन वा तेन वा शीलं न शक्यमभिरक्षितु' ॥१॥ मित्यादिवचसा कृपणतावल्लीवारिमुचा दानमकिञ्चित्करं ज्ञेयम्। यतो दानशीलादौ पूर्वनिपातभावादेव तस्यानुत्तमोत्तमता व्यक्तैव। न च गृहस्थानां परो दानाद्धर्मोऽस्ति परः। अत एवोक्तं भद्रबाहुपादैः-

* "चुक्कइ गिहिदाणधम्माओ'त्ति। न चादातुः कदर्यस्यास्ति शीलयोग्यता। यदाहुरष्टादशदेशाधिपप्रतिबोधविधानविहितसमग्रसत्त्वाभयदानस्थापिताकल्पयशःशरीराः हेमचन्द्रपादाः-

यः सद्वाह्यमनित्यं च, क्षेत्रेषु न वपेद्धनम्। कथं वराकश्चारित्रं, दुश्चरं स समाचरेत् ॥१॥ इत्यादि। 'दान'मित्यादिवचो न दानस्याकिञ्चित्करताज्ञापकं, किन्तु शीलस्य श्रेष्ठतादर्शकमेव। अयमेव च करालकलिकालकल्मषप्रभावो यदुत- स्वदुर्गुणपोषकतयैव श्रुताश्रितिः श्रेय आशंसया। एष तावत्काव्यविदां समयो यत्प्रकरणादिनैवार्थपरिच्छेदः। प्रकरणं तु शीलप्रतिपालनायैव प्रतिबद्धम्, न तत्र दाननिषेधः कल्पयितुं शक्यः कल्पाकल्पविचक्षणेन कल्पस्थितेन। न चाजातनिर्ममभावेन शीलसम्पत्तिरपि

* भ्रश्यति गृहिदानधर्माद्।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्वीक्रियेत, धनादिषु गृद्धिष्णूनां रत्नत्रयममत्वावाप्तातयग्भवान-ग्रंन्थीव तत्स्वीकारोऽनर्थकर एव। नहि चित्रं चित्रकार्यशुद्धायां भूमाविति ।

अष्टम्यां विंशिकायां परमः— परमपददायकसम्यक्त्वशुद्धि-हेतुत्वात् परमः । यद्वा-स्वरूपहिंसामयत्वेऽपि भावशुद्ध्या मलिना-रम्भ्यधिकारिविहितत्वेनोत्कृष्टः शेषकार्येभ्यः । यद्यपि सामायि-कादिकं मलिनारम्भिकार्यमेव तथापि तस्य स्वतन्त्रं विधानात् सर्वकालभावित्वात् आत्मोपकारकत्वाच्च न प्राग्विधेयता, एतस्य तु विपर्ययादवश्यंकार्यत्वात् सम्यक्त्वशुद्धिहेतुत्वात् पूर्वमेव विधा-तव्यता । यद्यपि चारित्रानुष्ठानमशेषद्वन्द्वोपरमपरमपदहेतुत्वात् परमं तथापि तत्कर्त्तुमशक्नुवतो देशविरतेरवश्यं सम्यक्त्वशुद्धिहे-तुकानुष्ठानं विधातुमुचितं प्राक् । सम्यक्त्वं च चारित्रस्यापि मूलभूतम्, यत उक्तं —

* 'नादंसणिस्स नाणं नाणेण विणा न हुंति चरणगुणा'त्ति 'भ्रष्टेनापि चरित्रात् सुष्ठुतरं दर्शनं ग्रहीतव्य' मिति च । अथवा परमो-भाग्यप्राग्भारप्राप्याशेषसत्त्वासाधारणगुणविधानवरिष्ठगरि-मपात्रश्रीमत्तीर्थकरादिसपर्यामयत्वाद् द्रव्यभावभेदभिन्नः उत्कृष्टः । भवति च द्विविधाऽपि पूजा निःश्रेयसाय निःश्रेयसार्थिनाम् । न चाऽनाश्वासः प्रभूततरकष्टसाध्ये चारित्रे, यत ऋजुरयं मार्गो मोक्षस्यापरश्च वक्रः, अल्पानेहःसाध्य आद्य, इतरो बहुना, अविश्राम आद्यः, इतरश्च न तथेति सविशेषं भाष्यकारादिभिः प्रतिपादित एवेति नाऽनाश्वासः । ' पूजाविधिः ' । पूजाया :—

* नादर्शनिनो ज्ञानं ज्ञानेन विना न भवन्ति चरणगुणाः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अनुपकृतपरहितरतः शिवदस्त्रिदशेशपूजितो भगवान् । पूज्यो हितकामानामिति भक्त्या पूजनं पूजा ॥१॥ (षोडशके) इति व्युत्पादिताया विधिर्मनोवाक्कायशुद्ध्यादिः उपकरणभावशुद्ध्यादिर्वा । अत्र पूर्वत्र च विंशिकाया अधिकारे विधिशब्देनाचार्यो दर्शयति विधेः प्राधान्यतां धर्माऽनुष्ठाने । अनुमतं चैतच्चिरन्तनैरपि महात्मभिः । यदाहुस्ते –

॥ जह भोयणमविहिकयं विणासइ विहिकयं जियावेइ ।
तह अविहिकओ धम्मो देइ भवं विहिकओ मुक्खं ॥१॥ ति

वाक्येन । अन्यच्च अविध्यनुष्ठानस्य द्रव्यानुष्ठानतैव । अभिमतैरभिहितं च स्वयमेव–अपेक्षा चाविधिश्चैवापरिणामस्तथैव च । प्रत्याख्यानस्य विघ्नास्तु, वीर्याभावस्तथा परः ॥१॥ अपेक्षादिकृतं ह्याद्यं–द्रव्यप्रत्याख्यानमित्यर्थः । अयं चोपदेशोऽविधिपरिहारोपयिक एव, नत्वनुष्ठाननिषेधपरः । यतः स्वच्छन्दो रचितविविधवाग्वागुराव्याबाधितमुग्धपशूनां नास्तिकमूर्धन्यानां विषयवासनातृप्तिपरायणानां गुरुलोपिनां धर्मगुरुत्वाभिधानमलिकमुद्वहतां स्ववासनातृप्तयेऽलम्भविष्णुः । आहुश्चातएवाभियुक्तराः–

॥ 'अविहिकया वरमकयं उस्सुयवयणं वयंति गीयत्था ।
पायच्छित्तं जम्हा कए लहुयं अकए गरुयं ॥१॥'

अन्यत्र 'जिनोक्तमिति सद्भक्त्या ग्रहणे द्रव्यतोप्यदः । बाध्यमानं भवेद्भाव–प्रत्याख्यानस्य कारण ॥१॥' मिति । तत्त्वमवधार्यं चात्र यदुताऽत्र द्रव्यता नाऽप्राधान्येन किन्तु भावकारणत्वेन । अत एव च धर्मसङ्ग्रहण्यामविध्यनुष्ठानं भावधर्मतयापि प्रतिपादितं चेत्तद्भक्तिकृतं स्याद् । अभिहितवाँश्चाचार्यो व्याख्यायामपि

॥ यथा भोजनमविधिकृतं विनाशयति विधिकृतं जीवयति ।
तथाऽविधिकृतो धर्मो ददाति भवं विधिकृतो मोक्षम् ॥१॥

॥ अविधिकृताद् वरमकृतमुत्सूत्रवचनं वदन्ति गीतार्थाः ।
प्रायश्चित्तं यस्मात् कृते लघुकं अकृते गुरुकम् ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

यद्भक्त्याऽविधिदोषस्य तिरस्कृतत्वान्न तदनुवन्धः, विधिनिरपेक्ष-सापेक्षत्वाभ्यामेवानुष्ठानस्य द्रव्यभावरूपतेति फलितोर्थः। अत एव च

॥ विहिबहुमाणी धण्णा विहिपक्खाराहगा सया धन्ना।
विहिचाओ अविहिरागो अभव्वजियदूरभव्वाण' ॥१॥

मित्यादि प्रपञ्चितम्। अन्यथा न स्यात् प्रथमतः शिक्षाव्रत-प्रतिपतिः कस्यापि, यतः शिक्षापदेनैव शासति शास्त्रकारा यदुत-न प्रथमतः परिशुद्धं भवत्येतत् किन्त्वभ्यासादेवोक्तं च- 'सातिचा-रादनुष्ठानान्निरतिचारमनुष्ठानं भवती'ति। न चैवमविधिपक्षोङ्गी-क्रियतेऽस्माभिः किन्तु विध्यादरेण कुर्वता चेदविधिः समापद्येता-नुष्ठाने, नैतावता तत्परिहारः परिहृतमिथ्यात्वमलकलङ्केन विधेयः, किन्तु यथाशक्त्यविधिः परिहार्यः। न चैवं विधिनिरपेक्ष-प्रवृत्तिरपि हितावहा, स्वमतिप्रवृत्तेः संसारफलत्वात्तदुक्तं –

॥ 'समइपवित्ती सव्वा आणावज्झत्ति भवफला चेव।
तित्थयरुद्देसेणवि न तत्तओ सा तदुद्देसा' ॥१॥ इति।

चैवेत्यखण्डमव्ययमवधारणे। अवधारयति चानेन यथाधिकारं पूजाविधानमावश्यकमिति। न च भावपूजाया आज्ञापालनात्मक-त्वाद् भवत्ववश्यकर्त्तव्यत्वम्, द्रव्यपूजायास्तु षट्कायवधस्वरू-पत्वात् कथमावश्यकता। यतः –

'स्नानादौ कायवधो न चोपचारो जिनस्य कश्चिदपि। कृतकृत्यश्च स भगवान् व्यर्था पूजे' तीतिवाक्यादिति वाच्यम्। प्रतिपादितमेव तत्रैव तव पूजावैयर्थ्यवादिनो मूढत्वम्, यदाहुः–मुग्धमतिः –

॥ विधिबहुमानिनो धन्या विधिपक्षाराधका. सदा धन्याः।
विधित्यागोऽविधिरागोऽभव्यजीवदूरभव्यानान् ॥ १ ॥

॥ स्वमतिप्रवृत्तिः सर्वा आज्ञाबाह्येति भवफलैव।
तीर्थंकरोद्देशेनापि न तत्त्वतः सा तदुद्देशा ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'कूपोदाहरणादिह कायवधोऽपि गुणवान्मतो गृहिणः ।
मन्त्रादेरिव च ततस्तदनुपकारेऽपि फलभावः ॥१॥
कृतकृत्यत्वादेव च तत्पूजा फलवती गुणोत्कर्षात् ।
तस्मादव्यर्थैषारम्भवतोऽन्यत्र विमलधियः' ॥२॥ (षोडशके)

चैत्यविधानविषयापि नाऽऽरेका कल्याणातिरेकाधायिनी । यत आहुः पूज्या :–

'एतदिह भावयज्ञः सद्गृहिणो जन्मफलमिदं परमम् । अभ्युदयाविच्छित्त्या नियमादपवर्गबीजमिति ' ॥१॥ न च स्वकल्पितहिंसाबुद्धया तत्परिहारः श्रेयान् । यतो न हिंसैव तत्र, "प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा" (तत्त्वार्थ.) इति सूत्रेण यतनाऽभावस्यैव तल्लक्षणत्वात्,न चात्र यतनाऽभावो येन हिंसाद्यापत्तिः स्याद् लोमपिच्छादिना तद्भावात् । आह च-'यतनातो न च हिंसे'ति-न च हिंसाऽभावेऽपि नाऽऽयसाधनमिति, यतस्तस्यास्तन्निवृत्तिफलत्वाद् यदाहुभा :–

'यस्मादेषैव तन्निवृत्तिफला । तदधिकनिवृत्तिभावाद्विहितमतोऽदुष्टमेवैतदि ॥१॥ त्यादि । कियद्विवेचनीयाः कृष्णा दधिमाषभोजनात् । यद्वा-चकारः पूर्वत्रोत्तरत्र च प्रतिपाद्यमानगुणयुक्ततां समुच्चिनोति । तथा च य आहुः–

' जिनस्य जितमारस्य, याचित्वा पुरतः शिवम् ।
लप्स्यामो निर्गुणेष्वर्हन्नुपकर्त्ता न संशयः ॥ '

ते निरस्ताः । यतो न नतसामन्तश्रेष्ठ्यादिनरगणो नृपोऽपि सन्तुष्यति भक्तिकारिणे आज्ञाविराधकाय, किमुत त्रिलोकभर्त्तुर्नतनरामरेन्द्रकिरीटकान्तिद्योतितक्रमयुगलस्याज्ञामुपेक्ष्य फललिप्सा । अत एवाहुः शब्दानुशासनपरमब्रह्माणः श्रीहेमचन्द्रपादाः–

'वीतराग ! सपर्यातस्तवाज्ञाराधनं परम् । आज्ञाऽऽराद्धा

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

विराद्धा च, शिवाय च भवाय च' ॥१॥ किमत्र बहुनोक्तेन यावदाज्ञारहितवीतरागपूजायाः सर्वस्या अपि निष्फलत्वात्तदाह –

॥ 'आणाखंडणकारी जइवि तिकालं महाविभूइए ।
पूएइ वीयरायं सव्वंपि निरत्थयं तस्स' ॥१॥

इत्यलं प्रसङ्गेन । एवकारश्च पूर्ववदवधारणे ॥१२॥ आज्ञापालनपरायणेन यथाऽवधि यथाशक्ति च देशविरतौ सर्वविरतौ वा यतितव्यमवश्यं तत्र चादावसहिष्णुना सर्वविरतिदुष्करतां देशविरतिरपि तप्तायःकटाहपदन्यासन्यायेन स्वीकार्यैवेत्याह नवम्यां विंशिकायां- 'श्रावकधर्मश्च ततः' तत्र शृणोति प्रत्यहं यतिजनात् परमां सामाचारीमभ्युपेतसम्यक्त्वादिः स श्रावकः ।

यदाह-यो ह्यभ्युपेतसम्यक्त्वो यतिभ्यः प्रत्यहं कथाम् । शृणोति धर्मसम्बद्धामसौ श्रावक उच्यते ॥१॥ अनेनाष्टाङ्गिक्यां प्रवृत्तौ चतुर्थः श्रवणगुण उक्तो मध्यमग्रहणेन चाद्यन्तयोर्ग्रहणादष्टाङ्गिकी या प्रवृत्तिः तद्वत्ता तेन प्रत्येया । अष्टाङ्गानि चैतानि-

अद्वेषा जिज्ञासा सुश्रूषा श्रवणबोधमीमांसा ।
परिशुद्धा प्रतिपत्तिः प्रवृतिरष्टाङ्गिकी तत्त्वे' ॥१॥

अत्र च प्रवृत्तिपदमावर्त्तनीयम् । यद्वा–धीगुणाष्टके यो द्वितीयो गुणः सोऽयम् । तत्रापि चायमेव न्यायः । धीगुणाष्टकं चेदम् ।

'शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ।
ऊहापोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥१॥

'एकग्रहणे तज्जातीयग्रहण' मिति न्यायात् मननादीन्यपि ग्राह्याणि । क्रियाशब्दोयम् । तेन प्राधान्येनाऽस्य श्रोतृकतैव श्रेयसी । न चास्योपदेशादौ समवसरणादिन्यायेनाधिकारः । न चासम्भव उपदेशस्य

॥ आज्ञाखण्डनकारी यद्यपि त्रिकालं महाविभूत्या ।
पूजयति वीतरागं सर्वमपि निरर्थकं तस्य ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

• ' विवरीयपरूवणाए ये 'ति प्रतिक्रमणं कथं सम्भवीति। पश्चात्कृताद्यपेक्षयैतद्विधेर्व्याख्याकारैरेव निर्णीतत्वात्। श्रीस्थानाङ्गवृत्तावपि श्रोतृकतैवाभिमताऽस्य आख्याति शृणोति चैक ' इत्यादिचतुर्भङ्ग्याम्। श्रावकाख्याविधानेनाभिदधते च ग्रन्थकारा यदुत–धर्मश्रवणेऽवश्यं यत्नः कार्यः शेषपरिहारेणापि, अन्यथा सम्यक्त्वादिविलयविभावनान्नन्दमणिकारादेरिव। अत एव प्राङ् मार्गानुसारिगुणाख्यानावसरे 'प्रत्यहं धर्मश्रवण'मित्यभिधाय पुनः श्रावकधर्मप्रस्ताव ऊचुः'जिनवचनश्रवणे नियोग' इति। यच्च श्रीमदुमास्वातिमिश्रैः–'सम्यग्दर्शनसम्पन्नः षड् विधावश्यकनिरतश्च श्रावको भवती'ति व्याचक्षे लक्षणमिति श्रूयते, तत्

• 'समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा ॥
अंतो अहोनिसस्स य तम्हा आवस्सयं णाम' ॥१॥ इति

श्री अनुयोगद्वारव्याख्याताऽऽवश्यकव्युत्पत्त्यनुसारेण। यद्वा–श्रीमहानिशीथोक्तचैत्यवन्दनादीनि षडावश्यकानि प्रतीत्य ज्ञेयम्। यतो दर्शनश्रावकस्यापि भवन्त्येव चैत्यवन्दनादीनीति। यद्यपि श्रावकशब्देन दर्शनदेशविरतिश्रावकयोर्ग्रहणं स्यात् परं पूर्वं सम्यक्त्वाधिकारविंशिकायां षष्ठ्यां सम्यक्त्वस्य प्रतिपादितत्वादत्र देशविरतस्यैवाधिकारः। तस्य धर्मः- वचनाद्यदनुष्ठानमविरुद्धाद्यथोदितम्। मैत्र्यादिभावसंयुक्तं तद्धर्म इति कीर्त्यते, ॥१॥ इति श्लोकलक्षितमनुष्ठानं संयमासंयमादि। यद्यपि मार्गानुसारित्वादि सामान्यतोऽस्ति गृहस्थधर्मः, परं सोऽन्यत्र न्यक्षेण निरूपित इति नात्राधिकृतः, प्रतिमोद्वहनादि त्वग्रे वक्ष्यतीति व्रताभ्युपगमाहोरात्र

• विपरीतप्ररूपणया च।

• श्रमणेन श्रावकेण च अवश्य कर्तव्यं भवति यस्मात्।
अन्तः अहोनिशस्य च तस्मादावश्यकं नाम ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

चर्यानियमादिरूप एवात्राधिकृतो वेदितव्यः । चकारोऽनेककोटयात्मकभेदसङ्ग्रहाय । न खलु निर्ग्रन्थानामिव श्राद्धानामाचार एकविधोऽष्टादशसहस्रशीलाङ्गादिवत् किन्त्वेकविधैकविधत्वादिनैकादिव्रताभ्युपगमेन साधिकचतुर्दशशतकोटिभङ्गरूपः । सर्वेपि च सम्यक्त्वसहिता' एवेति न तद्भङ्गगणना । यद्यपि मार्गावताराय ददत्यपि विज्ञातविज्ञाज्ञातात्पर्या मिथ्यादृग्भ्योऽपि व्रतानि तथाप्यभिग्रहमात्रतया न तेषां व्रततया परिगणनायामवतारः । 'ततः' इत्यनेन व्रतादिप्रतिपत्तिरवाप्तसम्यक्त्वस्य विहितोदारभावस्य रचिततत्रिभुवनभर्तृविविधपूजोपचारस्यैव श्रेयसीति ज्ञापयति । न च छद्मस्थेन पराशयानामज्ञेयत्वात् सम्यक्त्वावाप्तिः कथं ज्ञायते ? तज्ज्ञानाभावे च कथं व्रतादिसमारोप इतिवाच्यम् । साक्षादज्ञेयत्वेपि गम्यत एव शुश्रूषाधर्मरागादिभिर्हेतुभिः । तदवगमे चारोप्यैव सम्यक्त्वं वितीर्यते व्रतादि व्रतविधिवेदिभिरिति कथञ्चनाप्यनास्था । अत एव दीक्षाविधौ मुण्डापनाप्रव्राजनाद्वारद्वयमासूत्रितं सूत्रविधानविज्ञैः । यद्वा- 'तत' इत्यनेन व्यवस्थां लक्षयति, यदुत–तत्प्रथमत उपागते श्रोतर्याख्येयो महाव्रतादिरूपधर्मो धर्माख्यानविधिविदुषा मुनिना । यदि च तस्मिन्नपरिणतः श्रोता, तर्हि तस्मै देशविरत्यादिरूप आख्येयो धर्मः । न परिगतोऽसावपि यदि, मद्यमांसविरत्यादिरूप इति हि समयविदां समयः । अन्यथा विधाने प्रत्यपायस्मरणात् । परमकारुणिकेन मुनिना षड्जीवनिकाययतनामनुपदिश्य त्रसमात्रयतनाख्याने स्थावरहिंसानुमतिप्रसङ्गात् । न च नाख्येयो देयो वा तर्हि देशविरतिधर्मस्तत्परिणतायापि तदनुमतिप्रसङ्गादेवेति । गृहिपुत्रबन्धमोक्षज्ञातेन तदनुमतिप्रसङ्गाभावात् । अनुपदेशेऽपि साक्षाद्गौर्ण एव भगवताऽऽनन्दादिभ्योऽसौ । अदाने च भवन्त्येव

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

श्रद्धाछेद-हिंसानुमति-सर्वविरत्यनङ्गीकृत्यादीनि दूषणानि । न च सर्वेऽपि समसहिष्णुताका यत्प्रतिपद्येरँस्ते सर्वविरतिम् । भवति च यतिधर्मानुरक्तानामेव देशविरतिः, नान्यथेत्यादावाख्येय एवासौ विधिविदा, प्रथमश्रोतर्येवायं नियमोऽवगतदेशसर्वविरतिस्वरूपाणां यथायोग्यं देशाद्यवगम्याऽऽख्येयमिति ।

दशम्यां विंशिकायां-'तत्प्रतिमाश्च भवन्ति बोद्धव्याः' । तत्र तस्य–पूर्वाधिकाराधिकृतस्य, नान्यस्य । देशविरत्यादेरनङ्गीकृतौ न प्रतिमोद्वहनयोग्यतैव, कुतस्तद्वहनमिति । प्रतिमाः–अभिग्रह-विशेषा एव । प्रतिमीयते च तासामुद्वोढा मुन्यादिभिरिति तस्य प्रतिमात्वम् । यद्वा–पारिभाषिकोऽयमभिग्रहविशेषे । बहुत्वं च प्रतिमाबहुत्वापेक्षम् । चकारोऽप्यर्थे । तेन श्रावकधर्मप्रतिपत्तौ प्रतिमाप्रतिपत्तिनियमो नेति ध्वनयति । यद्यपि तत्पूर्विका साधु-त्वावाप्तिरिति दृश्यतेऽनेकत्र, परं न नियमः । यतो भवत्येव केषाञ्चित् सम्यक्त्वोत्पादकाल एव सर्वविरत्यङ्गीकृतिः । अनेके च तदन्तरा सर्वविरता इति । यद्वा-अवधारणे चकारः । भवति चान्तर्मुहूर्त्तेनापि कालेनैकादशानामपि प्रतिमानां परिपालनम् । इदं चावधारणं श्रावकधर्मेण सहचारित्वमात्रे इति न सम्यक्त्वो-त्पादकाले सर्वविरत्यङ्गीकारे कश्चनापि दोषलेशः । यद्वा–चोप्य-र्थेऽपिश्च सम्भावनायाम् । भवन्ति अधिकृता इतिशेषः । दशम्यां किल विंशिकायां श्रावकप्रतिमा अधिकृताः सन्तीत्यर्थः । चकार-स्यात्र सम्बन्धात् ता बोद्धव्याः । यद्वा–दशम्यां विंशिकायां श्रावक-प्रतिमा बोद्धव्या भवन्ति-सन्तीत्यर्थः । न च बोद्धव्येतिशब्देन ज्ञेयमात्रता तासां, सर्वविरतानां मुनीनां अमरावलिनतपादानां तासां बोद्धव्यत्वेपि देशविरतानां व्रतादिप्रतिपत्तिप्रतिपत्तिपरायणानां तासामुपादेयत्वात् । न चोपादानमन्तरेण ज्ञानं,न विनेष्टसाधनताज्ञानं स्वरूपज्ञानं वोपादेयस्योपादानं सम्भवतीति बोद्धव्यतोक्ता ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एकादश्यां विंशिकायां-'यतिधर्मोऽतः पुन'रिति । तत्र यतिः- सर्वप्राणातिपात-मृषावादाऽदत्तादान-मैथुन-परिग्रहविरतिः,- 'यमूं उपरमे' सा धर्मोऽस्य । यद्वा-यमनं यतं तद्वान् यती तस्य, धर्मः- क्षान्त्यादिब्रह्मचर्यान्तः । यद्वा-यततेऽपवर्गार्थमेव संसारसुखनिरभिलाषतयेति यतिः । अनेनास्योत्तमतां व्याचख्यौ । यदाहुः षट्पुरुषव्याख्यायां-षष्ठपुरुषाः पौरुषेयप्रवचनपीयूषपानपीवरविवेकाः ' मोक्षायैव तु घटते विशिष्टमतिरुत्तमः पुरुषः' इति । उत्तमोत्तमः पुनर्यः कृतार्थोऽपि परोपकारप्रवणं प्रावर्त्तयत्तीर्थं परोपकाराय, स एवाखिलकल्याणाङ्कुरकादम्बिनीरूपस्तीर्थंकरस्तस्य यतित्वेऽपि नात्राधिकारः,तदीयाचारस्य कल्पातीतत्वात् । श्रावकधर्मयोग्यतानन्तरावाप्तयतिधर्मस्योपदेश्ययतिधर्मस्यैवात्र यतेर्ग्रहणात् । यद्वा-अस्तु सोऽप्यधिकृतः, परं यतिशब्देन तूत्तमतैव व्यज्यते, तस्य मोक्षोद्देश्यकप्रवृत्तिवाचकत्वेन व्युत्पादितत्वात् । उत्तमोत्तमस्तु निःस्पृह एव सर्वत्र मोक्षादावपि । यदाहुरनवद्यचतुरनुशासनशासनावाप्तोत्तमब्रह्मत्वाः श्रीहेमसूरिमिश्राः–

'सुखे दुःखे भवे मोक्षे, यदौदासीन्यमीशिषे ।
तदा वैराग्यमेवेति, कुत्र नासि विरागवान् ॥१॥

तथा 'मोक्षे भवे च सर्वत्र, निःस्पृहो मुनिसत्तम' इति परममुनिवाक्यादपि । व्युत्पत्तिमात्रत्वे त्वस्तु सर्वेषामपि यतिशब्देन व्यपदेशः । अनेन योगेन प्रयोजयाञ्चक्रुर्भावयतेरेव धर्मस्याख्येयताम् । यतो न तावन्नामस्थापनाद्रव्ययतयो धर्मानुष्ठायकाः स्वपरतारकाश्च । न चात्र तेषामनाचारादिप्रादुष्करणमधिकृतमित्येवं व्याख्यायते । अनेन ये तावदाहुः-यदजिनरूपाण्यपि जिनबिम्बानि नंनम्यन्ते नरकादिगतिमयसंसारचारकनिर्विण्णेन अवाप्नुवन्ति च तेऽभीष्टसिद्धिं, ततः तदसाधुभूतानपि पार्श्वस्थादीन् वेषभृतोऽवेक्ष्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सुन्दरसाधुवेषसद्भावात् साधुबुद्धया तेषां वन्दनं भविष्यत्येवेष्ट-सिद्धये इति, ते निरस्ताः। यतो यद्यपि प्रतिबिम्बं जडस्वरूपं तथापि न किञ्चिद्रागादि चिह्नं, येन पुरुषोत्तमतारोपे प्रतिबन्धकं स्याद्। वेषभृति तु सर्वाभिलाषभोजनपरिग्रहादृति-षड्जीवकाय हिंसाद्याकरे कथङ्कारं प्रतिबन्धकसद्भावात् साधुत्वारोपः, विरोधिज्ञानस्य प्रतिबन्धकत्वात्। न च प्रतिमानेऽपि जडतानु-सन्धाने कथं केवलित्वाद्यारोप इति वाच्यम्। तद्दोषस्य प्रतिबिम्बत्वधियैव निराकरणात्। न हि कोपि प्रतिच्छन्दमाश्रयति सर्वज्ञस्वरूपेण किन्तु तद्बिम्बतयैव। अभेदारोपस्त्वलङ्कारालङ्कृत-वाग्बुद्धिवैभवो भक्त्यतिशयेनैव। न चैवमसाधौ साधुप्रतिबिम्बत्व-बुद्धिः कथङ्कारमपि प्रादुर्भवति, मुख्यवाच्ये प्रतिबिम्बत्वबुद्धि-विरोधात्। अत एवासंयतपार्श्वस्थादिवन्दने निर्जराकीर्ति-जिनाज्ञाऽऽभावादीनि दूषणानि जगदिरे ग्रन्थकारैस्तत्र तत्र, प्रमादास्पदानां चानुत्तरा भवत्येव वृद्धिस्तेषां वन्दने। अगुरौ गुरुत्वबुद्धयारोपात्। अत्र तु सर्वमपि स्थापनायाः सत्यत्वान्निर्व-हतीत्यलं प्रसङ्गेनापलापिभिः प्रवचनस्य। तस्य पूर्वोक्तस्वरूपस्य यतेर्धर्मं उत्तरगुणरूपःक्षान्त्यादिः। मूलगुणानां प्रसिद्धत्वादुपस्थापना-यामेव तद्बोधोत्पादनाद्वेति। अनेन ये आहु :– मूलगुणाः सुतरां रक्षणीया आत्मश्रेयोरक्षकैरुत्तरगुणेषु विराधितेषु काचिन्न तथा-विधा हानिरिति। ते निरुत्तरिताः। यत उत्तरगुणपरित्यागेऽ-चिरान्मूलगुणपरित्यागापत्तेः। तदिदमुक्तमुपदेशरत्नरोहणा-चलेन धर्मदासगणिना–

● जो चयइ उत्तरगुणे मूलगुणे अचिरेण सो चयइ'त्ति।

न च वृतिवर्जितं धान्यं रक्षामवाप्नोति पशुभ्यः। अत इत्यनेनै-

● यस्त्यजति उत्तरगुणान् मूलगुणान् अचिरेण स त्यजति।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तदाह यदुत-येनासहिष्णुना प्रथमतो न प्रतिपन्नं महाव्रतवृन्दं वृन्दारकवन्द्यं, तेन प्रतिमादि परिपाल्य कार्या सहिष्णुता, येन सुखेन संयमप्रतिज्ञा निरूह्यते । केचित्तु दुष्षमाकालदोषात् प्रतिपातस्य शासनमालिन्यहेतुत्वाद् व्रतभङ्गस्यानिष्टतमनरकादिगतिगतदुःख-निबन्धनत्वान्नियममेवाहुः । यथाग्राहकमत्र क्रमाक्रमाविति केचित् । पुनःशब्दो विशेषणाय । क्षान्त्यादिभेदानां उपकार्यपकारि-क्षान्त्यादीनां कति भवन्ति साधोरित्यादिविशेषः । यद्वा-ये आहुः-न श्रावणीयो यत्यनुष्ठानीयो धर्मः श्रावकाय, तस्य छिद्रान्वेषित्व-भावात् साध्वाचारप्रतिपादकस्यागमस्य व्यवहाराचारप्रकल्पादे-रयोग्यत्वाच्च, तेषां निरासाय पुनःशब्दः । यतोऽज्ञाने हि यति-धर्मस्य गुर्वगुरुताज्ञानाभावान्न स्यात् सम्यक् सम्यक्त्वप्रतिपत्तिः । न च स्वरूपज्ञानाय क्रियमाणान्वेषणा छिद्रान्वेषितायां पतति । यदाह-नेत्रैर्निरीक्ष्य विषकण्टकसर्पकीटान्, सम्यक्पथा व्रजति तान् परिहृत्य सर्वान् । कुज्ञानकुश्रुतिकुमार्गकुदृष्टिदोषान्, सम्यग्विचारयत कोऽत्र परापवादः ॥१॥ यद्यपि नाचारप्रकल्पादियोग्यता श्रावकस्योत्सर्गाप-वादनिरूपणप्रवणत्वात्तस्य । परं सामान्यत आचारमयस्य दशवैका-लिकचतुरध्ययन्याः सूत्रतोऽर्थतश्चाऽऽपञ्चमाध्ययनात् तस्याधि-कारोऽस्त्येवाध्ययने । व्यक्तं चेदं श्रावकप्रज्ञप्त्याऽऽवश्यकनि-र्युक्त्यादौ सामायिकाधिकारे सर्वशब्दानुच्चारेण भेदविवक्षायां शिक्षाद्वारे । श्रावका अपि 'लब्धार्था गृहीतार्था' इत्यादिविशेषण-विशिष्टा एवाभिमताः । द्वादश्यां तु विंशिकायां ' द्विविधा शिक्षा चैतस्ये'ति । द्वे विधे-ग्रहणासेवनारूपे यस्याः-सा द्विविधा, ग्रहणं-सूत्रार्थयोरासेवना च प्रतिक्रमणप्रत्युपेक्षणादेः 'शिक्षि विद्योपादाने' इतिवचनात् । अभ्यसनीया भवन्ति च प्रतिक्रमणादिक्रियाः । अत एव शैक्षकानां स्थविरेभ्योऽर्पणं दीक्षादिने श्रूयते सिद्धान्ते ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

आवश्यकं च क्रियाया अप्यभ्यासविशेषेण निरतिचारतापादनम्, ज्ञानक्रियोभयसाध्यत्वाच्छिववर्त्मनः, सातिचारायाश्च तस्याः स्वसाध्यासाध्यत्वात्, 'व्रतानि सातिचाराणि सुकृताय भवन्ति ने'तिवचनात् । यद्यपि विद्योपादाने शिक्षिस्तथापि भिदाद्यन्तर्गतत्वेन अधिकारार्थविवक्षया आङ्विधानादभ्यासमात्रे शिक्षेति निपातः स्यात् । पठ्यते वा 'शिक्ष अभ्यासे' इत्यपि । यद्वा-क्रियाकलापशिक्षणमपि विद्याभ्यास एव,.कर्मजाया अपि बुद्धेः श्रवणात् । भवति चाभ्यस्तक्रियस्य चापल्यादिना बुद्धिविशेषः प्रत्यक्षसिद्धः । भवति वा जिज्ञासायां शकः सन्नन्तादात्मनेपदं 'षितोऽङ्' (सि. ५।३।१०७) इति सूत्रेण चाङ् भवति । ततः शिक्षाशब्दनिष्पत्तिः । जिज्ञासा च ज्ञाने क्रियायां च समानैवेति द्विविधशिक्षाग्रहणमर्हत्येव योग्यतां, शिक्षतेरेव च जिज्ञासार्थ इत्येके । चकारो न केवलं क्षान्त्यादिको यतिधर्म एव निरूप्यते, किन्तु शिक्षापि द्विविधेति ज्ञापनाय । यद्वा-न मूलगुणोत्तरगुणधारित्वमात्रेण निःश्रेयससाधनं किन्तु द्विविधशिक्षाग्रहणेनैव । यतो न तावदज्ञानिनः किञ्चिदपि हेयोपादेयादिपरिज्ञानं कुतस्तरां तद्धानोपादानादि । तदाह-[1] 'अन्नाणी किं काही किं वा नाहीइच्छेयपावग'मिति । न च स्वाध्यायविहीनस्य धर्मध्यानादिः, आज्ञाविचयादिरूपत्वात्तस्यातिक्रान्तकपिचापल्यत्वाच्च मनसः, कुतश्चिदपि न स्थिरीभावः । तदाहुः- 'पैशाचिकमाख्यानं श्रुत्वा गोपायनं च कुलवध्वाः । संयमयोगैरात्मा निरन्तरं व्यापृतः कार्यं (प्रशम०) इति ।। न चास्वाध्यायितस्य जीवादितत्त्वज्ञानमपि, सम्यग्दर्शनमूलस्य ज्ञानस्याभावान्न स्यादेव च संयमो यदाहुः परमर्षयः-

---

[1] अज्ञानी किं करिष्यति किं वा ज्ञास्यति छेकपापकम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ 'जो जीवेवि न याणाइ अजीवे वि न याणइ।
दोवि एए अयाणंतो कहं सो नाहिइ संजमं' ॥१॥

दूरे तु वार्त्ता संयमस्य। यतो ॥ 'नादंसणिस्स नाणं नाणेण विणा न हुंति चरणगुणा'। इतिवाक्यमकलङ्कज्ञानोद्भूतं वज्रलेपवदवाध्यम्। ज्ञानाभावान्न स्यादेव च संयमः। सति ज्ञाने च यावल्लोकाग्रस्थत्वेन शाश्वतसिद्धत्वापत्तिः सुतरामेव। तदिदमाहुः श्रुतकेवलिपादाः—

॥ जो जीवेवि वियाणाइ अजीवेवि वियाणइ। तया गइं वहुविहं सव्वजीवाण जाणइ।१। यावत् 'तया लोगमत्थयत्थे सिद्धे हवइ सासए'त्ति वचनात्। अवगाह्यमाने च नवनवे श्रुतेऽपूर्वसंवेगवर्धकेऽवश्यं विशुद्धभावनाकः स्याद्। अनवगाह्यमाने च तस्मिन् प्रमादादिना प्रतिसमयमनन्तानन्तज्ञानावृत्यादिकर्मोपार्जनान्न कथञ्चनाप्यभिलषितो भवनिस्तारोऽवाप्नुयादिति सूत्रार्थग्रहणलक्षणग्रहणशिक्षाया आवश्यकत्वम्। प्रतिलेखनानिरपेक्षस्य तु कथङ्कारं संयमवार्त्तापि, दुराराधकत्वात्तस्य। यदाहुश्चरमश्रुतकेवलिनोऽष्टमाध्ययने सामाचार्यां दशाश्रुतस्य '॥ अप्पडिलेहणासीलस्स अप्पमज्जणासीलस्स। यावत् संजमे दुराराहए भवइ'त्ति। दुर्लभा च सुगतिरपि तादृशस्य सुखशातान्वेषिणो मुन्याभासस्य।

॥ यो जीवानपि न जानाति अजीवानपि न जानाति।
द्वावपि एतौ अजानन् कथं स ज्ञास्यति संयमम्॥

॥ नादर्शनिनो ज्ञानं ज्ञानेन विना न भवन्ति चरणगुणाः।

॥ यो जीवानपि विजानाति अजीवानपि विजानाति। तदा गतिं वहुविधा सर्वजीवानां जानाति॥१॥ तदा लोकमस्तकस्थः सिद्धो भवति शाश्वतः।

॥ अप्रतिलेखनाशीलस्य अप्रमार्जनाशीलस्य संयमो दुराराधो भवति।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

यत आह– ॥ 'सुहसायगस्स समणस्स सायाउलगस्स पगामसाइस्स । उच्छोलणापहोयस्स दुलहा सुगई तारिसगस्से'ति वचनादनतिलङ्घनीया प्रत्युपेक्षणादिलक्षणाऽऽसेवनशिक्षा । प्रतिक्रमणादि तु गृहीतव्रतपरिशोधकत्वेन न कथञ्चिदप्युपेक्षणीयमिति । यद्वा-न क्रोधादिकारणेऽप्राप्ते धृते क्षान्त्यादिकेऽज्ञानिकृतकरणो धर्तुमात्मानमलं परीषहादिप्रसङ्गे इति ज्ञानकृतकरणताप्त्यायवश्यं स्वीकार्या शिक्षेति हेत्वर्थं चकारं चकारः । 'एतस्ये'ति । समीपतरैकादश्यां विंशिकायां निरूपितस्य भिक्षोः । अनेन अवाप्तमूलोत्तरगुणशुद्धिकस्यैव शिक्षाया योग्यतेति ज्ञापयति । न हि क्रोधादिदूषितचेतस्कोऽवाप्नोति योग्यतां शिक्षायाः, तस्य विपत्तिव्रातयोग्यत्वाद् । यत आह-चित्तरत्नमसङ्क्लिष्टमान्तरं धनमुच्यते । यस्य तन्मुषितं दोषैस्तस्य शिष्टा विपत्तयः ॥१॥ (अष्टके) न च वाच्यं प्रतिक्रमणाद्यासेवनाशिक्षायोग्यता मा भवतु परं सूत्रार्थग्रहणशिक्षायोग्यता न कथं घटाकोटिमाटीकते । यतो नाज्ञानमृते कष्टं कष्टतरं किञ्चित्, । क्रोधादिभ्योपि तस्य पापीयस्त्वात्तदुक्तम्–अज्ञानं खलु भो ! कष्टं क्रोधादिभ्योऽपि तीव्रपापेभ्य'इति : नानवाप्ते च ज्ञाने नश्यति कदाप्यज्ञानमिति । पापीयस्त्वेऽपि क्रोधादिभ्योऽज्ञानस्य न क्रोधाद्यपगमाभावे बोधसम्पद् समुल्लसति चित्ते । नहि मलीमसे भाजने पच्यमानः पाकः पुष्टिपरायणः स्यात् । अत एव तस्य धर्ममात्रेप्ययोग्यताभिहिताऽऽप्तैः–'धर्मस्य दयामूलं न चाक्षमावान् दयां समाधत्ते । तस्माद्यः क्षान्तिपरः स साधयत्युत्तमं धर्म' (प्रशम०) मिति । आस्तामन्यत्, यावत्तस्योपदेश्यतापि नाभिमता आगमग्रन्थे–

॥ सुखास्वादकस्य श्रमणस्य साताकुलस्य प्रकामशायिनः ।
उच्छोलनाप्रधाविनः दुर्लभा सुगतिस्तादृशस्य ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ रत्तो दुट्ठो मूढो पुव्वि वुग्गाहिओ य चत्तारी । उवएसस्स अणरिहा ' इत्यादिवाक्यप्रबन्धेन निषिद्ध एव तस्मै उपदेशोऽपि । ॥ ' क्षान्ताय दान्ताय जितेन्द्रियाय मां दद्या'इति लौकिका अपि । न च देशविरताय तत्प्रदाने का हानिरिति । नोच्यते तस्मै न कापि ग्रहणशिक्षा न देया, किन्तु देयैव, परं यथायोग्यम् । न हि सर्वः सर्वस्याधिकारी । अनधिकारविहितश्च न श्रेयसे स्वपरयोः 'अधिकारिवशाच्छास्त्रे धर्मसाधनसंस्थिति' रितिवचनात् । अधिकारश्च न प्रव्रजितमात्रेणाप्याप्यते किं पुनरितरेण । तस्यापि पर्यायक्रमेणैवाधीतियोग्यता समाम्नाता यतः । अर्हति चैतदेव निश्रेयसाभिलाषुकानां, यतो नाक्रममभ्यासोऽपि हितावहः । न चोत्सर्गापवादमयोऽध्वा धैर्यव्रतादिचरणहीनैः सुखेनेतरथा वा गम्यते । नहि सदाचारावाप्तिमन्तरा प्रकृष्टः सदाचारः परिणमति कस्यापि । अत एवागारिणो न विशेषसूत्रार्थयोग्यता, तस्यारम्भपरिग्रहमग्नत्वेन सिद्धान्तवाक्यानां परिणामाभावात् । नह्यामे घटे निदधाति विधानविज्ञः पयः । शास्त्रं चाश्रवहानि-संवरोपादानायैवोपादीयते । न चात्यक्तारम्भादेः समस्ताविरतिमतस्तद्गुणाय तत्स्यात्, प्रत्युत कथाश्रवणमात्रेण तत्पुष्टय एव भवेदिति सुष्ठूक्तं-'भिक्षोः शिक्षा द्विविधे'ति । इति त्रयोदशगाथार्थः । त्रयोदश्यां विंशिकायां 'भिक्षाया विधिः शुद्ध' इति । भिक्षणं भिक्षा 'भिक्षि याञ्चाया' मितिवचनात् मधुकरोपमया गोचरोपमया वाऽटनं भिक्षा । अनेन स्वयं पाकित्वाभावमाह । न विरतानां हनन-पचन-क्रयणकोटिरहितमाहारमन्तराऽन्यः कोऽप्यर्हत्याहारोऽभ्यवहार्यतायै । लौकिका अपि मुनिवर्णनां वर्णयाञ्चक्रुः यद् – 'अनग्निरनिकेतः स्यात्

॥ रक्तो द्विष्टौ मूढः पूर्वं व्युद्ग्राहितश्च चत्वारः । उपदेशस्याऽनर्हाः ।
॥ विद्यादातारं गुरुं प्रति विद्यार्था वचनमिदम् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मुनि'रिति । स्वयं पाकित्वाभाव एव भव्यः । अन्यच्च भिक्षाशब्देनैकपिण्डाभावोऽपि व्यक्तीकृतः सूरिणा, तथाभाव एवाहारशुद्धिभावाद् । अन्यथा त्वाहारस्याधाकर्मत्वादिदोषदुष्टत्वेनानुपादेयत्वात्तस्योपादाने तु हिंसाद्यनुमत्या सप्तानां वाऽष्टानां कर्मणां-ह्रस्वस्थितिकानां दीर्घस्थितिकत्वभावात् यावन्निधत्तभावात् संयमफलफल्गुतापातः स्पष्ट एव सूत्रेऽभिहितः । लौकिका अप्याहुः-'एकान्नं नैव भुञ्जीत बृहस्पतिसमादपी'ति । शिक्षाविंशिकानन्तरं भिक्षाविंशोधिभगनेन सर्वसम्पत्करीभिक्षासम्पन्नतामाह शिक्षायुतस्य । यदाह- यतिर्ध्यानादियुक्तो यो गुर्वाज्ञायां व्यवस्थितः । सदानारम्भिणस्तस्य, सर्वसम्पत्करी मता ॥१॥ वृद्धाद्यर्थमसङ्गस्य भ्रमरोपमयाऽटतः । गृहिदेहोपकाराय, विहितेति शुभाशयात् ॥२॥ (अष्टके) न चानेवंविधस्य सर्वसम्पत्करीसम्भवोपीति । भवति च भिक्षोर्भिक्षामात्रोपजीविता । यदाह- 'महाव्रतधरा धीरा भैक्षमात्रोपजीविन' (योगशास्त्रे) इति । तस्या विधिः- आधाकर्मादिषोडशोद्गम-धात्र्यादिषोडशोत्पादना-शङ्कितादिदशकैषणादोषवर्जनेन प्रासुकैषणीयादिग्रहणरूपः । एवंविध एवैषणासमितिविषयः । यदाह- 'द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् । मुनिर्यदन्नमादत्ते, सैषणासमितिर्भवेद् (योग०) इति । अनेन ये एकत्रैव गृहमेधिगृहे आदत्तेऽन्नादि गृह्णाति च सचित्तमुदकं, लेलिप्यन्ते च पुरःकर्म-पश्चात्कर्मदोषलेपेन ते साधुत्वभ्रष्टा निर्धर्माणोऽवबोद्धव्या इति स्पष्टं दरीदर्शयति । ॥ 'पिंडं असोहयंतो अचरित्ती इत्थ नत्थि संदेहो'त्तिवचनात् । 'से संजए समक्खाए निरवज्जाहार जे विऊ। धम्मकायठिए सम्मं'तिवचनाच्च । न च वाच्यं तत्कतमेन दोषेणावगुण्ठितं कृतकारितानुमतीनामिति । अनिषिद्धस्य तावदनुमतित्वात्

॥ पिण्डमशोधयन् अचारित्री अत्र नास्ति सन्देहः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

किं पुनस्तद्ग्रहणस्य। अत एवाद्याङ्गे शीतार्दितसाधुपीडाप्रहाणकृतानलारम्भादिनिवारणोपदेशकरणाख्यानं सङ्गच्छते। असौ विधिर्न यथाकथञ्चिदित्याह- 'शुद्ध'इति। अकृताकारितासङ्कल्पितपिण्डग्राहिणो हि भिक्षाविधिः शुद्धो भवति। न च स्वपरार्थंयत्नकारकसद्गृहस्थगृहेषु भिक्षाग्रहणे विधिशुद्धिर्नैव भवेत्, असङ्कल्पितस्य दानाभावात् पुण्यार्थप्रकृतस्यापि परित्यागोपदेशाच्च। न च विशेषकल्पन एव दुष्टतेति वाच्यम्। यावदर्थिकान्नपानादेरपि परित्याज्यतयोपदेशादिति वाच्यम्। मुन्यागमनाभावे सूतकादावपि च तैः पाकस्य निर्वर्त्तनात् स्वभोग्याद् भिन्नस्य तथाकल्पने दुष्टत्वात्, स्वोचितारम्भे तु तथाभावनं न दोषास्पदम्। नहि कोपि प्रमायाहारं तावन्मात्रमेव निष्पादयति, यावता स्वभृतिः प्राघुर्णकाद्यागमे नवीनं च पाकं करोति। न चानुद्धृतान्नपानानि भवन्ति गृहस्थगृहाणि, येन शुद्धान्नपानान्वेषिणोपि मुनेः स्यात् सङ्कल्पितदुष्टताऽऽहारस्य। अतएवोपमानं भ्रमरेण। यन्न तत्कृते कोपि महीरुहादि वपति रक्षति वा, न चासौ क्लामयति रसादानेन पुष्पाण्यपि। यद्वा-'शुद्ध'इत्यनेन सम्भवमाह पूर्वोक्तप्रकारस्य। यतो न ब्रूते यतिमूर्धन्योऽवलोकितचराचरस्वभावोऽर्हन्नृतं, रागद्वेषमोहलक्षणानृतकारणाभावात्। असुलभलाभता चास्यैवं वधस्य भूषणमेव भावितात्मनो यतेः, न तु दूषणम्। नहि सुकरो यतिधर्मश्चेदेवंविधः स्याद् न स्यादतिगूढरूढकर्मनिचयानां निर्दारकः। विधानमेतद्वस्त्रादीनां, यतस्तान्यपि शुद्धान्येव ग्राह्याणि। यद्वा-नैषा षष्ठी। किन्त्वादिशब्द एषः। तथा च भिक्षादिविधिः। आदिशब्दो न केवलं द्विचत्वारिंशता दोषैरदुष्टमन्नपानादि गृहीतमिति पूर्णता विधेः, किन्त्वङ्गारधूम्रादिदोषाणां ग्रासैषणाविषयाणामपि परिहारः कार्य एव इति दर्शनाय। यदाह –

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ 'बायालीसेसणसंकडंमि गहणंमि जीव नहु छलिओ। संपइ मा हु छलिज्जसु भुंजंतो रागदोसेहिं'॥ ति वचनात्। यद्वा'शुद्ध'इत्यनेन षट् कारणानि ज्ञापयत्याहारस्य, यन्नैष वर्णबलाद्यर्थं गृह्णात्याहारं किन्तु विनयाद्यर्थमेव। अन्यथा तु विधिगृहीतो भुक्तोऽपि च विधिना न संयमवृद्धये किन्तु प्रमादपरिष्टब्धान्तःकरणतया लेपायैव। अत एवाहुः भोजनावसरे भावनामयं गाथोच्चारणं विज्ञाः –

॥ अहो जिणेहिं असावज्जा वित्ती साहूण देसिया। मोक्खसाहणहेउस्स साहुदेहस्स धारणा॥इति। विनयादेश्च परमपथपरमसाधनत्वेन तत्कारणकैकभक्ताहारस्योत्सर्गता उपवासादेश्चापवादता जगदिरे ग्रन्थकारैरेवाभियुक्तैरन्यत्र। ॥ 'अहो! निच्चं तवोकम्मं एगभत्तं च भोयणं'ति परमर्षिवाक्यमपि। संशयित एवासावर्थो यदुत-आहारो नित्यो नैमित्तिको वा? अनयोः परस्परविरुद्धत्वादितिचेद्। अत्र केचित् ॥ 'जइ तेणेव संथरइ'त्ति सिद्धान्तात् स्वाध्यायादीनां नित्यत्वात्तदर्थाहारादेर्नित्यतैव। अत एव च 'अहो निच्चं'ति। 'वेयणवेयावच्चे' इति तु कर्त्तव्यतोपदर्शकमिति नास्य नैमित्तिकता। अपरे त्वेकभक्तातिरिक्तस्य नैमित्तिकतामेकभक्तस्य तु नित्यतामाहुः। न चोपवासादिदिने नित्यताहानिः, न च न कर्त्तव्यमुपवासादि, तदकरणे प्रायश्चित्तोपदेशात्। यदाहुः- ॥ पक्खियचउम्मासियसंवच्छरेसु चउत्थछट्ठट्ठमं न करेइ पच्छित्तं। इत्यादीतिवाच्यम्।

॥ द्विचत्वारिंशदेषणासङ्कटे ग्रहणे जीव? नैव छलितः।
सम्प्रति मैव छलयेथा भुञ्जानो रागद्वेषाभ्याम्॥

॥ अहो! जिनैरसावद्या वृत्तिः साधूनां देशिता।
मोक्षसाधनहेतोः साधुदेहस्य धारणाय॥

॥ अहो! नित्यं तपःकर्म एकभक्तं च भोजनम्। ॥ यदि तेनैव संस्तरति।

॥ पाक्षिक–चतुर्मास–संवत्सरेषु चतुर्थषष्ठाष्टमं न करोति प्रायश्चित्तम्।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अपवादेनोत्सर्गस्य सङ्कोचनियमात् । अत एव चाहाराभावकारणदर्शनमपि सङ्गच्छते सूत्रकाराणाम् । अत्र महाशयाभिमतमिदं यदुत-उपवासादेः पाक्षिकादिनिमित्तोद्भवतया नैमित्तिकता निर्विवादा एकभक्तस्य नित्यतापि च 'निच्चं'तिवचसो निर्विवादैव, परं षाण्मासिकतपश्चिन्तनाहारकारणदर्शनद्वयं क्रमेण वीर्योल्लासायाधिकभक्तपरित्यागायोपदिष्टं ज्ञातव्यम्। अत एव चाहाराभावकारणदर्शनसाफल्यमपि मोक्षसाधनहेतोर्धर्मकायस्य धारणायाहारोपदेशाद् यावत्संयमसम्पत्तिस्तावन्नित्यतैवास्य । व्यक्तश्चायमभिप्रायो ॥ 'जाव लाभं वूहइत्ता' इति 'जा य लज्जासमा वित्ती'ति च पदप्रबन्धेन । तत्त्वमत्रत्यं बहुश्रुता एव विदन्तीति । अलं प्रसङ्गानुप्रसङ्गेन । प्रस्तुतं प्रस्तूयते ।

चतुर्दश्यां विंशिकायां पुनः 'तदन्तरायाः' तस्याः पूर्वोक्तप्रकाराया भिक्षाया, अन्तरायाः- विघ्नानि, भवन्ति हि विघ्नानि श्रेयसि प्रवृत्तानां महतामपि 'श्रेयांसि बहुविघ्नानि भवन्ति महतामपि' इतिवचनात् । श्रेयोभूतश्च शुद्धो भिक्षाविधिः । अत एव भिक्षायाः तपस्तयाख्यानं सङ्गच्छते । प्रतिबन्धकैकलक्षणत्वाद्विघ्नानामुद्गमोत्पादनैषणात्रये द्विचत्वारिंशद्दोषाः प्रतिबन्धका एव । यन्न तेषु दोषेषु सत्सु गृह्यतेऽन्नपानादि तद्वत् । अत एव च तन्निराकरणाय यतिदिनचर्यादौ भिक्षागमनप्रारम्भे गौतमस्तुतिपठनविधानं पञ्चवस्त्वादौ मङ्गलपाठोच्चारणनिर्देशश्च युक्तियुक्तो भवति, तस्यैव परमार्थतो मङ्गलत्वात् । दुरितनिवृत्त्यसाधारणकारणत्वस्यैव तल्लक्षणत्वात् । कारणता च भावविशेषरूपेणेति नात्माश्रयः । तथा चोत्तमकार्यवत् सम्भवेऽपशकुनस्य

॥ यावल्लाभं व्यूहत्य । या च लज्जासमा वृत्तिः।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

पुनर्मङ्गलादिविधानं युक्त्यनतिवृत्ति । न च वाच्यं सर्वज्ञो यदि भिक्षामटति तदा कथङ्कारं विघ्नास्तदपहारः शुद्धभिक्षालाभश्च सम्भवति । यतः प्रतिहताखिललाभादिविघ्नत्वेन न तत्प्रादुर्भावस्तदभावे कुतस्त्नमां तदपहारः । शुद्धभिक्षालाभश्च करामलकवद्जगत्त्रयस्य साक्षादवलोकितत्वादावश्यकवायुकायविराधनासद्भावात् अतीतानागतस्वरूपावलोकनाच्च न कथञ्चनापि सम्भवतीति । यतो यद्यपि जयन्यतः कोटाकोटीसुरसेवितचरणपद्मः केवलोत्पादानन्तरमेव स्थापिततीर्थतीर्थतया अनेकयोगीन्द्रसेवितक्रमसरोरुहः न कदाचनाप्यटति भिक्षायै, तथापि यावत् सर्वज्ञं नाटनाभावो भिक्षायै, परं समूलघातं घातिताखिलघातिकर्मतया न तेषामन्तरायोद्भवः, न च तदुपशमनाय मङ्गलादिकरणं भिक्षालाभश्च तेषां भवत्येव, सकलाविकलाचाराचरणपटुशासनालम्बनीभूतश्रुताप्रामाण्यनिवारणाय श्रुतोपयोगेन गृह्णीयुः यतस्ते ॥ 'ओहेसुओवउत्तो' इतिवचनात् । न च ॥ 'नट्ठंमि छाउमत्थिए नाणे'त्तिवचनात्कथं तेषां अवलोकितलोकालोकवस्तूनां केवलवेदसा केवलिनां सम्भवति श्रुतोपयोग इति वाच्यम् । नहि समुत्पन्ने केवले श्रुतोपयोगो नष्टस्तथा सति तेषां तावदज्ञानेनासर्वज्ञापतेः, तैरेव तत्प्रणयनात् तत्प्रणीतत्वेनैव च श्रुतस्य प्रामाण्योपपत्तेः । 'परलोकविधौ मानं वचनं तदतीन्द्रियार्थदृग्व्यक्त'मितिवचनात्, किन्तु केवलज्ञानावरणावृतजीवसूर्यनिर्गतमन्दप्रकाशोद्भवतया यच्छाद्मस्थिकत्वं तन्नष्टम् । तथा च न तस्य क्षायोपशमिको भाव इति । अत एवात्र 'ओहे'त्ति सामान्यार्थकं पदम् । यथाहि मतिश्रुतोपयुक्तो ओघेन सर्वाणि द्रव्याणि जानातीत्यादि वर्ण्यते तथैवैषोऽत्र श्रुतोप-

॥ ओधे श्रुतोपयुक्तः ॥ नष्टे छाद्मस्थिके ज्ञाने ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

योगे न तस्य वाच्यवाचकभावानुसन्धानेन श्रुतोपयुक्तता विद्यते, येन क्षयोपशमोद्भवता मतिपूर्वकता च व्यवस्थाप्येत। ये चोत्पादे केवलस्याहुर्नाशं छाद्मस्थिकज्ञानानां, तेऽपि पूर्ववदेव, न तज्ज्ञेयार्थज्ञानशून्यताऽरूपेण। निरुपयोगितावादिनोप्येतेनैव प्रकारेण प्रकाशयन्त प्रकाशमप्रकाशमिति न किमपि वाच्यं वाक्तत्त्वविदुषाम्। अत एव च दीर्घदृष्टिदूरीकृताखिलवाचाटविघ्नैरभियुक्तैराचाराचरणे व्यवहारप्राबल्यं जेगीयते- ☆ 'ववहारोवि हु बलवं जं छउमत्थंपि वंदए अरिह'त्ति वचनात् भण्यते च- ※ 'ववहारनउच्छेए तित्थुच्छेओ जओवस्सं'ति च। नं चैवं दुर्नयप्रवृत्तिःनिश्चयनिरपेक्षत्वासिद्धेस्तद्दृष्टिमयत्वाद्धृदयस्य। गौणमुख्यताधारणं तु तत्त्वतयाभिप्रेतमत्रेति न कश्चिद्दोषावकाशः। वस्त्रान्तराया अप्येवमेव नेयाः। यद्वा-न तदन्तराया भिक्षान्तरायेभ्यः पृथक्, तदन्वेषणाया अपि भिक्षाया अव्यभिचारित्वात्। अत्र पक्षे आदिशब्देन ग्रासपरिभोगादिविधिशुद्धताऽवगन्तव्या। ग्रासादावपि च सागारिकादयोऽन्तरायाः सन्त्येव। ज्ञातव्याश्चोपलक्षणतस्तेपि। न चात्र तच्छब्देन भिक्षापरामर्शोऽयुक्तः'तस्या भिक्षादिविधिः शुद्ध' इतिपक्षे गौणीभवनात् समासेन, परामृश्यते च चेन्मुख्यमिति वाच्यम्। गौणस्यापि क्वचित् परामर्शदर्शनात्। यथा 'सम्यग्ज्ञानपूर्विका पुरुषार्थसिद्धिः तच्चाविसंवादी' त्यादौ गौणस्यापि सम्यग्ज्ञानस्य परामर्शात्। अन्तरायताकथनं चैहिकाभीप्सितमात्रविघ्नकारित्वात्। नातिचारादिवदुभयत्र विघ्नविधानपटुत्वेनात्मगुणावारकत्वेन वेति। अत एव तच्छब्दप्रयोगः। तेन भिक्षाया

☆ व्यवहारोपि बलवान् यत् छद्मस्थमपि वन्दतेऽर्हन्।

※ व्यवहारनयोच्छेदे तीर्थोच्छेदो यतोऽवश्यम्।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अग्रहणे एव तेषां पर्यवसानं, नाग्रतः। यद्वा-भिक्षाया एव योजनाय तच्छब्दप्रयोगः, अन्यथा विधिशब्दपरामर्शेन विघ्यन्तराया अधिकृताः स्युः। ते च प्रत्यपायाः प्रायश्चित्तार्हा एव। शोधिश्च तेषामवश्यं कर्त्तव्या स्यादिति। बहुवचनं चान्तराय-बहुत्वख्यापनाय। तेन च ज्ञापयति पिण्डैषणादिप्रवीणस्यैव भिक्षाटननिर्गमनादियोग्यता॥ 'अणहीया खलु जेणं पिंडेसण-सिज्ज-वत्थपाएसा। तेणाणीयाणि जइणो कप्पंति ण पिंडमाईणि'त्तिवचनात्। चतुर्दश्यां विंशिकायां 'अशुद्धिलगने आलोचनाविधानं' तत्राशुद्धयः-अतिक्रमव्यतिक्रमातिचारानाचाराः। अतिक्रमादिस्वरूपं चाधा-कर्माश्रित्यैवं भणितम्- '॥ आहाकम्मामंतण पडिसुणमाणे अइक्क-मो होइ। पयभेयाइ वइक्कमो गहिए तइओयरो गिलिए' ॥१॥ तथा सर्वत्रापि ज्ञातव्यम्। तासामापत्तौ न हि यावत्कषायसमुदयोऽस्ति, तावदतिचारासम्भवस्तदुद्भवत्वात्तेषां, ≑ 'संजलणाणं उदए अइया-र'त्तिवचनात्। अन्येषां तूदये मूलच्छेद्यमेव। एतच्च सर्वविरत्य-पेक्षयैव। ननु बाहुबल्यादीनां वर्ष यावन्मानस्थितिश्रुतेः सञ्ज्व-लनकषायस्य च पक्षस्थितिनियमात् कथमेतदिति चेद्। अत्र केचित् सञ्ज्वलनस्याप्यनन्तानुबन्ध्यादिभेदभिन्नत्वादप्रत्याख्यानवत्सञ्ज्व-लनोदयान्न वर्षस्थितिविरोधः। एतदेव सञ्ज्वलनत्वं, यदुत-वचनमात्रं प्रतिबोधहेतुः। न चैवंविधः स्वतन्त्रोऽप्रत्याख्यानः। अन्ये तु पक्षादिस्थितिनिरूपणं व्यवहारनयेन मध्यमापेक्षयैव। तेन न वर्षावस्थानमात्रेणाप्रत्याख्यानतेति। एवमेव प्रसन्नचन्द्रर्षेरपि।

≑ अनधीता खलु येन पिंडैषण–शय्या–वस्त्र–पात्रैषणा।
तेनानीतानि यतेः कल्पन्ते न पिण्डादीनि॥

॥ आधाकर्मामन्त्रणं प्रतिशृण्वति अतिक्रमो भवति।
पदभेदादौ व्यतिक्रमो गृहीते तृतीय इतरो गिलिते॥

॥ सञ्ज्वलनानामुदये अतिचाराः।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नहि तयोरेकतमकषायोदयेपि संयमस्थानाभावः (न)। न चाप्रत्याख्यानकषायोदयेऽवाप्यते एकमपि संयमस्थानम्। केचित्तु परिणामपरावृत्तेः स्वाभाविकत्वाद् भवतु तदानीं यथाकालस्थितिकषायोदयः, अन्यथा ममतामात्रमृतसंयमभावाया निर्ग्रन्थ्याः क्रोधमात्रविहितानर्थपरम्परयोश्च कुरुटोत्कुरुटयोः क्रमेण तिर्यग्योनिषु नरके चोत्पादो न कथञ्चनापि जाघटीतीति। सततोपयुक्तस्यापि साधोरनुपयोगादिना विराधनादिभावाद्। यदीर्यासमितेनावेक्ष्य पादास्पदमुत्पाटितः पादो दृष्टश्च कश्चिज्जन्तुर्न च निवर्त्तयितुं शक्नोति पादं तदा सहस'त्कारः। एवमनाभोगाद्यपि ज्ञेयम्। न च सहसाकारवतो निर्दोषत्वात्कथं अतिचारतेति वाच्यम्। प्रसङ्गादिदोषरक्षणाय तत्करणात्। यथाहि-प्रत्याख्याने सहसात्कारानाभोगादयो मुत्कलतया स्थापिता अपि तदाचरणे निःशूकतापरिहाराय आचार्यते आलोचनादि। तद्वदत्रापि। न चैवमाकुट्टिप्रमाददर्पकृतानां नालोचनेति ध्येयम्। यत आपन्नप्रायश्चित्तस्यालोचनादिविधाननियमात्। न चैतादृशस्य संयम एवापगच्छति यतस्ततः किमालोचनादिना? संयमशुद्ध्यर्थत्वात्तस्य, संयमाभावे च कस्य शुद्धिर्विधीयेत। न भवति च ग्रामाभावे कदापि सीमेति। यावन्मूलच्छेद्यापत्तिर्न, तावत् संयमस्थितेः, मूलच्छेदापत्तावपि प्रायश्चित्तमाचचरिषोरालोचनाविधातुः स्यादेव संयमस्थितिः, आलोचनापरिणतस्यानालोचनेऽपि भावशुद्ध्या आराधकत्वात्। तदाह- ॥ आलोयणापरिणओ सम्मं संपट्ठिओ गुरुसगासे। जइ अंतरावि कालं करिज्ज आराहओ तहवि ॥१॥ तत् कार्यैवालोचना

॥ आलोचनापरिणतः सम्यक् सम्प्रस्थितो गुरुसकाशे।
यदि अन्तरापि कालं कुर्याद् आराधकस्तथापि ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

आपन्नदोषेण सर्वेणापीति । आङ् मर्यादया ॥ 'आलोयणानिमित्तं खित्तंमि सत्त जोयणसयाइं । काले बारस वासा गीयत्थगवेसणं कुज्जा, ॥१॥ इतिगवेषणे । तत्रापि गीतार्थस्य पुरतः, यतः- ॥ 'नासेइ-अगीयत्थो चउरंगं सव्वलोयसारं जं । नट्ठंमि उ चउरंगे न हु सुलहं होइ चउरंगं'॥ति । तत्रापि व्रतसम्पन्नस्य । आह च-॥ 'अखंडिय चारित्तो वयगहणाओ हविज्ज जो निच्चं । तस्स सगासे दंसणवयगहणं सोहिगहणं च' ॥१॥ अभिविधिना वा सर्वातिचारप्रकटनादिना, यदाह-॥एवंविहगुरुपासे लज्जागारवमोह मोत्तूणं । सव्वंपि भावसल्लं उद्धरियव्वं जओ भणियं ॥१॥ 'जहवालो' इत्यादि । संवेगमुद्वहता प्रायश्चित्तापत्तिपरितप्तहृदयेन लोचना-गुरोः पुरतः प्रकाशनमालोचना, तस्या विधानं-करणं स्वयमिति अध्याहार्यम् । परानुवृत्त्याद्यनुष्ठानमात्रस्याशुद्धत्वात् । भवति चैवमालोचनाविधाने पापप्रलयः । यदाह – ॥ 'अन्नाणदोसवसओ काऊण वि अणेगगरुयपावाइं । सम्मं आलोयंतो सव्वंपि छउलए जीवो' ॥१॥ इतिवचनात् । अन्तःशल्यश्च लक्ष्मणेवावाप्नोति घोरतपश्च-

---

॥ आलोचनानिमित्तं क्षेत्रे सप्त योजनशतानि ।
काले द्वादश वर्षाणि गीतार्थगवेषणं कुर्याद् ॥१॥

॥ नाशयत्यगीतार्थः चतुरङ्गं सर्वलोकसारं यत् ।
नष्टे तु चतुरङ्गे नैव सुलभं भवति चतुरङ्गम् ॥

॥ अखण्डितचारित्रो व्रतग्रहणाद् भवेद् यो नित्यम् ।
तस्य सकाशे दर्शनव्रतग्रहणं शोधिग्रहणं च ॥१॥

॥ एवंविधगुरुपार्श्वे लज्जागौरवमोहं मुक्त्वा ।
सर्वमपि भावशल्यं उद्धर्तव्यं यतो भणितम् ॥१॥

॥ अज्ञानदोषवशतः कृत्वापि अनेकगुरुकपापानि
सम्यगालोचयन् सर्वमपि ह्रासयति जीवः ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रणोऽपि दुरन्तसंसारकान्तारभ्रमणम् । अतो दातव्या आलोचना यथाविधि गुणगुरुभ्यो गुरुभ्यः । दत्तायां चालोचनायां च निश्यात्वादिशल्यनाशोऽपरश्च स्यादृजुभावः । ततश्च धर्मशुद्धयवाप्तिः यदाह-नाऽनार्जवो विशुद्ध्यति न धर्ममाराधयत्यशुद्धात्मेतिवचनात् । आलोचनाया ऋजुताभावप्राप्तिश्च स्पष्टमेव भणिता परममुनिभिः। तदाहुरुत्तराध्ययनेषु-॥ 'आलोयणाएणं मायानियाणमिच्छादंसणसल्लाणं मोक्खमग्गविग्घाणं अणंतसंसारवद्धणाणं उद्धरणं करेइ, उज्जुभावं च जणयइ । उज्जुभावपडिवण्णएणं जीवे अमाइ इत्थीवेयं नपुंसगवेयं च न बंधइ, पुव्ववद्धं च णं निज्जरेइ'त्ति । अत्रेदमवधेयम्-पूर्वबद्धमपि प्रतिसेवनावसरेऽशुभं कर्म निर्जरयत्येवालोचना, तपसा भावशुद्धेश्चान्यदपि पूर्वोपात्तं निर्जरयति,अनालोचयंश्च शल्यत्रययुक्ततयाऽवाप्नोति धर्मपातेनानन्तपापराश्युद्भवस्त्रीवेदनपुंसकवेदवत्तामिति सुष्ठूक्तम्-'अशुद्धिलगने आलोचनाविधान'मिति । न च वाच्यं भवत्वनाचाराणामालोचना,अतिक्रमादेस्तु यथा तथा भावित्वेन कथं सेति ! । तेषामपि पापप्राबल्यापादनपटुत्वादाऽऽदेयैव । नहि लक्ष्मणाया अनाचारः कश्चनापन्न इति विचार्यं विचारवता स्वयम् । अनालोचितदुष्प्रतिक्रान्तानां च विपाकविरसता तत्र तत्र प्रसिद्धैवेति विधेयैवालोचनाऽऽत्मशुद्धयर्थिना । सा चातिचाराणामनुलोमप्रतिलोमान्यतरतया यथोपयोगं कार्या । विहितायामप्यालोचनायां न प्रायश्चित्ताविधाने भवति शुद्धिरित्याह'प्रायश्चित्ताच्छुद्धिभावश्चे'ति । तत्रापराधपदापन्नानि पापानि छिनत्तीति प्रायश्चित्तं, प्रायेण वा चित्तं

॥ आलोचनया मायानिदानमिथ्यादर्शनशल्यानां मोक्षमार्गविघ्नानामनन्तसंसारवर्द्धनानामुद्धरणं करोति, ऋजुभावं च जनयति । ऋजुभावप्रतिपन्नो जीवः अमायी स्त्रीवेदं नपुंसकवेदं च न बध्नाति पूर्वबद्धं च निर्जरयति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

शोधयति कुत्सिताचरणजातमलिनसंस्कारवदिति प्रायश्चित्तम्। उभयत्रापि पृषोदरादित्वादिष्टरूपसिद्धिः। 'पृषोदरादय' (सि० ३।२।१५५) इति सूत्रमाकृतिगणसाधकं यतः। यद्यपि पूर्वोक्ताऽऽलोचनापि प्रायश्चित्तभेद एव 'आलोयणपडिक्कमणे'-त्यादिवचनादिति नार्थः पृथगधिकारेण, परमालोचनायाः प्राधान्य-ख्यापनार्थमवक्रतयाऽऽलोचनयत्नकरणज्ञापनार्थं सकलपापाचरण-जनितात्माशुद्धिप्रक्षालनप्रवीणप्रायश्चित्तासाधारणकारणताविकट-नाख्यानाय वैवमुपन्यासः। न सर्वाणि पापान्यालोचनामात्र-विशरारूणि किन्तु कानिचिदेव। यानि च नालोचनाविशरारूणि तेषामवश्यं विधातव्यैव शोधिरिति तच्छुद्धये प्रायश्चित्ताचरण-मावश्यकम्। दीयते चालोचितपापस्यालोचनाप्रायश्चित्तातिरिक्ता ते-ऽतिचारे प्रतिक्रमणादि,तप आदि वा। आस्तामन्यत्, अज्ञातातिचार-विशेषस्यापि दीयत एव तत्सम्भवेन, प्रत्यहं दिने चतुरुद्योतकरमानं प्रतिरात्रं पञ्चाशच्छ्वासमानं कायोत्सर्गं, पाक्षिके त्रिशतं, चतुर्मासे पञ्चशतं, वार्षिकेऽष्टसहस्रमुच्छ्वासानां चतुर्थषष्ठाष्टम-तपोपि क्रमेण प्रायश्चित्तम्। न चैतत् मिथ्यात्वनिबन्धनम्। ॥ 'अपच्छित्ते अ देइ पच्छित्तं'ति वचनादितिवाच्यम्। अप्रमत्तस्यो-पयुक्तस्यापि जघन्यतोऽप्येतावदापत्तेः। अत एव अन्यातिचारस्य पृथगालोचनाप्रायश्चित्तादि सङ्गच्छते। अगृहीते च प्रायश्चित्ते प्रतिसेवितप्रतिसेवानां गुणावृद्धिवक्रतानिर्धर्मतापत्तेः। तदुक्तम्-॥ 'अविसुद्धस्स न वड्ढइ गुणसेढी तत्तिआ ठाइ'त्ति अइयारं जो निसे-वित्ता पच्छित्तं नेव गिण्हए। अणुज्जुओ य तब्भावो निद्धम्मो सो ग-

॥ अप्रायश्चित्ते च ददाति प्रायश्चित्तम्।

॥ अविशुद्धस्य नैव वर्धते गुणश्रेणिः तावती तिष्ठति। अतिचारं यो निषेव्य प्रायश्चित्तं नैव गृह्णाति। अनृजुकश्च तद्भावो निर्धर्मा स गण्यते॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

णिज्जए'त्ति । प्रायश्चित्तदानं च न येन केनचिद् विधेयमनर्थपरम्पराभावात्, किन्तु गीतार्थेनैव, तद्दत्तप्रायश्चित्ताचरणादेव प्रतिसेवितातिचारशोधिभावात् । अत एव चागमश्रुतधारणाज्ञाजीतानां पूर्वपूर्वस्य प्रावल्यं जेगीयते गणभृदागमज्ञानाम्बुधितरण्डैः । अगीतार्थादालोचने तूभयोरनर्थश्रेणिः स्पष्टैव निरटङ्कि सिद्धान्तसुवर्णटङ्कनिकषैः । यदाह ॥दव्वं खित्तं कालं भावं पुरिसपडिसेवणाओ उ ।
नवि जाणेइ अगीओ उस्सग्गाववाइअं चेव ॥ १॥
जहठियदव्व न जाणइ सचित्ताचित्तमीसिअं चेव ।
कप्पाकप्पं न जाणइ जोगं वा जस्स जं होइ ॥२॥
जहठिअखित्तं न जाणइ अद्धाणे जाणवए अ जं भणिअं ।
कालंपि न विजाणइ सुभिक्ख दुब्भिक्ख जं कप्पं ॥३॥
भावे हिट्ठगिलाणं नवि जाणाइ गाढगाढकप्पं च ।
सहुअसहु पुरिसरूवं वत्थुमवत्थुं च नवि जाणे ॥४॥
पडिसेवणा चउद्धा आउट्टिपमायदप्पकप्पेसु ।
नवि जाणेइ अगीओ पच्छित्तं चेव जं तत्थ ॥५॥ (उपदेश०)
अयथार्हप्रायश्चित्तदाने मिथ्यात्वप्राप्तिस्तु निगदसिद्धैव । तदाह-

॥ द्रव्यं क्षेत्रं कालं भावं पुरुषं प्रतिसेवनाश्च ।
नापि जानाति अगीतार्थं उत्सर्गापवादिकं चैव ॥१॥
यथास्थितं द्रव्यं न जानाति सचित्ताचित्तमीश्रितं चैव ।
कल्प्याकल्प्यं च तथा योग्यं वा यस्य यद् भवति ॥२॥
यथास्थितं क्षेत्रं न जानाति अध्वनि जनपदे च यद् भणितं ।
कालमपि नापि जानाति सुभिक्षदुर्भिक्षं यत् कल्प्यम् ॥३॥
भावे हृष्टग्लानं न जानाति गाढागाढकल्प्यं च ।
सहासहपुरुषरूपं वस्तु अवस्तु च नापि जानीयात् ॥४॥
प्रतिसेवना चतुर्धा आकुट्टि-प्रमाद-दर्प-कल्पेषु ।
नापि जानाति अगीतः प्रायश्चित्तं चैव यत् तत्र ॥५॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

[1] 'सुत्ते अ इमं भणिअं अप्पच्छित्ते अ देइ पच्छित्तं ।
पच्छित्ते अइमत्तं आसायण तस्स महइओ ।१।
आसायण मिच्छत्तं आसायणवज्जणा उ सम्मत्तं । आसायणानिमित्तं कुव्वइ दीहं च संसारं ॥१॥ति । गृहीतुस्तु शुद्धयभावाच्छल्यत्रय-प्रसङ्गेनानर्थनिचयोऽनिवार्य एव । अत एव च सप्त योजनशतानि क्षेत्रतः, कालतो द्वादश वर्षाणि यावद् गीतार्थान्वेषणं सूत्रकृदभिहितं सङ्गतं भवति । न चान्तरा काले कृते का गतिः? भावशुद्धया सद्गति-भाजनत्वात्तस्य । ननु स एवाध्वाऽगीतार्थादप्यालोचने किं न ? इति चेत् न, मार्गविपरीतत्वेन परिणामासुन्दरत्वात्तस्य । सुन्दरभावो-त्पत्तये एव च साधिष्ठितप्रतिमा यावदपि विहितमालोचनाविधानं व्यवहारागमे व्यवहारकोविदैः । न चैवमाकलय्य दुर्लभतां सामग्र्याः कार्यः प्रमादः । तथा सति सशल्याख्येन दुष्टमरणेन कालभावा-पत्तेः । परत्र देवदुर्गतिगमनं विराधकभावेन दुर्लभबोधितां चाश्नुते तेन । तस्मान्निरूपितात् प्रायश्चित्तात् शुद्धिभावः । शोधनं शुद्धिः-अतिचारादिमलक्षालनान्निर्मलताऽऽत्मनः तस्या भावो-भवनं । नहि तत्र कल्पिता शुद्धिर्भवति, किन्तु यथार्थैवेति ज्ञापनाय भाव इति । न च वाच्यं प्रायश्चित्तविधानकालेऽतिचारासेवनेनैव तदा कर्मणां बद्धत्वादिकरणात् किं प्रायश्चित्तेन स्यादिति । यतोऽध्यवसाय-विशेषेण बन्धवत् क्षयस्यापि विधानं स्यादेव । न चास्ति सर्वं कर्मानुभावतो वेद्यमेवेति नृपाज्ञा । प्रदेशानुभवस्तु यथाकथञ्चित् प्रायश्चित्तग्रहण-तदासेवनकाले भवँश्च केन निवार्यते ? । न चैतत् स्वमनीषोज्जृम्भितम् । तथात्वेऽतिकष्टतमावस्थापत्तेस्तदुक्तम्-

[1] सूत्रे च इदं भणितं अप्रायश्चित्ते च ददाति प्रायश्चित्तं ।
प्रायश्चित्ते अतिमात्रं आशातनाः तस्य महत्यः ॥१॥
आशातना मिथ्यात्वम् आशातनावर्जनात् सम्यक्त्वं ।
आशातनानिमित्तं करोति दीर्घं च संसारं ॥१॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

॥ किं एत्तो कट्ठयरं सम्मं अणहिगयधम्मसब्भावो । अण्णं कुदेसणाए कट्ठयरागंमि पाडेइ'त्ति । किन्तु परममुनिमतानुसार्येवेदं यत्-आसेवितातिचारापादितबन्धभावानां कर्मणां प्रायश्चित्तात् क्षयः सम्पद्यते । तदिदमुक्तं पूज्यतमैः ॥ 'पायच्छित्तकरणेणं भंते ! जीवे किं जणेइ' गोयमा ! पायच्छित्तकरणेणं पावकम्मविसोहिं जणयइ निरइयारे आवि भवइ'त्ति । न केवलं प्रायश्चित्तविधानात् पूर्वाचरितातिचारशुद्धिमात्रं किन्तु मार्गतत्फलाचाराणां चाराधनापि तथैव भवति । यदाह ☆सम्मं च णं पायच्छित्तं पडिवज्जेमाणे मग्गं मग्गफलं विसोहेइ । आयारं च आराहेइत्ति । 'शुद्धिभाव ' इत्यनेनेदमपि ख्यापितम् । यदुत-येन भावेन यादृशेन विहितं प्रतिसेवनादि, तत्तथैवाऽऽख्यातं प्रायश्चित्तदातृभ्यस्तैस्तथैव दत्तं प्रायश्चित्तम्, आचीर्णं च ग्रहीत्रावश्यंभावी शुद्धिभावः । नात्र सन्देहो यन्मे शुद्धिर्जाता नवेति मालिन्यविधायी कार्यस्तथासति भावमालिन्याच्छुद्ध्यभावस्य नवीनबन्धस्य च प्रसङ्गादित्यलं प्रसङ्गेन । चकारः केवलं नापन्नानामतिचाराणामालोचनाविधानमेव शुद्धये, किन्तु प्रायश्चित्ताचरणमपि कार्यमेव तदर्थिना । अथवा चकारोऽवधारणे । स च बकुशकुशीलनिर्ग्रन्थयोर्मूलोत्तरगुणप्रतिसेवनाबाहुल्येपि शुद्धिभावं प्रायश्चित्तासेवातोऽवधारयति यत्-स्यादेव तद्विधाने शुद्धिभावः । इदमेव पार्श्वस्थावसन्नकुशीलादिकुगुरूणाम् एतयोश्चान्तरम् । तथा च येऽवोचुः-अतिचारबाहुल्यावलोकनेन साम्प्रतमुनीनां मुनित्वाभावं

॥ किं अस्मात् कष्टतरं सम्यग् अनधिगतधर्म सद्भावः ।
अन्यं कुदेशनया कष्टतरे पातयति ॥

॥ प्रायश्चित्तकरणेन भदन्त ! जीवः किं जनयति ? गौतम ! प्रायश्चित्तकरणेन पापकर्मविशोधिं जनयति निरतिचारश्च भवति ।

☆ सम्यक् च प्रायश्चित्तं प्रतिपद्यमानः मार्गं मार्गफलं विशोधयति आचारं च आराधयति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सम्प्रति । ते निरस्ता द्रष्टव्याः । एकविंशतिं वर्षसहस्राणि यावच्चरमजिनतीर्थप्रवर्त्तनवाक्यस्य वज्रलेपायमानत्वात् । न च ज्ञानदर्शनाभ्यां केवलाभ्यां तीर्थमिति वाच्यम् । ॥ 'न विणा तित्थं नियंठेहि'त्तिवचनात् । सर्वथा साधुत्वापलापे च ॥ 'जो भणइ नत्थि धम्मो' इत्यादिप्रबन्धेन तस्य सङ्घबाह्यकरणीयतापातादपलापिनः सूत्रानुसरेण । पञ्चदश्यां गाथायां सप्तदश्यां विंशिकायामयमधिकारः- 'ततो योगविधान'मिति । ततः-तदनन्तरं भवनिर्वेदादीक्षायां गृहीतायां यावदापन्नातिचाराणां प्रायश्चित्तेन शुद्धौ कृतायामेव, व्यवच्छेदफलत्वाद्वाक्यस्य, नान्यथा । किमित्याह- 'योगविधानम्' युज्यते-अवाप्यते मोक्षोऽनेनेति योगः-सम्यग्दर्शनज्ञानचारित्रात्मको व्यापारः । यदाह- चातुर्वैद्यचक्रचूडामणयोऽध्यात्मोपनिषदि-चतुर्वर्गेऽग्रणीर्मोक्षो,योगस्तस्य च कारणम् । सम्यक्त्वज्ञानचारित्र-रूपं रत्नत्रयं स च ॥१॥ (योगशास्त्रे) काशीयविबुधविजयावाप्तन्यायविशारदपदापूर्वसत्तर्करत्नरत्नाकरग्रन्थशतविधानानवद्यवेधः शक्त्यतिशयस्मारितश्रुतकेवलित्वाः श्रीयशोविजयवाचकवर्या अप्याहुः 'मोक्षेण योजनाद्योगः सर्वोऽप्याचार इष्यते' (ज्ञानसारः)। वक्ष्यति च प्रकरणकरणावगाढयशोऽम्बुपूरो भगवान् प्रकरणकारोऽपि ॥'मोक्खेण जोयणाओ जोगो सव्वोवि धम्मवावारो'इत्यादि । केचित्तु 'योगश्चित्तवृत्तिनिरोध' इत्याहुः योगलक्षणम्, तन्न चारु । यतोऽत्राश्रीयते को धातुस्तैः युजिच् समाधौ 'युजृंपी योगे' इत्ययोः! यतो नैकोपि तदीयमनोरथव्रततिवृद्धये प्रभवति । आदौ समाधेर्योगाङ्गत्वेन स्वीकाराद् अङ्गाङ्गिभावो भज्येत । योगसमाध्योरन्यत्र तु धात्वर्थ एव लक्षणविरोधी, निरोधविरुद्धत्वाद्योगस्य । न चैवं भवति योगारम्भक्रियाया योगत्वम्, तदा चित्तवृत्तेरनिरोधात्, कायवाङ्निरोधयोश्च योगत्वाभावाप्तेरनिष्टतैव । न च

॥ न विना तीर्थं निर्ग्रन्थैः ॥ यो भणति नास्ति धर्मः ।

॥ मोक्षेन योजनाद् योगः सर्वोपि धर्मव्यापारः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

निर्विकल्पसमाधावपि सर्वथा चित्तवृत्तिनिरोधः। तथा सति जडत्वापातात्, किन्तु निरोध इव निरोधः। तथा चोपचरितमेव लक्षणं न तत्त्वतः। न च केवला मानसिकी शून्यता आत्मश्रेयोविधायिनी, प्राग्बद्धनिर्जरणाद्यभावप्रसङ्गात्। मोक्षसाधनत्वे च तस्या अस्मदुक्त एव श्रेयः सरलः पन्थाः। अत एव चौलुक्यचूडाचन्द्राञ्चितचरणाः- 'प्राणायामस्ततः कैश्चिदाश्रितो ध्यानसिद्धये' इत्यादौ। 'कैश्चिदि'त्यनेनारुचिं प्रकटयाञ्चक्रुः, स्पष्टमभ्यधुश्च षष्ठे प्रकाशे-'अश्रद्धेयं परपुरे, साधयित्वापि सङ्क्रमम्। विज्ञानैकप्रसक्तस्य, मोक्षमार्गो न सिद्ध्यति ॥१॥ चित्तसङ्क्लेशकरणान्मुक्तेः प्रत्यूहकारणम्। न केवलमेतावद्यावदुपसंहारेऽप्यूचुः- 'योगस्योपनिषद्विवेकिपरिषच्चेतश्चमत्कारिणी'त्यनेन केवलप्राणायामादियोगस्येतरजनचित्तचमत्कृतिमात्रं फलमामनन्ति मनीषिमस्तकमूर्धन्याः। अलमतिप्रसङ्गेन। एवं व्युत्पादितोपि योगशब्दोऽत्र स्थानवर्णार्थालम्बनतद्रहितरूपे योगविशेषे एव ग्राह्यः। पूर्वं शेषयोगस्य प्रतिपादनात्। भवन्ति च सामान्यशब्दा अपि विशेषाधिकारनिबद्धतया विशेषार्थप्रतिपादनपराः। इच्छाप्रवृत्त्याद्या अपि तद्विशेषा एव, तत्कारणत्वात्तेषामिति न योगशब्दाभिधेयतायामनाश्वासः। यद्वा-अपरोक्तघटनैवैषा। न च वाच्यं स्वतन्त्रप्रामाण्ये किं कुतीर्थिकवचनाडम्बरानुगतत्वदर्शनेन ?। शासने विशेष उपकार इति। विक्षेपण्या इदमेव कार्यम्, यदुत-आख्याय स्वसमयं कुतीर्थिकसमयमपि तत्र योजयति। तथात्वेनाभिमतं चेत्तैस्तत् स्यादिति। न दध्यानयननोदनयेव तदाधारानयनस्य तत्प्रामाण्याविनाभावि प्रामाण्यमस्येति विभावनीयम्। एवमन्यत्रापि यत्र यत्राऽन्यदीयागमसाक्षिता स्यात्तत्र तत्रोह्यम्। मध्यस्थतादर्शनाय वैवमुपन्यासः। यतः श्रोता अनुगृहीतो भवत्ये-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वमनाग्रहप्रवृत्त्या । अनाग्रहादेव वक्तुस्तत्त्वाधिगमो भावीति हि मार्गानुगुणस्तदाशयः । अनेनैवाभिप्रायेण तेषां महर्षिताभिधानमपि कुत्रचित् । अत एव 'तत्प्रकृतिदेवताधिमुक्तिज्ञान' मित्युपदेशकायाऽऽज्ञप्तमावश्यकम् । तथैवाऽन्येषां बोधोत्पत्तेः। यथागमं वा भावनीयं भावद्भिरेतत् । तस्य एवंस्वरूपस्य योगस्य विधानमाचरणम् । न हि ज्ञानमात्रेणेष्टफलसिद्धिः, किन्तु आचारेण । यथाहि-ज्ञानहीना क्रियाऽकिञ्चित्करीति ज्ञानायोद्यमः कार्यः । एवमेव क्रियाहीनस्य ज्ञानस्यापि पङ्गुदृष्टेरिव शोकमात्रफलत्वान्नेष्टसाधनतेति सत्यमुक्तं-'योगविधान'मिति । एवं चाऽऽराधितसम्यग्यतिधर्मादियोगान्तस्यावश्यंभावि केवलं पर्यवसानफलं परमफलं वेति । तदाह अष्टादश्यां विंशिकायां- 'केवलज्ञानं च सुपरिशुद्ध'मिति । तत्र केवलम्-एकं मत्यादिनिरपेक्षत्वात् । शेषज्ञानानि मत्यादिसहचरितानि, नेदं तथा । यद्वा-केवलं-सम्पूर्णं, यथाहि मत्यादीनि क्षयोपशमोत्थानीति तारतम्यभाञ्जि, प्रथमतश्चाल्पतया पश्चाद्बहुबहुतरबहुतमतया प्रादुःषन्ति, नेदं तथा किन्तूत्पादकाल एवाखिलद्रव्यपर्यायसाक्षात्कारतयोत्पद्यते । अथवा-केवलं-शुद्धं, यथाहि- मतिज्ञानादीनि केवलज्ञानाऽऽवृतस्य जीवस्य भवन्ति, न तथेदं किन्तु काकनाशं नाशितनिखिलानिष्टतमज्ञानावरणीयादृष्टस्य । यदि वा केवलं-निरवयवं, यथाहि-मतिज्ञानस्यावग्रहादयः, श्रुतस्याङ्गप्रविष्टाद्याः, अवधेरनुगामिप्रमुखाः, मनःपर्यवस्य चर्जुमतिविपुलमती इत्येवं भेदभिन्नता, नैवमस्य । न च वाच्यं 'सिद्धकेवलज्ञानं भवस्थकेवलज्ञान'मित्याद्यनेकभेदभिन्नत्वप्रसिद्धेरस्य नन्दीसूत्रादौ किमिति भेदरहितत्वं पापठ्यते ? इति। यथा मतिज्ञानादीनां स्वरूपतो हेतुभेदेन कार्यभेदेन च भिन्नता, न तथाऽस्य किन्तूपाधिकृत एव। उपाधिश्चात्र तद्वज्जीवावस्थाविशेष

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एव । अथवा केवलं-निरपेक्षं, यथाहि- मतिज्ञानादीनामुपयोगापेक्षा तज्ज्ञेयज्ञेयज्ञाने । अत एव च गौतमस्वामिप्रभृतीनामतिशयितज्ञानवतामप्यवधिविषयविषयादिषु स्खलनं सङ्गच्छते । अन्तर्मुहूर्त्तमानतापि छद्मस्थोपयोगस्य जेगीयमानाप्यत एव युक्तियुक्ता बंभण्यते । ततश्चानेकभवशुभभावनाभावितान्तःकरणावाप्ताखिलाङ्गिकल्याणकरणकोविदश्रीचरमतीर्थकृतश्च्यवनसमये च्यवनाज्ञानं न अप्रतिपतितशुद्धिशुद्धज्ञानत्रयवत्तां विरुणद्धीति । न चैवमिदं, किन्तु जीवस्वाभाव्येन प्रतिसमयं लोकालोकगरूप्यरूपिविप्रकृष्टाऽविप्रकृष्टाशेषवस्तुतत्स्वरूपावबोधकम् । न च वाच्यं सकलेष्टानिष्टार्थबोधने अनिष्टरसगन्धादिबोधादनिष्टतापातः, अप्राप्यावबोधनाद् बोधेन । नहि गुणो द्रव्यं विमुच्य गच्छत्यन्यतस्तिलतुषत्रिभागमात्रमपि । न च विभुर्जीवः,अस्तु वा तथा सयोगिकेवलिनः समुद्घातावस्थायां तथाभावात् । परमिन्द्रियद्वारा जन्यस्यैव तस्येष्टानिष्टतया बोधोत्पादः । आमूलचूलघातितघातिकर्मणः सर्वज्ञस्य भगवतस्तु सर्वत्रौदासीन्यमेव । अभिमतं चैतत् पूर्वर्षिभिः । यदाह दिगम्बरदिगम्बरचक्रवर्त्तिकुमुदचन्द्रचन्द्रिकापचयचण्डभानुचण्डभानुभाग्भारावाप्तचौलुक्यचूडामणिनिखिलवाङ्मयविज्ञानविज्ञश्रीसिद्धराजवदनोदीरितवादिविरुदो देवसूरिः प्रमाणनयतत्त्वालोकालङ्करणे प्रमाणनयतत्त्वालोकालङ्कारे'-यत्प्रमाणेन प्रसाध्यते तदस्य फलम् । तद्द्विधा-आनन्तर्येण पारम्पर्येण च । तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् । पारम्पर्येण केवलज्ञानस्य तावत्फलमौदासीन्यम् । सुखोपेक्षारूप एव वा व्यापारोऽस्य, न च तथाऽस्य कदाचनापि दोदूयते आत्मा । न चास्यास्ति विचाररूपं भावमन इत्यन्यदेतत् । ज्ञायते यदनेनास्मादस्मिन्निति वा ज्ञानं, 'करणाधारे' (सि० ५।३।१२९)

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

इति 'भुजिपत्यादिभ्यः कर्मापादाने' (सि० ५।३।१२८) इत्यनेन वा अनः। न च ज्ञानस्य कथं कर्मतेति। प्रदीपवत्तस्य स्वपरावभासकत्वात्। न चानुभवापलापः कर्तुं पार्येत सुधिया, येनाऽस्य स्वप्रकाशकत्वमपलप्येत। परोक्षतायां च ज्ञानस्य तस्य प्रामाण्यानिश्चयान्न कथञ्चनापि प्रवर्त्तते प्रेक्षापूर्वप्रवर्त्तकः। न चास्याधिकरणता कथं, आत्मनोऽधिकरणत्वादिति वाच्यम्। कथञ्चिदभिन्नत्वाद् द्वयोः। यद्वा-वैषयिकाधिकरणमिदम्। अन्यत्र ज्ञानादवबुद्धताऽसिद्धेः। न चाहं जानेऽहं सुखीत्यादिसमानाधिकरणप्रत्ययबलादात्मनोऽहंतावगमः कथं स्याद्, ज्ञानस्यावगमत्वेनायं जानाति सुखी चायमित्येव व्यपदेशादिति वाच्यम्। तस्यापि स्वपराभासित्वात्। यदाहु :-दुःषमारजनिप्रसूततिमिरततिविघटनावाप्तयथार्थाभिधानाः श्रीसिद्धसेनार्कपादाः- 'प्रमाता स्वान्यनिर्भासी, कर्त्ता भोक्ता विवृत्तिमान्' (न्यायावतारे) इत्यादि। न चात्मनः स्वपरावभासकत्वे कोऽर्थो ज्ञानेन, तद्धि स्वपरावभासित्वेनैवाश्रीयते, तच्च स्वीक्रियते शुभवद्भिर्भवद्भिरात्मन इति वाच्यम्। सुखवानहमिति प्रत्ययवत् घटज्ञानवानहमिति ज्ञानाधिकरणा(ता)याः स्वानुभवसिद्धत्वात्। नहि युक्त्यनुभवसिद्धोऽर्थोऽलिककुतर्कभित्याऽभावमश्नुते। अलमतिप्रसङ्गेन। केवलं च तज्ज्ञानं च केवलज्ञानम्। न चैवंविधज्ञानस्यासम्भवः, येन कल्पितत्वं स्यादस्य। यतो निर्विवादं जीवो ज्ञानस्वरूपः। नहि ज्ञानमन्यस्य धर्मः,अनुकरणाभावात्। धर्मत्वे च किंकृता इयत्ताऽस्य, येन नावबुद्धयते सर्वं, न तथाविधं किञ्चित्प्रतिबन्धकं जीवानुगतं स्थितिमत् स्वभावभूतमस्ति, येन सर्वज्ञताऽस्य न बोभवीति। न च वाच्यं तर्हि यावज्जीवं केवलसद्भाव आयात इति। आयात्वभीष्टमेतत्। प्रत्यक्षविरुद्धमिति चेन्न, प्रतिबन्धकानिराकरणान्नोद्भूतम्। नहि विद्यमा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नेऽपि दीपे पटाद्यावरणानपगमे भवति तत्प्रत्यक्षम्। न च तावन्मात्रेण दीपाभावः शक्यते शिक्षितशास्त्रसार्थेनापि प्रतिपादयितुम्। ननु किं प्रतिबन्धकं ? यन्न जीवानुगतं स्थितिमत् स्वाभाविकं स्यादितिचेद्। ज्ञानावरणीयाद्यदृष्टं मूर्त्तिमदिति गृहाण। प्रकृतिरेवास्यैषा यदुत-मदिरापानवदागतमात्रमात्मनो ज्ञानमावृणोति। तत्क्षये च स्यादेव स्वभावभूतं केवलं, कल्पान्तकालीनप्रचण्डपवनवेगविदीर्णजलदजालस्य सूर्यस्य प्रभेव। चकारः केवलदर्शनसमुच्चयनाय, तस्याप्येवंविधत्वात्। 'सुपरिशुद्ध'मिति। सुष्ठु-अतिशयेन सम्पूर्णतया, परितः- सामस्त्येन, शुद्धं मलक्षयोत्पन्नत्वात्। न ह्युत्पन्ने केवले अवतिष्ठति ज्ञानाद्यावृत्या लेशोऽपि, क्षायिकत्वात्तस्य। न च क्षायिकस्यास्ति प्रतिपातः, येन स्यात् पुनर्मालिन्यं ज्ञानावृत्या जीवस्य। एतेनास्य बन्धहेत्वभावोऽप्रतिपातोऽनन्ता स्थितिश्च दर्शिता। बन्धहेतवश्च मिथ्यात्वाद्या न तस्य। तथा च न पुनरावरणभावः। इतिना सम्पूर्णतां दर्शयन्नस्य सर्वोत्तमतां दर्शयति। नहि लब्धे केवलेऽवशिष्टं प्राप्यं ज्ञानमस्ति, ज्ञातत्वादखिलविषयस्य। एतेन ये आहुः-'सर्वं पश्यतु वा मा वा,इष्टमर्थं तु पश्यतु। कीटसङ्ख्यापरिज्ञानं, तस्य नः क्वोपयुज्यते'?॥ इत्यादि। ते निरस्ता द्रष्टव्याः। नहि सर्वपदार्थानां सर्वथा यावज्ज्ञानं नाभूत्तावदेकोऽपि ज्ञायतेऽर्थो यथावत्। एकेनाप्यर्थेन स्वपरपर्यायैरतीतानागतपर्यायसम्बन्धैर्वर्त्तमानस्वरूपव्यावृत्त्या वा अशेषसमग्रार्थक्रोडीकरणाद्। अत एवोच्यते- एको भावः सर्वथा येन दृष्टः, सर्वे भावाः सर्वथा तेन दृष्टाः। न चैवं केवलोऽन्वय एव किन्तु व्यतिरेकोपि। यत आह- सर्वे भावाः सर्वथा तेन दृष्टा एको भावः सर्वथा येन दृष्टः। नहि ज्ञानोत्पादकाले इष्टानिष्टविभागोऽस्ति, येन विभागेनोत्पद्यमानं ज्ञानमिष्टं स्यात्। न च पुनरुत्पत्तिरप्यस्य विद्यते, येनाज्ञातपूर्वं पुनर्ज्ञायेतेष्टताकाले। इष्टानिष्टविभागेपि

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समग्रं तथैव पदार्थवृन्दम् । यतो नहि कश्चिदेवंविधोऽर्थो वेविद्यते, यो न कस्यापीष्टोऽनिष्टो वा न स्यात् । सर्वेषां ज्ञेयत्वेनेष्टत्वाद् । भुजङ्गमनलिकाप्रवेशज्ञातेन भविष्यति प्रवेशोऽस्मदुक्ताध्वनि । न च यावद्भवभावित्वमस्तु केवलस्यापि, देहादिसाधनसम्पन्नत्वात् यावत् कर्मक्षयेण निर्वाणावाप्तौ तु तदभावादेव ज्ञाननिवृत्तिरिति नानन्ता स्थितिरिति वाच्यम् । ज्ञानस्य देहसाधनत्वासिद्धेः । छाद्मस्थिकमतिश्रुतयोः कथञ्चित्तथात्वदर्शनेपि सर्वत्र तथाऽदर्शनात्, मतिश्रुतरूपपरोक्षस्यैव तथात्वात् । अत एवास्याभिमता परोक्षता अपरोक्षज्ञानवद्भ्रुः । परैरिन्द्रियमनोभिरुक्षा-सम्बन्धोऽस्मिन्निति व्युत्पत्तेः । अवध्यादिज्ञानद्वयस्य तु छाद्मस्थिकत्वेऽपि नेन्द्रियानिन्द्रियसाधनतास्ति । यदाहुः- 'पारमार्थिकं पुनरुत्पत्तावात्ममात्रापेक्ष' (प्रमाणनय०) मिति । अत एव चापर्याप्तावस्थायामप्यभ्युपगम्यते अवधिज्ञानम् । तथा च कैव वार्त्ता केवलस्य, येन तस्य जीवस्वभावभूतस्यापि देहसाधनता जाघटयेत?। न चासम्भव एवैवम्भूतस्य, जीवस्वभावत्वे तदभावात् । न च न ज्ञानं जीवस्वभावः, किन्तु बुद्धिसमवायेन तथेति वाच्यम् । आकाशेऽपि तत्समवायप्रसङ्गात् । समवाय एव च तावत्कल्पितो, न पारमार्थिकः, कुतस्तरां तत्सम्बन्धेनात्मनः सचेतनत्वम् । तथा च जडेनानात्मविदा को वादोऽस्माकं ? 'नातत्त्ववेदिवादः सम्यग्वाद' (धर्मविन्दौ) इतिवचनात् । स्वरूपसम्बन्धे चागतोऽसि अस्मत्पथि,स्वरूपस्य कदाचनाप्यनाशात् । तथात्वे च जीवस्याप्यजीवत्वापत्तेस्तन्नित्यताया दत्त एव जलाञ्जलिर्भवता कृपाधाम्ना । न चास्तिकंमन्यानामेष पन्था नापि युक्तियुक्त इत्यलम् । 'सुपरिशुद्ध'मिति न व्यवच्छेदकं, किन्तु स्वरूपविशेषणमेव । अभिमतं च तथात्वे च विशेषणं विज्ञैः

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'परमाणुरप्रदेश' (तत्त्वार्थ०) इत्यादिवत् । 'ज्ञानिनो धर्मतीर्थस्ये'-त्यादिना केवलिनो ये आहुर्भवावतारं, तन्निरासाय वेदमिति । अवाप्तकेवलाश्चावश्यं केवलिनः सिद्धिगतिगमनाः । नहि मत्यादिवत् प्रतिपाति तदिति निर्णीतम् । न च तद्वतां नूत्नानां स्थितिमत्कर्मणां ग्रहः, येन भवान्तरापत्तिः स्यात्, किन्तु शेषाघातिघातसमकालमेव सिद्धिप्राप्तिः । ननु यदि भवत्यघातिनां वैषम्यम्,कथं समकालमशेषाणां तेषां घात? इतिचेन्न,सिद्धिप्राप्तेरर्वाक् अन्तर्मुहूर्त्तात् समुद्घातेन समीकरणाद् घातिनाम् । यत उक्तमेतत् परमर्षिभिः-'यस्य पुनः केवलिनः कर्म भवत्यायुषोतिरिक्ततरम् । स समुद्घातं भगवानथ गच्छति तत्समीकर्तुं ।। (प्रशम०) मिति । अत्र कर्मेतिशब्देन वेदनीयमेव ग्राह्यम् । तस्यैव बन्धाधिक्यसम्भवात्, प्रतिसमयं विशेषतश्चास्य बन्धभावात्, नामगोत्रयोस्त्वायुषा समं बन्धाधिक्याभावात् इति । सिद्धिस्वरूपाधिकारायाह- एकोनविंशायां विंशिकायां 'सिद्धविभक्तिश्च तथे'ति । सिद्धयन्ति स्म-निष्ठितार्था भवन्ति स्मेतिसिद्धाः-कर्मक्षयसिद्धा इतियावत् । अष्टविधा हि सिद्धशब्दाभिधेयाः । यदाह-[1]"कम्मे सिप्पे य विज्जा य मंते जोगे य आगमे । अत्थजत्ताअभिप्पाए तवे कम्मक्खए विय ।।१।। (आवश्यक०)अत्र कर्म अनाचार्योपदेशजं, शिल्पं त्वाचार्योपदेशजमिति कर्मशिल्पयोर्भेदः । कर्मसिद्धः सह्यगिरिसिद्धवत् कर्मनिष्ठितः । शिल्पसिद्धास्तु दण्डभू(भृ)दयस्कारादयः स्वस्वकर्मणि ये कर्मठाः । दुर्भिक्षप्रभावोररीकृतमालवप्रस्थान-वर्त्मानिर्वाहनिमित्तकादृतबौद्धवेतनबौद्धसंस्तवचलितदाढर्याकालमरणावाप्तत्रिदशभाव-मायाबहुलमायासूनवीयाच्छादितनिजवेषवस्त्रवपुष्कावलोकनमात्रजातभ्रान्तिविहितबौ-

[1] कर्मणि शिल्पे च विद्यायां मन्त्रे योगे च आगमे ।
अर्थयात्राभिप्राये तपसि कर्मक्षयेपि च ।।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

द्धदर्शनोन्नतिसमुत्थगर्वाध्मात- शौद्धोदनिशिष्टोच्छिष्टवाक्यव्रज-दूमित-श्रद्धालुतमश्राद्धसमुदायेरितवृत्तान्तनिवेदनज्ञानातिशयावबु-द्धतत्प्राग्भवीयप्रवर्त्तन-तत्प्रतिबोधविहितविहार-विकुर्वितशिलाकृ-ताध्वायात्तत्पात्रस्खलननिर्गतकेवलसभूषणदोष्कालोच्चारित-बुध्यस्व बुध्यस्व गुह्यकेति मन्त्राक्षरोच्चाटितभ्रमविधापितस्पष्टाद्वयवा-द्यलिकतोच्चारकारितानेकशासनोन्नतिनिमित्तकानेकसत्कार्य-श्रीआ-र्यखपुटवत् । विद्यासिद्धः । विद्या हि स्त्रीदेवताधिष्ठायिका ससाधना वा । मन्त्रसिद्धः स्तम्भाकर्षकवत् । मन्त्रः पुरुष-देवताधिष्ठितोऽसाधनो वा । विप्रतिपद्यन्ते नास्तिकमूर्धन्या विद्यामन्त्रयोः, परं विस्मृतं तैः इदानींतनेऽपि रसायनविद्याशोधिता-नेकेतरचमत्कारेऽनेहसि मणिमन्त्रौषधीनामचिन्त्यप्रभावत्त्वम् । किं बहुना, विहितं च तावदक्षरोच्चारणेन विविधाकृतिभावसाध-नम् । तद्वदेतत्पूर्वोक्तमपि सम्पद्यमानं किमिवाधिरोहेद्विरोधमिति सम्यग्निभालनीयं परभालानीक्षिणा । यद्यपि भवन्ति कुदर्शनत-तिरिव विप्रतारकवर्या अलिकमन्त्रवादित्वेन मुग्धमोहकाः, परं न तावता वस्तुसिद्धिमपलपन्ते वस्तुविवेकविचक्षणाविरतसम्यग्दृ-ष्टिवद्वस्तुविचाराकूपारपारीणप्रज्ञाप्राग्भाराः प्राज्ञप्रष्ठाः । पादले-पप्रभावाऽप्पूरोपरि प्रवृत्तिप्रवर्त्तिताऽपारमार्थिकप्रभावप्लावित परमार्थपथप्रीतिकापरमार्थपथप्राज्ञप्रोल्लासितप्रचुरप्रौढिप्रारब्धपरा-वज्ञतापसप्रीतिपरायणपुरपुरुषप्रेरितपरमार्थपदार्थप्ररूपणप्रवणपरम-र्षिपथप्रेक्षणाप्तपरमपीडपरमपदसोपानपरमार्थप्रज्ञापनप्रवीणोपका-रपूरपावितप्राणप्रचयपूत्कारप्रोल्लसितप्राणप्रवर्त्तितपादप्रक्षालनप्रति-पन्नाऽऽपगापातालप्रवेशप्रादुर्भूतापभ्राजनप्रतिबोधप्रारब्धपदार्थसम्प-त्तिप्रयोगाऽऽपगापारपुटसम्पुटनपरायणश्रीआर्यसमितसूरिवद् । योगसिद्धः । योगश्चानेकपदार्थ-पदार्थयोगेन चमत्कृतिक-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

रणम् । आगमसिद्धः – सर्वाङ्गसर्वार्थसंसिद्धसारस्वतो गुणगणरत्नरोहणमहीधरायमाणः श्रीगौतमगणभृद्गरिरिष्ठवत् । अर्थसिद्धः- अनेककोटाकोटिकनकादिद्रव्यनिकरसञ्चयानवाप्ततृप्तिको मम्मणवत् । यात्रासिद्धस्तुटित इव विहितानेकवारवार्द्धिव्यापारवित्तवारिधिगमनः । अभिप्रायशब्देन चेह बुद्धिर्ग्राह्या । तत्र यो विपुलविमलसूक्ष्ममतिमान् सोऽभिप्रायसिद्धः, सार्द्धत्रिंशतकोटिमानानवद्यसर्वाभिधेयसमग्रसच्छास्त्रनिर्माणनिपुणश्रेयःशब्दानुशासनशासितामरकीर्त्तिकश्रीहेमचन्द्रसूरिवत् । औत्पत्तिक्यादिबुद्धिचतुष्कचतुररौहिणेयकादिवद्वा बुद्धिसिद्धः । तपश्चेह अनशनाऽऽतापनादिरूपं, तेन तत्र वा सिद्धो दृढप्रहारिवत् । स हि महात्मा ब्रह्मस्त्रीभ्रूणगोघातवातिताऽऽत्मविवेकोऽपि तद्दर्शनकम्पकम्प्रमना यावत् स्मृति व्युत्सृष्टचतुर्विधाहारः क्षपितवान् तीव्रतमं तत्पापप्रचयं तपसैवेति । क्रियते मिथ्यात्वाविरतिकषाययोगलक्षणैर्बन्धहेतुभिरात्मसात् सम्पाद्यते इति कर्म-ज्ञानावरणीयाद्यष्टप्रकारम्, तस्य क्षयो-निःसत्ताकोऽभावः तेन सिद्धाः-संसिद्धसहजकेवलज्ञानदर्शनानन्तसुखवीर्यलक्षणानन्तचतुष्कसिद्धिमन्तः । एतेषु ये अन्तिमास्ते इहाभिप्रेताः । तेषामेव केवलनान्तरीयकभाविसिद्धिमत्त्वात् । न च तेषामतःप्रभृति कृत्यमस्ति, ततः कृतार्थास्ते परमार्थतः । न चाऽऽलोकितशासनमालिन्यानां केवलचिदोपेक्षाविधातृणामपूर्वादृष्टारम्भः ततः प्रभवो भवावतारस्य अन्यथा च तन्निवारणायेत्यायातो 'भक्षितो लशुनो ज्वरोपि न शमं गत' इतिन्याय इतिवाच्यम् । करामलकवत् कलितलोकालोकानां तेषां भाविज्ञानमस्त्येव यथार्हम् । न च तेषां मनो, न वा भवहेतुभूतं तैजसकार्मणकाययुगलम् । न च विश्वेपि विविधबोधविधानविधुराः सर्वथा न सन्ति, न चर्ते उपेक्षां मालिन्यकारिणोऽन्यभावनाभाव्याः, प्रभवन्ति वा तत्प्रभावत

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

एवानेके मालिन्यमर्दकाः शासनोन्नत्यै । तन्न तेषां भवावतारः सार्थकः । न च सम्भवी कर्मबीजमन्तरेण तृष्णादिसम्भवेऽपि भवाऽऽगमः । यदाह-अज्ञानांशुपिहितं पुरातनं कर्म बीजमविनाशि । तृष्णाजलाभिषिक्तं मुञ्चति जन्माङ्कुरं जन्तोः ॥१॥ 'कर्मोदयाद्भवगतिर्भवगतिमूला शरीरनिर्वृत्ति' (प्रशम०) रित्याद्यलमतिपल्लवितेन । यद्वा-सितं-बद्धमष्टप्रकारं पुरातनं कर्म, तत् ध्मातं-विनाशितं, यैस्ते निरुक्तविधिना सिद्धाः । सिद्धौ पञ्चचत्वारिंशल्लक्षयोजनायामविष्कम्भाऽष्टयोजनबाहल्या प्रान्ते माक्षिकपत्रतनुका साधिकसार्धशतकोटियोजनपरिरया या ईषत्प्राग्भारनाम्नी सिद्धालयभूता सिद्धिशिलारूपा सिद्ध, तस्यां भवा वा सैद्धाः । प्राकृतशैल्या च 'सिद्ध'त्ति । न च सार्द्धतृतीयद्वीपभाविनां केवलिनां शैलेश्यन्तक्षणेऽखिलादृष्टापगमभावान्निष्क्रियत्वात् कथं गमनसम्भवस्तां यावत् ? । चरमगुणचरमक्षणाक्षुण्णक्रियाप्रयोगेन मुक्तेषुवत्, कर्मसङ्गरहितत्वात् समन्तादावेष्टितातिकठिनमृत्तिकालेपहानावाप्तोदकोपरितनभागगमनकार्यलाबुवत्, आनुपूर्व्यादिबन्धनविच्छेदाच्छिन्नबन्धनैरण्डवत्, धूमाग्न्यादेरिव स्वाभाविकोर्ध्वगमनस्वभावत्वाज्जीवस्य तथागतिपरिणामाच्च सिद्धानां सिद्धिं यावद्गतिः । तथा च येऽभिदधति-गुणसत्त्वान्तरज्ञानान्निवृत्तप्रकृतिक्रियाः । मुक्ताः सर्वत्र तिष्ठन्ति, व्योमवत्तापवर्जिताः ॥ इति निरस्ताः । सर्वव्यापिता नार्वाक् युक्तियुक्ता । न च पश्चादपि सम्भाविनीति । तथा तत्र जीवानां जीवत्वेनाऽवस्थानास्थानात्तेपि निरस्ताः । य आहुः– 'रागादिवासनामुक्तं, चित्तमेव निरामयम् । सदाऽनियतदेशस्थं, सिद्ध इत्यभिधीयते' ॥१॥ चित्तस्य नित्यत्वे जीवस्यैव नामान्तरम् । न च वासनामुक्तस्य पुद्गलकृताऽधोगतिविरहादूर्ध्वगमने तथास्वाभाव्याद् गमने बाधकमुद्घोष्यते

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

घोषणविदा केनापि, अनित्यत्वे तु क्व सदास्थानवार्त्तेवेति । ननु किमिति न गच्छति परतो नाधो न तिर्यग्वेति चेत् । उच्यते, इह तावद् गतिपरिणता जीवपुद्गलाः स्वतो गन्निस्वभावा अपि न साहाय्यकमन्तरेण गच्छन्त्यंशमेकमप्यग्रतः पृष्ठतोऽन्यतरथा वा, निमित्तमन्तरापि कार्यानुत्पादनियमात् । अन्यत्राऽन्यनिमित्तसम्भवेऽपि परमाणुद्व्यणुकादेः सूक्ष्मसूक्ष्मसूक्ष्मादिद्रव्यस्य गत्यन्तर्वर्त्तिजीवस्य च न दृष्टं निमित्तकारणं सम्भाव्यत इति भवितव्यं केनापि तादृशा यद्गतौ तयोर्निमित्तकारणं स्यात्, तस्य च यावल्लोकवृत्तिता, न च तस्याऽन्यनिमित्तकारणापेक्षा स्यात्, तादृक् च धर्मास्तिकायः । न चायं यावदाकाशम् । तथासति दृश्यमानपुद्गलस्कन्ध-जीवसमुदायसम्मेलनाऽन्यथानुपपत्त्या लोकप्रमाण एवासावाश्रयणीयः । तदभावे आकाशस्यानन्तता अवगाहस्वभावत्वाद् यतः स्वीकृतेति सर्वत्र विशरारुतामीयुः जीवपुद्गलाः पृथक् पृथक् अरण्यानीरितमूषकपञ्चकवत् । तथाच लोकप्रमाणसिद्धौ धर्मास्तिकायप्रमाणसिद्धिस्तत्सिद्धौ च लोकप्रमाणसिद्धिरित्यन्योन्याश्रयोऽपि न स्यात् । एवं च धर्मास्तिकायसिद्धौ यावल्लोकमेव जीवपुद्लयोर्गतिसद्भाव इति नाग्रतः सिद्धानां गतिः । तथा च ये पण्डितंमन्या गेहेनर्दिनो भाष्यवृत्तिकरणाख्यातिलोभवशंवदा आनन्दगिरिरत्नप्रभावाचस्पत्याद्या अनाद्याय जगत्यप्रधृष्यजैनशासनगन्धमपि जैनं पूर्वपक्षीकृत्यआचख्युर्यत्-'कर्मपाशनाशे सत्यलोकाकाशप्रविष्टस्य सततोर्ध्वगमनं मोक्षमाचक्षते जैना' इति । तन्महामोहविलसितमेव । यदि चावगतं स्यात्तैर्जैनबालाङ्गनाबोध्यमपि तत्त्वतत्त्वदेशकं नवतत्त्वप्रकरणमपि, बुद्धो वा स्यात् कस्यचित्पार्श्वेपि मोक्षपदार्थो जैनबालकस्यापि, नैवं महापातकमेनमकरिष्यन्नित्यलं परेषामपरेषां बुद्धिमान्द्यप्रदर्शनेन । तिर्यंग्गतिस्तु सिद्धा,

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ऽन्येषां योगप्रयोगतो लोके । न च सिद्धानां सोऽस्ति, कथं च सा तस्य भवति गतिः ।।१।। पाषाणाद्या लोकेऽधस्ताद्गतिमन्त ईक्ष्यन्तेऽलघवः । अगुरुलघवश्च सिद्धा निष्कर्माणो न यान्त्यधः तस्माद् ।।२।। जीवो नैतत्स्वभावोऽधोगमनार्हो यथा भुवि स्कन्धाः । गच्छति ततोऽपि नाधः पुद्लरहिताः समे सिद्धाः ।।३।। न चैतत् स्वान्तव्याकृतम् । यदाहुर्वाचकोत्तमाः 'नाधो गौरवविगमादशक्यभावाच्च गच्छति विमुक्तः' । तथा 'योगप्रयोगयोश्चाभावात्तिर्यग्न तस्य गतिरस्ति' । (प्रशम०) ननु माऽस्तु धर्मगौरवयोगाभावाच्च ऊर्ध्वगत्याद्याः, तिष्ठन्तु परमत्रैव निर्व्याबाधाः सदा सिद्धाः इति चेत् । न तत्प्रयोगाश्रयानुबन्धाद्यभावतो भवतिः स्थितिः तिर्यग्यतोऽस्ति न स्थितिरेतान् विरहय्य कस्यापि । तदुक्तं-'न स तिष्ठत्यनिबन्धादनाश्रयादप्रयोगाच्च' । ततसिद्धं सिद्धानां सिद्धिस्थायित्वमत्र नारेका । ननु सिद्धयपवरकान्तर्बद्धाः किंसौख्यसाधनाः सिद्धाः ? । न स्त्रीभोजनभोगो, न चास्ति गोष्ठी सहोत्तमैस्तत्र । तन्न एते यद्बद्धाः कायाभावेन नास्ति गमनेच्छा । मोहाभावान्न रतं, न भोजनं तदृते यतस्तुष्टाः । अव्याबाधा औत्सुक्यवर्जिताः कर्मदुःखनिर्मुक्ताः । आत्मरता योगिवत्ते शान्ता लोकेतरावलोकोत्काः । न च वन्ध्या जानीते गुर्वीं प्रसवस्य वेदनाम् । यद्वा म्लेच्छो न नागरिकसुखमाख्यात्याख्यातुकामोऽपि । अत एवैतदाख्यातं प्रशान्तेनान्तरात्मना । शब्दे रूपे रसे गन्धे स्पर्शे स्वेच्छातिगे सुखं । वेद्यते यन्नरैरक्षैस्ततोनन्तगुणं तु शम् ।। तेषां सूत्रे यतः प्रोक्तो भागकारविधिरयम् । तेषां सामयिकः सौख्यराशिः समयैस्त्रिकालगैः । गुणितोनन्तवर्गेण भक्तो मायान्न विष्टपे ।। समग्रं सुरसौख्यं वा त्रैकालिकं च ताडितम् । अनन्तेन पुनस्तस्मिन् वर्गैस्तावद्भिरा हते । सम्पद्यते सुखं यावत्तन्न सिद्धसुखैः समम् ।। इत्यलं प्रसङ्गानुप्रसङ्गेन । तेषां सिद्धानां विभक्तिः- प्ररूपणा

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तीर्थातीर्थादिभेदेन निरूपणम् । चकारस्तेषां वेदाद्युपाधिना लक्षणेन च प्ररूपणां ज्ञापयति । तथेत्रि च केवलज्ञानाद्यात्मगुणसत्ताऽनन्तसुखसद्भावाऽऽवेदनाय । ननु बुद्ध्यादयो न वैशेषिकास्तत्राभिमन्तव्याः, विशेषगुणोच्छेदरूपस्यैव मुक्तिपदार्थत्वात् । सन्तानश्चावश्यं क्षयान्तः, बुद्धिसुखादीनां सन्तानत्वमिति न ज्ञानादि मुक्तौ । न च तत्रेन्द्रियादि ज्ञानसाधनमप्यस्ति, निरदृष्टत्वेन शरीराभावात् । तदुक्तं-'कर्मोदयाद्भवगतिर्भवगतिमूला शरीरनिर्वृत्तिः । देहादिन्द्रियविषया विषयनिमित्ते च सुखदुःखे ॥१॥ (प्रशम०) श्रुतिरपि तेषां निर्धर्मत्वेन ज्ञानहीनतां प्रतिपादयन्ती समुज्जृम्भते । सुखमपि च निषिध्यते स्पष्टं, यदाह- 'अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत' इति । चेन्न, ज्ञानस्य तावदात्मगुणता स्पष्टं स्पष्टिता । स्वीक्रियते च भवद्भिरपि, न चात्मा व्यवच्छिद्यते, येन तत्र ज्ञानाभावो वक्तुं पार्येत परमार्थतः । अन्यच्च-आत्मविशेषगुणानां ज्ञानादीनामग्रेतनक्षणीयविशेषगुणनाश्यत्वं भवद्भिरभिप्रेतम्, योग्यविभुविशेषगुणानामुत्तरक्षणवृत्तिविशेषगुणोच्छेद्यत्वस्वीकारात् । तथा चाग्रेतनाग्रेतनात्मज्ञानादिनैव तदुच्छेदः स्याद् । एवं च मुक्ताहारन्यायेन स्यादेवापर्यवसिता ज्ञानादिस्थितिः । अदृष्टाभावस्य ज्ञाननाशकत्वे तु नात्मगुणता ज्ञानस्य, अदृष्टस्य तु द्रव्यतैव अनुग्रहकारित्वादिना सिद्धा, तथापि (न) तदन्तर्गतेर्न भवति शरीरमन्तरा । न चास्ति ज्ञानस्यादृष्टेनान्वयव्यतिरेकौ, येन तदभावे तदभावः स्यात् । अन्यच्च- किं केवलपाषाणवद् जडतापादयित्रीं मुक्तिमभिलषेत् कोऽपि सकर्णः ?, अधिकलाभप्रयोजनप्रवृत्त्यैव प्रेक्षावत्ताव्याप्तेः । अन्यथा मूर्छादावपि सुधीप्रवृत्त्यापत्तेः । ननु भोजनमिष्टमपि विषसंयुक्तं परिहृियते, तथेदमपि चेत् न, विषवियुक्तभोजनाभिलाषेण विषपरिहारमा ेण तत्परिहारात् चे-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

दत्राज्ञानताविषं विस्रष्टुं समीचीनतामञ्चति, न तु ज्ञानमपीति । न चेन्द्रियसाधनमेव ज्ञानम् । आत्मनस्तद्गुणत्वेन अन्यथापि समुत्पादाभिगमात् । आः ! प्रत्यक्षविरुद्धमेतज्जंजल्प्यते जाल्मेन यदनिन्द्रियसाधनं ज्ञानम् । शान्तिं कुरु, न क्रोधरोधरुद्धान्तःकरणे रोक्ष्यति अपरिमितानन्दनिदानभूता बोधवल्लरी । किमुत्पादकमिन्द्रियं न चेत् ? साधनता तु यावददृष्टावृति साहाय्यकारि स्यादेव । नह्यतैमिरिकः को-युपदधात्युपनेत्रे । तथा च नोपनेत्रो न पश्यति । किञ्च-नेश्वरस्यानन्तज्ञानान्वितत्वेपि शरीरेन्द्रियादिकमस्ति किञ्चिदपि । न च व्यक्तिविशेषे तथोपगमो न्याय्यः । नहि कुत्राप्याकाशावयवे दृष्टं कुसुमं, सम्भवित्वे च किं क्षतमात्मनो मुक्तात्मनो, येन तस्य ज्ञानाभाव आपाद्यते भवद्भिः ? । श्रुतिप्रतिपादितनिर्धर्मत्वमात्रेण नहि युक्तियुक्तमिष्टव्यं च ज्ञानाद्यपलपनीयं श्रुतालापलोकनसहृदयैः । तस्यादृष्टार्थकधर्मशब्दाभावेन योजयितुं शक्यत्वात् । तथा च अनेकश्रुतिभिरधिरुह्यमानो विरोधोऽपिपरिहृतः स्यात् । श्रूयन्ते च श्रुतयः सकर्णैः संसारातीतानां ज्ञानसुखादिप्रतिपादका अनेकाः । तथाहि-नित्यं विज्ञानमानन्दं ब्रह्मेति । अत्र ब्रह्मस्वरूपबोधनमेव विज्ञानानन्दादित्वेनोपपादितम् । न चान्यथाऽऽनन्दमिति नपुंस्त्वं स्यात् । ननु विज्ञानमज्ञानाभावे,आनन्दश्च दुःखाभावे उपचरितो ज्ञेय इति । चेत् ननु किमिति सुखमेवाङ्गीक्रियते पदार्थतया किं वा ज्ञानस्य भिन्नता गुणत्वेन ? भवन्नीत्या अभावेनैव द्वयोश्चरितार्थत्वात् । भिन्नपदार्थत्वे स्वीक्रियमाणे नात्र किञ्चद्वाधकं समस्ति येनोपचरितकल्पना कल्प्या स्यात् कल्पविदां 'मुख्यार्थबाधे सति प्रयोजने च भेदाभेदाभ्यामारोपितो गौण' (काव्यानु०) इति गौणलक्षणत्वात् । न चात्रोपचारेऽस्ति च किञ्चिदपि प्रयोजनम्,प्रतिपादिता च कारणकार्यान्वयभावनियमेन

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

'ब्रह्मविद् ब्रह्मैव भवती'ति श्रुत्यापि मुक्तानां ज्ञानरूपता । सुखं च स्पष्टं जागर्ति गदितग्रन्थगहनज्ञाननिपुणैः-'आनन्दं ब्रह्मणो रूपं, तच्च मोक्षे प्रतिष्ठितम्' । तथा'सुखं स्वाभाविकं यत्र, बुद्धिग्राह्य-मतीन्द्रियम् । तद्वै मोक्षं विजानीयाद् दुष्प्रापमकृतात्मभि' रित्या-दिनाऽनेकत्र । न च 'अशरीर' मिति विरोध इत्यन्यथा व्याख्येया इमाः । 'आर्षं धर्मोपदेशं च' वेदशास्त्राविरोधिना । यस्तर्केणानुस-न्धत्ते स एव वेद नेतर' ॥ इतिवचनादिति वाच्यम् । भवदभ्यु-पगमाङ्गीकृतौ प्रावृट्प्रोषितपथिकवत् पदे पदे श्रुतिविरोधवि-षमावपातेन स्खलनात् । ज्ञानसुखाद्यङ्गीकारे न क्वाप्यापद्यते स्खलनाऽस्खलितमतिमद्भिः । अवधार्यं तावदेतद्यदुत-'अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधि'रित्यादिनैवार्थनिर्णयः क्रियते कोविदकुलोच्चूलैः । प्रकरणं च तत्रेन्द्रियमनःप्राणोद्भवसुखदुःख-विषयकम् । तच्च न ब्रह्मण इति दर्शयन् पौद्गलिकसुखदुःखो-भयाभावं दर्शयन्न सुखमात्रं तिरस्करोति । प्रतिपादितं च तत्र तत्रात्मब्रह्मणोऽपरिमितविज्ञानसुखमयत्वं श्रुतिस्मृत्योरिति विहायासदाग्रहं स्वेष्टसिद्धिसाधनसावधानेन स्वीकार्यम् । ननु भवत्वात्मनः प्रतिबन्धकाऽभावापादनेन प्रतिबन्धकसंसर्गाऽभावस्य कार्यजनकत्वनियमात् ज्ञानानन्त्यमप्रतिपाति च, परं सुखस्यादृष्ट-जन्यत्वनियमात् अदृष्टस्य च मुक्तावंशतोप्यवृत्तेः कथं जाघटीत्य-नन्तसुखरूपताऽऽत्मनो मुक्तस्येति चेद्,वरं पृष्टं 'स्पष्ट वक्ता सदा सुखी'। आत्मनः सुखस्वभावत्वात् ज्ञानवत् समवायेन तत्सम्बन्धकल्पने-नैव भ्राम्यते भद्रकेन भ्रात्रा । नहि नभस्वदचेतनं निःसुखं वा आ-त्मद्रव्यं, येन तत्सम्बन्धेन चेतनावत् सुखी वा स्यादात्मा किन्त्व-विष्वग्भावसंबन्धेन तन्मयीभावमापन्ने द्वे । न च किमिति स्वसिद्धान्ततत्त्वमबुद्ध्वा उच्यतेऽनूचानशिरःशेखरेणैवम् । भवन्म-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ते हि न सुखदुःखकारणसातासातवेदनीयस्य घातिकर्मता पापठ्यते ज्ञानावरणीयादिवत्, किन्त्वघातितैव । तथा च कथं सुखात्मन आत्मन आवारकत्वं स्यादिति वाच्यम् । यथाहि-ज्ञानसर्गस्य सत्त्वस्येन्द्रियादि साहाय्यकर्तृ तथा सातादेरात्मस्वभावाविर्भावे साहाय्यकारित्वाक्षतेः न किञ्चित्क्षुण्णम् । सुखस्यात्मस्वभावत्वे घातितापि पर्याप्तिवन्नास्य गुणाघातात् । असातस्यापि वेदनस्वभावाविर्भावुकताऽस्त्येव, सातसाधनप्रमेलप्रभविष्णुत्वाच्चास्यौदयिकता । न चैतदिन्द्रियाणामस्ति विषयवितानापादकत्वम्, येन तस्यौदयिकता भवेत् । सातवेदनीयमपि सुखविशेषप्रभव एव कारणम्, तद्विशेषेण तद्विशेषजननात् । यथाहि-अत्रैवानुभूयमानं साम्यसुखं न तदुदयजन्यम्, तथैव सिद्धिसुखस्यापि नादृष्टसाधनता । तथा च नादृष्टाभावे सुखाद्यभावप्रसङ्गः सम्पादयितुं शक्यते शक्तिमद्भिरपि भवद्भिः । तादृशसिद्धिसद्भावेपि तदर्थिकप्रवृत्त्या वैराग्यव्याहतिरित्यपि न सम्यक्, मुनिसत्तमानां मोक्षभवविषयकसमानवृत्तिमत्त्वात् । यदपि स्यात्तत्र रागमत्त्वं, न तथापि वैराग्यव्याहतिः,वैषयिकसुखदुःखविरक्तत्वस्यैव वैराग्यत्वात् । अन्यथा साम्यसुधापूरप्लावितचित्तवृत्तीनां वर्षमात्रपर्यायेण परमशुक्लभावानां योगिनामनुत्तरसुरातिगसुखभाजनानां न स्याद्वैराग्यलेशोपि । न चाग्रतो नैवेच्छा, तदविनाभावित्वस्यैव प्रवृत्त्याऽनुमीयमानत्वात् । अत एव 'दुःखद्विट् सुखलिप्सु'रित्यत्र कारिकायां कारिकाकृत्योपनिबन्धयाञ्चकार मोहान्धत्वादित्यस्य हेतुताम् । अन्यथा सांसारिकरागपरिकरितवद्रागप्रेरितत्वेन प्रवृत्तेर्न स्यात्कदापि भवाभिनन्द्यादिवदात्मनिर्मलता । न चेष्टसाधनत्वज्ञानमृते प्रवर्त्तते कश्चिद्विपश्चित् । इष्टं च दुःखासम्भिन्नाभिलाषापनीताविच्छेदिसुखमयं

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

परमपदमिति सुष्ठूक्तम्-अनन्तज्ञानसुखात्मता सिद्धानामिति ज्ञापनाय तथाशब्दप्रयोगः । विंशत्यां विंशिकायां 'तेषां परमं सुखं चैवे'ति । तेषां-पूर्वप्रक्रान्तानां सिद्धानाम् । परोक्षार्थकतच्छब्द-प्रयोगश्च तेषां परमसुखस्वरूपाणां ऋते तथाविधातीन्द्रियार्थवे-दनविज्ञज्ञानं न कथञ्चनापि गम्यता । न च तेषामपि वचनविष-यतापत्तिस्तेषां स्वरूपस्य वाचः क्रमवर्त्तित्वात् परिमितत्वादायुष आनन्त्याच्च सुखस्येति दर्शनाय । न च तच्छब्देन परामर्शाद् अ-न्येऽतथाविधाः सिद्धाः सिद्धिगतिगता अनादिकालीना विद्यन्ते इति वाच्यम् । सिद्धताया एव तावदनुत्पत्तेः, असिद्धस्य सिद्धभावे एव सिद्धशब्दाभिधेयत्वात् । अतीतकाले हि विवक्षिते कर्मणि क्तप्रत्ययभावाद् । अतीतत्वं च तस्यैव यो वर्त्तमानतामापत् । 'भवति स नामातीतः प्राप्तो यो नाम वर्त्तमानत्वम् । एष्यँश्च नाम सभवति यः प्राप्स्यति वर्तमानत्वम्' ॥ इतिवचनात् । न च प्रागसिद्धस्य भवति सिद्धत्वेन वर्त्तमानता भावातीतताप्रतीतिः, अबन्धेन मोक्षाभावात् मोक्षस्य बन्धनान्तरीयकत्वात् नानादिकाः सिद्धा इति । बहुवचनं च सिद्धबहुत्वख्यापनाय । य एव मिथ्यात्वा-विरतिप्रमादकषाययोगानां बन्धहेतूनां प्रतिपक्षभूतेषु सम्यक्त्वम-हाव्रताऽप्रमादक्षान्तिमार्दवार्जवमुक्तिगुप्त्यादिषूद्यच्छन्ति यतन्ते च प्राग्बद्धानां निर्जरणाय ज्ञानपवित्रितेऽनघे तपसि, ते भवन्ति कर्मकलङ्ककृन्तनेन अनाद्यावृतात्मस्वभावप्रादुष्करणेन सिद्धभाव-भाजः । न च नवेयं नृपाज्ञा यदुत-स्यादेकस्यैवेयम्, न च तथा-भावे यमादि सफलम् । निर्णीतश्चैष पक्षो यदुत-येन यद्बद्धयते तत्प्रतिपक्षेण तन्निर्जीर्यते तदभावेन च संव्रियते । बन्धाभावे सत्यां च निर्जरायां भवत्येवाशेषादृष्टशोषः, अनेकद्वारनिर्गालितजलजाल-रुद्धजलागममार्गस्य सरसः शोषतेव । न चानादिकालीनस्य भावस्य

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

कथङ्कारं भवति नाशः,अनन्तत्वेन व्याप्तेरनादेरिति वाच्यम् । विचित्रा हि भावाः। केचित्तथाविधा अपि न सर्वे तथा। नहि अनादित्वमनन्तत्वेन विनानुपपन्नम्, न च साहचर्यं व्याप्तिः, स्वीक्रियते च सर्वैरपि स्वस्वशास्त्रनिष्णातैः प्रागभावस्यानादिसान्ता स्थितिः। भावोऽपि चातीतकालाख्योऽनादिसान्ततयाऽभिमत एवाखिलैरपि विदितवाङ्मयव्याख्यानैः। तद्वदियं कर्मणः स्यात्तर्हि को दोषः ?। किञ्च-नेदं स्थितिमपेक्ष्यानादिकमपि, सरित्स्रोतस इव प्रवाहेणैवानादित्वात् । न तिष्ठति च किञ्चिदपि कर्म सप्ततिसागरोपमकोटिकोटेरधिकम् । ननु भवतु मोक्षभावः, परं नियमोऽयम्-औत्पत्तिकस्य नाशेन विनाभाव इति । तथा च तेषामपि वाच्योऽन्तः कालेन कियतापि हीति न वाच्यम् । तादृशव्याप्त्यसिद्धेः, प्रध्वंसाभावेनाऽनागतकालेन च व्यभिचाराच्च । अन्यच्च-नाबीजमङ्कुरः, न चास्य कर्मलेशोपि वरीवर्त्तते, येन अवाप्नुयादशुभकर्मकल्मषोदीर्णक्लेशाऽऽजवंजवीभावभारभृति संसारे जन्मेति । अभिमतं चैतदन्यैरपि 'अनावृत्ते'रिति वाक्येनेत्यलं प्रसङ्गेन । परमता च सुखस्य अस्मादृशां ज्ञानाविषयत्वात्, ज्ञाततत्स्वरूपैरपि सर्वदर्शिभिरनभिधेयत्वादुपमाऽभावतो व्यक्तमभिधातुमशक्यत्वाच्च । मदिरोन्मत्तजात्यन्धपुरुषो न कदाप्याख्यातुं शक्नोति सूर्यस्वरूपम् । शेषं स्पष्टं निरूपितमर्वाग् मा विस्मार्ष्ट । सुखमिति । सुखयति-आत्मानं तदुपभोक्तारमाह्लादयतीति सुखम् । यद्यपि सामान्यापेक्षयोच्यते सुखशब्देन सातवेदनीयोदयोद्भव आत्मपरिणामस्तथापि तत्त्वतो न तस्याह्लादकत्वं विवेक्ष्यात्मनः, किन्तु स्वस्वरूपरमणतोद्भवस्यैव परमाह्लादजनकत्वम् । तत एव च सर्वैरपि परलोकाङ्गीकारकमतवादिभिस्तदर्थं क्रियते प्रयत्नः । सातवेदनीयोदयसम्पाद्यसुखस्य तु विभावत्वेनासातोदयसम्पाद्यदुःखवेदनवद् हेयत्वानति-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वृत्तेः । अभिमतं चेदं योगाचार्यैः 'परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च, दुःखमेव सर्वं विवेकिन'इतिवचसा, न्यायाचार्यैः 'न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्ये'त्यनेन सांसारिकभावस्य क्लेशत्वप्रकाशकसूत्रेण, कपिलर्षिणा च 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ' इत्यादिना । 'चैवे'त्यखण्डमव्ययं दुःखक्लेशस्यापि शून्यतादर्शनाय । (नहि) दुःखहेतुशरीरमनोवागभावात् 'सिद्धाणं नत्थि देहो' इत्यादि, न चात्मरमणतादिवद् दुःखमस्ति स्वाभाविकं, येन स्यात्तत्तेषां, किन्तु तदौपाधिकमेव । अत एव पठ्यते-'विकल्पसम्भवं दुःख'मित्यादि । अनुभूयते च दुःखस्य बाह्यहेतुसमुत्थता, सुखं तु बाह्यप्रवृत्तिपरिहारेण प्रत्यक्षसिद्धं साम्यसुधालवास्वादनिपुणानाम् । आह च महर्षिरपि तटस्थप्रतिबुबोधयिषया-'स्वर्गसुखानि परोक्षाण्यत्यन्तपरोक्षमेव मोक्षसुखम् । प्रत्यक्षं प्रशमसुखं न परवश्यं न व्ययप्राप्त' ॥ (प्रशम०) ॥ मित्यादि, तत्सुष्ठूक्तं'परमं सुखमेव'। यद्वा-अवधारणविधेरिष्टितो योजनाद् भिन्नक्रमोऽयं चैवेति, स च परममित्यनेन योज्यते । तथा च न तेषां सुखस्य परमतायां विकल्पः,अयोगव्यवच्छेदपरत्वात् विशेषणयुक्तावधारणस्य, धनुर्धर एव पार्थ इत्यादिवत् । यदि चायोगो व्यवच्छिद्यते, तदा क्व अभावसम्भावना लभते पदम् । अवधारणं चैतद्दुःखमिश्रत्वाभावादप्रतिपातात् अभिलाषापनीतत्वाच्च युज्यते एव । न चैवमन्यत्, यतो लवसप्तमसुराणामपि ॥ 'जइ ता लवसत्तमसुरविमाणवासी परिवडंति सुर' (उपदेश०) त्ति परमपुरुषवचनानुवादिवचनात् प्रतिपातः श्रूयते, का वार्त्तेतरस्य । ते हि यदि नरभवे लवसप्तकमप्यप्राप्स्यदधिकमायुरलभिष्यत निःशेषद्वन्द्वोपरममपवर्गम् । न च तत्तेषामभवत्षष्ठतपोऽपि, येनावशिष्टादृष्टेरणं विद-

॥ यदि तावद् लवसप्तमसुरविमानवासिनः परिपतन्ति सुराः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ध्यात् । ततस्तेषां भवद्वयभ्रान्तिमत्त्वं जातम् । श्रुत्वैतत्संविग्नैः कर्मणोऽल्पस्य फलमिदं तीव्रम् । उपयुक्ततरैर्भाव्यं, विश्वसनीयं च नाल्पमिति ॥ अत एवोक्तं प्राज्ञैः- 'प्रभूतफलदा भवन्त्यमी स्तोकाः । कृशानुकर्मकषायाः स्तोक इति तन्न विश्वास्यम्' ॥ प्रतिपादितैवाशेषस्य शेषस्याप्यनित्यता = 'चिंतिज्जंतं सेसं संसारे सासयं कयर'मित्यादिना । तेषामित्यनेन योजने त्ववधारणस्य नान्येषामेतदस्तीत्यवगमयेत्, विशेष्ययुक्तावधारणस्यान्ययोगव्यवच्छेदकत्वात् । अवसातव्यं चैतदपि पूर्वोक्तापरिशेषसांसारिकसत्त्वानित्यतादर्शकयुक्त्या । अन्यच्च-न कोऽप्यङ्गी प्राप्यते परमदुःखालये संसारे तादृशो यः पुद्गलसङ्गविमुक्तः स्यात् । तैजसकार्मणवन्तो हि यतः समे जीवाः, 'सर्वस्य' (तत्त्वार्थ०) इति वचनात् । न च चेतनामयस्य जीवस्य युक्तो योगो जडस्वभावभूतमयेन कर्मणा लोहेनेव सुवर्णस्य । व्यवहारे च कथं केषां किमिव सुखं स्यादृते कल्पनाकल्पितम् । स्पष्टं चैतत्संसारभावनाभावयितृणाम्, न च हस्तकङ्कणप्रत्यक्षेक्षायामादर्शोपयोग उपयुक्ततामेति । सिद्धमियताऽवधारणविचारेण तेषामेव परमं सुखमिति । अत्र पञ्चभिः कुलकम् । आरभ्य दशम्या यावत्पञ्चदशीगाथा तावदधिकारनिरूपणेनेति पञ्चदशगाथार्थः । अथैतदधिकारिणां सङ्ख्यां तत्प्रतिपादकगाथानामभिधेयनिदानभूतां सङ्ख्यां मन्दमतिविबोधनप्रयोजनकायाससाफल्यतां स्पष्टभिन्नभिन्नाधिकारतां चाव्यामोहायाऽऽख्यापयन्नाह–

एए इहाहिगारा वीसं वीसाहि चेव गाहाहिं ।
फुडवियडपायडत्था णेया पत्तेय पत्तेयं ॥१५॥

एतेऽनन्तरं गाथापञ्चकेन पूर्वं प्रतिपादिता अधिकारसूचना-लोका-

= चिन्त्यमानं शेषं संसारे शाश्वतं कतरत् ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नादित्व-कुलनीतिलोकधर्मद्वय-चरमपुद्गलावर्त्त-धर्मबीजादिक्रम-सम्यक्त्व-दानविधि-परमपूजाविधि-श्रावकधर्म-तत्प्रतिमा-यतिधर्म-द्विविधशिक्षा-शुद्धभिक्षाविधि-तदन्तराया-ऽऽलोचना-प्रायश्चित्तप्रभवशुद्धि-योगविधान-केवलज्ञान-सिद्धविभक्ति-तत्परमसुखलक्षणाः । 'समीपतरवर्त्ति चैतदो रूप'मितिवचनाद् एत एव समीपतरप्रतिपादिता ग्राह्याः । एतावन्मात्रस्य मन्दमतिविबोध्यत्वादर्थस्य । अन्ये मध्यमबुद्धिबुधजनबोध्या जीवास्तित्व-तन्नित्यत्व-कर्मसत्त्व-कर्त्तृत्व-भोक्तृत्व-मोक्षसत्त्व-तदुपायसद्भाव-ज्ञानक्रियोभयजन्यता-सदसत्-सामान्यविशेष-वाच्यावाच्यत्वोभयात्मकत्व-स्याद्वाद-प्रमाणनयवाद-तत्फलाद्याः सन्तोऽपि नाधिकृता अर्थाः, किन्तु तद्योग्या एत एवेति । 'इह' प्रस्तुते मन्दमतिविबोधनार्थके प्रकरणे, अधिकाराः पूर्ववत्प्रतिपाद्याः कियन्तः सङ्ख्ययैत ? इत्याह-'वीसं'ति । विंशतिः 'ईजिह्-वा-सिंह-त्रिंशद्विंशतौ (८।१।९२)' इति प्राकृतसूत्रेणाऽत्र तिना सहेतो दीर्घेकारे 'वीसा' इति । क्रियाऽव्ययविशेषणे (श्लो० ५९) इति लिङ्गानुशासनान्नपुंस्त्वे क्रियाविशेषणादिति द्वितीयायां 'वीसं'ति । ज्ञानानुकूलक्रियापेक्षया विशेषणताऽत्र । यद्वा-'गुणाद्याः क्लीबे वे'ति नपुंस्त्वं 'विंशत्याद्याः सदैकत्वे' (नामलिङ्गानु०) इत्येकवचनं च । प्रत्यधिकारमस्ति गाथानैयत्यं नवेति चेदाह-'वीसाहिं चेव गाहाहिं'ति । विंशत्या । बहुवचनं चाऽत्र प्राकृतत्वात् । अननुस्वारः सानुनासिको वाऽत्र भिसो हिरादेशः,अन्यथा छन्दोभङ्गापत्तेः । 'चैवे'ति निश्चयार्थमव्ययम् । एकान्नविंशत्येकविंशत्यादिसङ्ख्यगाथाव्यवच्छेदाय । एतेन प्रकरणस्याभिधापि सूचयाञ्चक्रे आचार्यैः 'विंशिके'ति । प्रमाणार्थे डिनि स्वार्थिके के स्त्रीत्वे च भवत्येव विंशिकेति । यद्वा-'विंशितिके'त्येव कापि प्रत्यययुगले 'सङ्ख्यायाः सङ्घसूत्रपाठे' (६।४।१७१) इतिसूत्रेण मानार्थे के

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्त्रीत्वविवक्षायां चापि सिद्धं विंशतिकेत्यपि । भवति च षोडशकाष्टक-पञ्चाशकादिवत् सङ्ख्यामानेन प्रकरणाभिधा । अत एव च नाऽऽदौ निर्दिष्टमभिधेयनिर्देशाधिकारे प्रकरणाभिधानमभियुक्तैः । गाथाभिः, 'चृगौ षष्ठोजो न्लौ वा पूर्वेऽर्धेऽपरे षष्ठो लार्या गाथा' (छन्दोनु ४।१) अत्र वृत्तिः- नौजेज इतिवर्त्तते, चृगौ-चगणसःतकं गुरुश्चार्द्धे यस्याः सा आर्या (चगणश्च चतुर्मात्रको गणो मात्राछन्दसि पठ्यते) अत्रापवादः- पूर्वेऽर्धे षष्ठो जगणो न्लौ वाऽपरेऽर्धे षष्ठो गणो लघुः कार्यः । अर्द्धग्रहणाद् आर्यादिषु पादव्यवस्था नास्ति । तेन 'द्वीपादन्यस्मादपि' इत्यादौ गणत्रयस्यान्ते लघोः गुरुत्वं न भवति । आर्यैव संस्कृतेतरभाषासु गाथासङ्ज्ञेति गाथाग्रहणम् । विकल्पसङ्ख्या तु छन्दोनुशासनाच्छन्दश्चूडामण्यादेरेवावधार्या । आर्यायां वक्तव्यान्तरमाह- 'षष्ठे न्ले लाद् द्वितीयात्सप्तमे चाद्यात्पदमन्यार्द्धे च पञ्चमे' (छन्दोनु० ४।२) । अत्रापि वृत्तिः-''पूर्वार्द्धे षष्ठे गणे न्ले सति द्वितीयाल्लादारभ्य पदं भवति, आद्यलघोर्विरतिः सप्तमे गणे न्ले त्वाद्याल्लघोर्विरतिः षष्ठगणान्ते यतिरित्यर्थः । अन्यार्द्धे-द्वितीयेऽर्द्धे पञ्चमे न्ले सत्याद्याल्लात्पदं चतुर्थगणान्ते यतिरित्यर्थः '' । यद्यप्यत्र गणत्रयान्तविरत्यादिना पथ्यादयो भेदाः सम्पद्यन्ते, परं नाऽत्र तत्सूक्ष्मेक्षिकोपयोगिनीति सा तत एवावसेया । इत्येवमुपदर्शितप्रकारेण लक्षणेन या लक्षिताश्छन्दोविशेषा गाथा इत्युच्यन्ते । ताभिः । नात्राऽन्या छन्दोविचितिरनुष्टुवुपजात्याद्या इति छन्दोऽभिधाननिर्देशः, तस्या एव बालयोग्यत्वात् । देश्ये दोहः-चतुष्पदिकादिवत् मुखोच्चार्यावबोधार्थंप्राप्तिधारणादिभावात् । कीदृशास्तेऽधिकारा ? इत्याह- 'फुडवियडपायडत्थ'त्ति, ये विंशत्या गाथाभिः प्रतिपिपादयिषितास्ते विंशतिरप्यधिकाराः स्फुटविकटप्रकटार्थाः, न शब्दगहना नार्थगहना न युक्तिगहना अर्थाः-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अभिधेया येषां ते स्फुटविकटप्रकटार्थाः । प्रकटशब्दस्य भवत्येव 'अतः समृद्धादौ' (८।१।४४) इति प्राकृतसूत्रेणादेरकारस्याकारे 'पायड'त्ति । अन्ये तु स्फुटार्था इत्यनेन प्रतिदिवसं चिन्तनश्रवणमननादिना क्षुण्णो विकचोऽर्थो येषां ते स्फुटार्थाः । विद्यन्त एव चाऽत्राधिकृतार्थाः सङ्घस्य क्षुण्णतया । विकटार्था इति तु विकटो-विस्तृतोऽर्थो येषांते विकटार्थाः । न चात्र सूत्रादिवत् लघुग्रन्थेनार्थप्रतिपादनं करिष्यंति पूज्यास्ततो हि स्याद् बोधो बुधानां, प्रकृतप्रयासश्च बालबोधनायेति विस्तारेणाभिधानं प्राकृतार्थाः । अत्रापि प्रकृतिः-लोकस्वभावो देवस्वभावो वा, तत्र भवं प्राकृतम् । देवानामर्धमागधीरूपप्राकृतभाषयैव भाषणात् । तेन बद्धा अर्था येषां ते प्राकृतार्थाः 'प्रत्यादौ-डस्तः' (८।१।२०६) इति सूत्रेणार्षीयविधिना 'सुकडदुक्कडे'त्यादिवड् डकारः । भवति चैवं बालानां महोपकारः, सुखाववोधोच्चारादिभावात् । तदुक्तं सिद्धान्तमधिकृत्य चिरन्तनैः 'बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम् । अनुग्रहार्थं तत्त्वज्ञैः, सिद्धान्तः प्राकृतः कृतः॥ इति तादृशोऽधिकाराः किमित्याह-'ज्ञेया' इति । सुगुरोः सकाशात् श्रुत्वावधारणीयाः । यद्यपि यथाधिकारमुपादेया एव सन्तीमेऽर्थास्तथापि न ज्ञानमृते उपादानं सम्भवतीत्येवमुक्तम् । किमेकस्यामेव विंशिकायामधिकारा विंशतिः ? नेत्याह- 'प्रत्येकप्रत्येक' मिति । अत्रैकमेकं प्रतीतिविग्रहेण 'योग्यतावीप्सानतिवृत्तिसादृश्य (३।१।४०)' इत्यनेनाव्ययीभावे न वीप्सायां पुनर्द्वित्वं, न पूर्वस्यादेश्च 'प्लुवि'ति तत्पुरुषगर्भिता वीप्सा बोध्या । द्वितीया च वीप्सायां क्रियाविशेषणेनैव । तथा चैकां प्रति गतोऽधिकारः प्रत्येकः नपुंसकत्वे वीप्सायामिति द्वित्वे 'प्लुप्चादावेकस्य स्यादे'र्वीप्सायामिति प्रथमप्रत्येकशब्दात् स्यादिप्लुपि च स्यादेव प्रत्येकप्रत्येकमिति । तथाच प्रत्येकप्रकरणे विंशत्या गाथाभिरेकैकोऽधिकारो । ग्रन्थे च

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समग्रे गाथाशतचतुष्केन विंशतिरधिकाराणामिति पर्यवस्यति। अन्यथा प्रतिविंशिकमधिकाराणां विंशतिरित्यनर्थ आपद्यते इति सुष्ठूक्तं-प्रत्येकप्रत्येकमिति। अथ सप्तमगाथायामुक्तं- 'यत्तद्देश-दर्शनात् कौतुकेन भविष्यति सूत्रे प्रत्युत प्रवृत्तिर्न तु तद्व्यवच्छेदो यतोऽयं तस्मादुद्धृत'मिति तत्स्मरन्नाह श्रोतृणामुद्देशज्ञापनायैतत्प्र-करणबोधस्य –

एए सोऊण बुहो परिभावंतो उ तंतजुत्तीए।
पाएण सुद्धबुद्धी जायइ सुत्तस्स जोगुत्ति ॥१७॥

एतान्–पूर्वं प्रक्रान्ततया समीपतरान्, यद्वा-हृद्विपरिवर्त्तनतया वक्ष्यमाणा अपि समीपतरास्तान् अधिकारान्, श्रुत्वा-श्रवण-विषयीकृत्य। अनेन श्रवणविधिराक्षिप्तः। पूर्वगाथोक्तस्फुटविकट-प्रकटार्थपदेन तावच्छुश्रूषोत्पादिता एतस्यैव प्रकरणस्य लघुनोपायेन विवक्षिताधिकारपरिज्ञानदर्शनात्। अद्वेषस्तु न भवत्येव बुभुत्सोः यस्य तु पूर्वव्युद्ग्राहितत्वेनाभूत् स पूर्वमेव प्रकरणस्योपकारितादर्शनेन निरस्तः सुतरां दूरतः, क? इत्याह- बुधः- विदितशास्त्रसतत्त्वः, न च मतिविबोधनार्थकत्वादेतत्प्रकरणस्य 'बुध्र' इत्ययुक्तमुच्यते, बुध इत्यस्य कर्तृत्वात् श्रवणप्राक्काल एव बुधत्वसम्भवान्न च वाच्यं-श्रुत्वा बुध इति वाच्यम्। मन्दमतिः स एवात्र ग्राह्यो यो व्याक-रणकाव्यन्यायनिपुणोऽपि समयतत्त्वावबोधविकलः-तथा च वक्ष्यति-परिभावयँश्च तन्त्रबुद्धयेति। तथा चाप्तप्रणीतप्रवचनापेक्षया मन्दमतिताऽपरशास्त्रापेक्षया च बुधतेति न कोऽपि दोषलेशोऽत्र। यद्वा-मन्दमतिरिति कर्त्ताऽध्याहार्यः। न चाऽध्याहारो दूषणम्, व्याख्याङ्गत्वात्तस्य क्रियया च कर्त्तुरवश्यमाक्षेपात्। तथा च प्रकरणस्यातिशयिता ख्याप्यते यत् श्रुत्वैतद् बुधत्वं प्राप्नोति श्रोता। तथा च बुध इत्यत्र बुधः सन्निति व्याख्येयं। तन्त्रयुक्तयोप्यत्र निबद्धा एव, याभिः स्यात् परिभावनेति नात्रापि दोषलेशः। अथवा

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मन्दमतिरपि 'आगमतत्त्वं तु बुधः परीक्षते सर्वयत्नेने'ति प्रस्तुत-प्रकरणकारव्युत्पादित एव बुधो ज्ञेयः। स हि 'वचनाराधनया खलु धर्मस्तद्बाधया त्वधर्म' इति धर्मगुह्यबोधादवाप्तबोध इति भवत्येव बुधः। पठ्यते चान्यत्रापि प्रवचनमात्रष्टकमात्रवेदिनो महाव्रतवतः पण्डितत्वम्, तत्त्वानुगमबुद्धेरेव पण्डात्वात्। अत एव चोक्तं-तन्त्रयुक्त्या परिभावना युक्तियुक्ता। न च श्रवणमात्रेण भवति तत्त्वावगम इत्याह- 'परिभावंतो' इति। परिभावयन्-श्रवणजनितबोधविषयकार्थस्य विचारणां कुर्वन् 'भूण् अवकल्कने' इति वचनात्। इयं परिभावनैवान्यत्र मीमांसाशब्देन पठ्यते, तस्यापि 'मान विचारणे' इत्येतद्धातुनिष्पन्नत्वात्। न चापरिभाविते भवति सुष्ठुबोधवत्ता। अत एव चान्यत्र बोधाधिकारे 'श्रुतचिन्ताभावनासार' इति परिपठितं पूज्यते। अथवा नहि पदार्थ-वाक्यार्थ-महावाक्यार्थबोधमात्राद् भवति तत्त्वावगमः, किन्तु तदैदम्पर्यार्थावगमेनैव, पदार्थमात्रबोधे शाब्द तत्त्वानवगमात्। वाक्यार्थेन सत्यपि शाब्दबोधे ऐकान्तिकी स्यात् प्रवृत्तिः,अपवादोत्सर्गोभयाप्रतिसन्धानात्। महावाक्यार्थे तत्प्रतिसन्धानेऽपि युक्तिकृतसमाधानसम्भवान्न यथावत्परिणतिः, परं सा स्यादैदम्पर्ये, आज्ञातत्त्वपर्यन्तानुधावनादिति परिभावनोक्ता। यतः 'सर्वे जीवा न हन्तव्या' इत्यत्र सर्वादिपदानामर्थेषु निखिलादिषु ज्ञातेषु यावत्प्राणधारकानुयोगिकविषयकप्राणवियोगप्रयुक्तानिष्टोद्भवज्ञानरूपे वाक्यार्थज्ञाने जाते आहार-विहार-प्रतिक्रमण-प्रतिलेखन-जिनपूजा-दानादिनिषेधापत्तौ-अपवादातिरिक्तयावज्जीवहननजमनिष्टमिति महावाक्यार्थज्ञानस्य प्रतिसन्धानेऽपि न स्वमत्यापादित-भिन्नानेकप्रयोजनविहितहिंसावदपवादापादने सम्यगर्थगतिः स्यादिति यावन्न धावति यतनाभा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ववद् व्यापारप्रयुक्तयावज्जीववुद्धिविधायकहननं बलवदनिष्टानुबन्धीत्येवंरूपमेदम्पर्यज्ञानं, न तावत्सम्यक् प्रवृत्तिप्रयोजकं भवति ज्ञानमिति सूक्तम्-'परिभावयन्नि'ति। अनेनैवाऽऽगमस्य शुद्धत्वमभ्युपगम्यते। यदाह-'ऐदम्पर्यं शुद्ध्यति यत्रासावागमः सुपरिशुद्ध। इत्यादि। तुरवधारणे। स च परिभावनामन्तरेण शुद्धबुद्धित्वाभावमवगमयति। नहि यथाश्रुतार्थग्राही भवति शुद्धबुद्धिः। माषतुषादीनां तु स्वयं तथाविधज्ञानाऽक्षमत्वेपि चक्षुष्मदनुसरणशरणकान्धवद् ज्ञानफलोपलम्भ एव। यदाह-यो निरनुबन्धदोषात् श्राद्धोऽनाभोगवान् वृजिनभीरुः। गुरुभक्तो ग्रहरहितः सोऽपि ज्ञान्येव तत्फलतः' ॥१॥ (षोडशके) न च केषाञ्चित्तथाविधानां विधिवैचित्र्यादेव फलभावेऽपि सर्वैः सन्त्यक्तप्रयत्नैर्भाव्यम्। ज्ञान्येऽन्धपरम्परैव स्यादेवम्। नहि जगत्यप्यन्धस्य सन्नेत्रानुसरणेनेष्टालयानुप्राप्तिमवगम्य चक्षूरत्नरक्षणयत्ननिरपेक्षा निरीक्ष्यन्ते नराः। कया परिभावयन्? इत्याह 'तन्त्रयुक्त्ये'ति। तन्त्रं-आगमः तदनुसारिण्या युक्त्या–तर्केण, नहि केवलतर्कानुसरणेनावाप्यतेऽभीष्टोऽर्थः। उक्तं चात एव 'ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः। कालेनैतावता प्राज्ञैः, कृतः स्यात्तेषु निश्चयः। (योगदृष्टि०) इति। तद्वदेव च न केवलतन्त्रानुसारेणाप्यवबुद्ध्यतेऽर्थः, युक्तिमन्तरा तदर्थसम्यक्त्वानवगतेः। अत एव चोक्तम् ॥ जं जह भणियं सुत्ते तहेव तं जइ वियालणा नत्थि। किं कालियाणुओगो दिट्ठो दिट्ठिप्पहाणेहिंति ॥ प्रोच्यते चात एव प्रतिशास्त्रमधिकारिज्ञानस्यावश्यकता। तादृशश्च तच्छास्त्रावबोधविचारार्हज्ञानवदेव प्रतिपाद्यते प्रतिपादकैः। विचारेणैवंविधेन परिशुद्धा प्रतिप-

॥ यद् यथा भणितं सूत्रे तथैव तद् यदि विचारणा नास्ति।
किं कालिकानुयोगो दृष्टो दृष्टिप्रधानैः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

त्तिः-उपादेयस्योपादानं हेयस्य हानं ज्ञेयस्य ज्ञानमित्येवंलक्षणा, स्यान्मानसिको निश्चयः । न ह्येवंविधनिश्चयाभावे प्रतिहन्यमानोऽपि विविधैरपायोपचयैः स्वसाध्यसाधने भवति दृढः । अत एव च सम्यक्त्वस्यापवर्गसाधनताऽभिमता भिन्नैव ज्ञानक्रियाभ्याम् । उच्यते च-'ध्यानं कष्टनिधानमि'त्यादिना सम्यक्त्वहीनज्ञानक्रिययोरनर्थकत्वम् । भवति चैवंविधमीमांसावत उपादेयार्थोपादानादि । तथा च स्यादेवाष्टाङ्गिकी प्रवृत्तिस्तस्य तत्त्वविषयिणी । यदाह– 'अद्वेषो जिज्ञासा-शुश्रूषा-श्रवण-बोध-मीमांसा । परिशुद्धा प्रतिपत्तिः प्रवृत्तिरष्टाङ्गिकी तत्त्वे' ।। इति । ततश्च किमित्याह- 'प्रायेण शुद्धबुद्धि'रिति । प्रायेण-बाहुल्येन, प्रायोग्रहणं चात्र न कल्पयितुमपि शक्यते कर्मानुभाव इयत्ता यदुत-क्वाऽपकारप्रकरं विधास्यति । विचित्रा हि कर्मणां गतिः । यत्प्रभावादवाप्नोत्युपशान्तमोहोऽपि यावन् मिथ्यात्वगुणास्पदमवपातं निरन्तदुरन्तसंसारसंसरणं च, का कथा तर्हीतरस्येति युक्तमेव प्रायोग्रहणम् । यद्वा-मिथ्यात्वप्रचुरे काले निर्णीतोप्यर्थः कुवादियुक्त्यपव्याख्यादिभिरन्यथाऽऽपाद्यत्त एव तत्संसर्गिभिः । प्रसिद्धं चैतत्सिद्धर्षिकिवदन्तीविदुषां विदुषामम्बडादीनां वा श्रीमत्तीर्थकरवदननिःसृतकेवलालोकपरिपूतवचःश्राविणामपि । तत्सूक्तं-'प्रायेणे'ति । शुद्धा-निर्मला अश्रद्धानारुच्यादिकलङ्कमुक्ता अनेकदुरवगाह्यावगाहनकुशलावधारणेहापोहतत्त्वज्ञानयुक्ता बुद्धिर्मतिर्यस्य स शुद्धबुद्धिः । अन्येतु 'भुवोऽवज्ञानेवा (सि० ५।३।६४) परे'रिति श्रीसिद्धहैमानुशासनशासनात् 'परिभावो विप्रकारः परापर्यभितो भव' इति नाममालाभिधानाच्च पर्युपसर्गपूर्वकभूधातोस्तिरस्कारार्थकत्वात् मिथ्यात्वबुद्धिमिति तत्कर्माध्याहार्यम् । तथा चैतानधिकारान् श्रुत्वा तन्त्रयुक्त्या मिथ्यात्ववासनामनादिकालीनामनन्तसंसारसंसरणकारिणीं तिर-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्कुर्वन् प्रायेण शुद्धबुद्धिरित्येवं व्याचक्षते । तत्र 'प्रायेणे'ति विशेषणस्यापि युक्तियुक्ततामाचक्षते । एवं यन्न सर्वः श्रोतैकान्तहितकृच्छास्त्रशिष्टशासनश्रवणनिरतोप्यवाप्नोति शुद्धबुद्धिरूपं धर्मम् । यदाहुर्वाचककुलावतंसाः-'न भवति धर्मः श्रोतुः सर्वस्यैकान्ततो हितश्रवणात् । अभिमतं चैतत्प्रकरणकर्त्तृभिरप्यन्यत्र । यदुक्तं तैरेव पूज्यैः-'एकरसमपि तद्वाक्यं वक्तुर्वदनाद्विनिःसृतं तच्च । नानाभावं गच्छति पृथक् पृथग् भावमासाद्य'॥१॥इति । न चैवमपि विरोधलेशोऽपीक्ष्यते । एवंविधः सन् किमित्याह'-सूत्रस्य योग्य' इति । तत्र सूत्रयति-विमुञ्चति अल्पाक्षरैरपरिमितानर्थानिति सूत्रम्, 'सूत्रण् विमोचने' इतिवचनात् । 'अच्' (५।१।४९) इत्यचि सूत्रम् । पठ्यते च- ◈ 'सव्वनईण जइ हुज्ज वालुया सव्वोदहीण जं उदयं । तत्तो अणंतगुणिओ अत्थो इक्कस्स सुत्तस्स ॥ इति । अत्र वालुकानां कणा उदधीनां च विप्रुष इति सङ्ख्यायामसङ्गतिः । स्पष्टं चेदमाद्याङ्गाऽऽवर्त्तसूत्रादिव्याख्या तद्गमव्याख्याऽवगन्तृणाम् । अत एव चापरिमितातिशयितज्ञानवत्पुरुषपराक्रमजन्यमेवैतत् । ◈ 'सुत्तं गणहररइयं तहेव पत्तेयबुद्धरइयं च । सुयकेवलिणा रइयं अभिण्णदसपुव्विणा रइयं' ॥१॥ इत्यादिना प्रतिपादितम् । निरूप्यते चात एवास्यानुयोगविधिः । ◈ 'सुत्तत्थो खलु पढमो बीओनिज्जुत्तिमीसिओ भणिओ । तइओ निरवसेसो एस विही होइ

◈ सर्वनदीनां यदि भवेयुः वालुकाः सर्वोदधीनां यदुदकम् ।
तस्माद् अनन्तगुणितोऽर्थ एकस्य सूत्रस्य ॥१॥
◈ सूत्रं गणधररचितं तथैव प्रत्येकबुद्धरचितं च ।
श्रुतकेवलिना रचितं अभिन्नदशपूर्विणा रचितम् ॥
◈ सूत्रार्थः खलु प्रथमः द्वितीयो निर्युक्तिमीश्रितो भणितः ।
तृतीयो निरवशेष एष विधिः भवति अनुयोगे ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

अणुओगे'त्ति । एतेन ये कलुषकलिकालकल्मषकलुषितान्तःकरण-कोटय ऊचुर्निर्युक्त्यादेरस्वीकार्यतां, प्रवर्त्तन्ते च तदुद्धृतलोकभाषा-मयस्वकपोलकल्पिताऽनेकानर्थव्याख्यानुसारेण । ते निरस्ता द्रष्टव्याः अर्थमन्तरा मूककल्पत्वात् श्रुतस्य सूत्ररूपस्य । अन्यच्च-सूत्ररचनं ह्यावत् श्रीमत्तीर्थकृत्प्रणीतार्थानुरोधेनैव अनेकलब्धिनिधानपूर्वभवोपा-त्तगणभृत्कर्मोदयवत्-श्रीमद्गणधारिभिः कृतम् । अर्थाप्रामाण्ये च सुतरां तदप्रामाण्यं सम्पद्यते श्रीमतां भवताम्,अवबोध्यं च भवद्भिर्य-त्सूत्रप्रदानपटोरुपाध्यायता अर्थवितरणविचक्षणस्य त्वाचार्यतेत्या-दिनाप्यर्थस्य महीयस्ता प्रामाण्यता चेत्यलं प्रसङ्गेन । तस्यैवंविधस्य सूत्रस्य योग्योऽर्हः । भवति च सूत्रदानेऽपि योग्यायोग्यपरीक्षणम् । न च वाच्यं भव्याभव्यविचारो नहि युक्तोऽनुपकृतपरहितरताना-मनुग्राहकाणामिति । नह्यायतीक्षिणो हितैषिणो ज्वरिताय दद्युः स्निग्धं भोजनम् । तथा च तददानमेव तेषामनुग्रहः । एवमत्रापि * परिणाम्यपरिणाम्यतिपरिणामिभेदेन त्रिविधेषु जीवेषु सत्सु य एव परिणामिनस्त एवार्हाः सूत्रस्य, नेतरौ । दायकश्चाभ्यां सूत्रस्यावाप्नोति दुरन्तसंसारकान्तारक्रान्ति परिणामानिष्टाम् । न च विचक्षणो वीक्ष्यते कोऽपि जीवनाधारमपि जीवनमादधात्या-मघटे, तद्वत्सूत्ररहस्यमपि परिणामिभ्य एव देयमिति यथार्थमुक्तं-'सूत्रस्य योग्यो जायते' । केचित्तु प्रायेणेति क्रियया योजयित्वा तथाविधपरिभावनाकुशला अपि य एव परिणामिनस्त एव सूत्रस्य योग्या भवन्तीति व्याख्याञ्चक्रुः । 'जायते' इति प्रादुर्भावार्थधातुना ज्ञापयन्त्याचार्याः-प्रागयोग्यस्यापि योग्यतोद्भवः । अत एव चानेकशः परीक्षणाऽऽम्नायोऽपि सङ्गत एवावसेयः । इति सप्तदशगाथार्थः ।

* परिणामी-उत्सर्गापवादप्रियः । अपरिणामी-उत्सर्गप्रियः ।
अतिपरिणामी–अपवादप्रियः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ननु के ते गुणाः ? येन बुद्धेः शुद्धिः स्यात्, स्याद्वा तत्त्वज्ञानयोग्यतया सूत्रयोग्यतेति चेदाह-तान् नियमभूतान् गुणान् न यान्विना भवति तत्त्वज्ञतेति –

मज्झत्थयाइ नियमा सुबुद्धिजोएण अत्थियाए व ।
नज्जइ तत्तविसेसो न अन्नहा इत्थ जइयव्वं ॥१८॥

तत्र मध्यं-अन्तरालं प्रस्तावाद् रागद्वेषयोः तत्र तिष्ठतीति मध्यस्थः । 'आतो डोऽह् वावाम (५।१।७६)' इति डे मध्यस्थः- तत्त्वावबोधप्रतिबन्धकीभूतरागद्वेषविकल इत्यर्थः । न चावाप्नुयात् नवीनवधूटीवधूरागरक्त-गोमयव्यञ्जनास्वादकवणिक्पुत्रवज्जातातिरागो भव्यमपि धर्मं तद्बोधं वा । अत एवाप्रशस्तवासनावासिता ये अवाम्याः ते अयोग्या दर्शिता दृष्टादृष्टार्थदर्शननिपुणोपदेशकैः । नहि सीधुवासिते घटे किञ्चिन्निधीयते धीनिधिभिः भोज्यादि घृतादिर्वा । पापठ्यते चातः प्रवचनप्रभावनापरायणैः परमपुरुषैः-'कामरागस्नेहरागावीषत्करनिवारणौ । दृष्टिरागस्तु पापीयान्, दुरुच्छेदः सतामपी'-॥(वीतराग०) ति । युक्तं चैतत् संसारानित्यतादिभावनौषधेन कामरागस्नेहरागाऽऽमयनिवारणस्य सुकरत्वाद् । दृष्टिरागस्तु जलेनौर्ववह्निवद्यात्येव भावनाभिर्वृद्धिम् । तद्वद् द्विष्टोऽपि नोपलभत एव किञ्चिदपि भावुकं परमभावुकादपि । यथाहि-कर्षकाधमोऽशेषाङ्गिसाधारणाऽसाधारणहितकरणकठिनात् श्रीमदर्हतो महावीरादप्यवापाऽवपातं लब्धस्यापि गुणरत्नमकराकरायमाणश्रीगौतमगणधरादनर्घधर्मरत्नस्य । यथा वा चिराज्ञानतमस्ततितिरोहितहिताहितविचारविलोचनलोकाऽऽलोकनोद्भूताद्भुतकृपापारावारप्रवर्त्तितशासनस्य युगादिप्रभोः परमप्रभावान्वितपरमपुरुषार्थदेशनदक्षदेशनायाम् अवाप्स्यद्वासुदेवचक्रवर्त्तिजिनेश्वरमदोन्मत्तमरीचिमार्गितमार्गावतारनिर्मितदुर्भाग्यदुर्भाग्यदुर्भगकपिलः । आस्तामन्यत्, तावज्जिनेश्वरस्याप्यखिलगुणाकरस्य स्तुतिरपि रागद्वेषाभ्यां स्वतन्त्रहे-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

तुभ्यां विधीयमाना नावतरति विधेयताम्, यदाहुः– विषमकाल-विषमविषोत्तारणतरुणधन्वन्तरिधर्मा श्रीसिद्धसेनदिवाकराः- 'न केवलं श्राद्धतयैव नूयसे, गुणज्ञपूज्योऽसि यतोऽयमादरः'। आहुश्चापूर्वविद्यादिचमत्कारचमत्कारितचमत्कारचञ्चवः श्रीहेमचन्द्राचार्या अपि-'न श्रद्धयैव त्वयि पक्षपातो, न द्वेषमात्रादरुचिः परेषु। यथावदाप्तत्वपरीक्षया तु, त्वामेव वीर ! प्रभुमाश्रिताःस्मे'ति। प्रस्तुतप्रकरणकारा अपि सदालोकलोकनीयचतुश्चत्वारिंशाऽधिकचतुर्दशप्रकरणकल्पकल्पनविष्ण्वधिकशतगुणमहिमानः- 'पक्षपातो न मे वीरे, न द्वेषः कपिलादिषु। युक्तिमद्वचनं यस्य, तस्य कार्यः परिग्रहः॥१॥ युक्तं चैतद् गुणानपेक्षणेन पुरुषव्यक्तिमात्रगतरागस्य धर्मरागत्वाभावात्। आस्तामन्यत्, धर्मरागसहचरितोप्यसौ पुरुषव्यक्तिरागश्चेत्तीव्रो भवत्येवानर्थप्रदः श्रीगौतमस्य दीक्षादानप्रभावमात्रवितीर्णानेकजनकेवलशुद्धस्वरूपकैवल्यज्ञानस्य श्रीमन्महावीरस्योपरि रागातिशयितेव। व्यञ्जितं चैतद्भगवतापि तेभ्यः ॥॥ 'चिरसंथुओसि गोयमा ! चिरपरिचिओसि गोयमे'त्यादिना। जातं च तेषां महामहिमवतां सुगृहीतनामधेयानां 'वी' तिशब्देन वीतरागतां भावयतां भगवतां सकललोकालोकावलोकनलष्टं केवलमिति। न च आगमोऽपि जैनैरङ्गीक्रियते केवलं स्वतया, किन्तु यथार्थार्थिप्ररूपणप्रवणतयैव। तदाहुः- स्वाऽऽगमं रागमात्रेण द्वेषमात्रात्परागमम्। न श्रयामस्त्यजामो वा, किन्तु मध्यस्थया दृशे॥ ति। सुष्ठु अवधार्यं भावद्भिर्भवद्भिर्भगवद्वाक्यतत्त्वमिति। तस्य मध्यस्थस्य भावो मध्यस्थता तया हेतुभूतया। अनेनास्य कार्यजनकतामाह। कारणं च तदेव यदनन्यथासिद्धम्। हेतुतृतीययया चाचष्टे आचार्यो माध्यस्थ्यं विना तत्त्वज्ञानाऽभावम्। अवश्यं-

॥॥ चिरसंस्तुतोऽसि गौतम ! चिरपरिचितोऽसि गौतम !।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भावी च सति माध्यस्थ्ये तत्त्वावबोधो गाढमिथ्यात्विनोऽपि, प्रदेशिराजवत् । न चेयं मध्यस्थता वृश्चिकोत्पत्तौ वृश्चिकस्येवानेकान्तिकहेतुतां दधतीत्याह-नियमाद्-अवश्यंतया, न भवति हि तत्त्वावबोधोऽन्यथा, येनेयमनैकान्तिकी भवेत् । इदं च पदं गृहदीपकन्यायेन सर्वत्र योज्यम् । न च वाच्यं व्यवच्छेदफलत्वाद्वाक्यस्य,अनुक्तेप्येतस्मिन्नभविष्यदेव नियमः, किं स्पष्टोच्चारणेन, न हि व्यवच्छेद्यं व्यवच्छिद्यतेऽन्तरा विधेयनिरूपणमिति । अत्र 'नियमादि'तिपदेन ज्ञापयति, यदुत-यथायोग्यमेवावधारणविधिर्विज्ञेयो विधिनिपुणै,:अन्यथैक आत्मैको दण्ड इत्यादि-स्वसमयार्थप्ररूपकपटुपदानां व्याख्यानेऽध्याहार्यमाणेऽवधारणे भवत्येव परसमयवाच्यताऽऽपातः । न च केवलं मध्यस्थतैव पदार्थतत्त्वावगमनपटीयसी, तस्या मोहमहाराजसामन्तास्पददर्शनमोहनिराकरणप्रत्यलत्वादित्याह- 'सुबुद्धिजोएण'त्ति । सुष्ठु-सज्ज्ञानावरणह्रासससमुत्था महोदयनिबन्धना,नतु विषयप्रतिभासाऽऽत्मपरिणतिमज्ज्ञानयुगलवद् अज्ञानावरणज्ञानावरणापायोद्भवा, तयोर्हि हेयत्वाद्यनिश्चयात् पातादिपारतन्त्र्यान्न कापि पारमार्थिकी परमार्थप्राप्तिवल्लरी वलगते चित्तमहीरुहे, तादृशी या बुद्धिः- प्रतिभा मतिज्ञानवाच्या, तस्या एव श्रुततत्त्वावधारणधौरेयत्वाद् । उच्यते च-'श्रुतं मतिपूर्वं' (तत्त्वार्थ०) मिति । न चात्र पूर्वकता पूर्वक्षणवृत्तित्वमात्रा किन्तु निमित्तभूता श्रुतस्य, धारणाहेतुकत्वनियमात् । भवति धारणावत एव श्रुतोद्भवः, वाच्यवाचकभावसंस्पृष्टार्थग्राहिणः श्रुतत्वेन प्रतिपादनात् । वाच्यवाचकभावावधारणमन्तरेण च न वाच्यवाचकयोर्वाच्यवाचकत्वेनावगतिरिति । अत एव पठ्यते-[1] 'अक्खरलंभेण समा ऊणहिया हुंति मइविसेसेहिं'ति । तस्या योगः- प्राप्तिः तत्प्रतिबन्धककर्मक्षयोपशमेन । ननु या

[1] अक्षरलाभेन समा ऊनाधिका भवन्ति मतिविशेषैः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

सुबुद्धिः सा क्षयोपशमेनैव युक्ता भवतीति नार्थो 'योगेने'तिपदेनेति चेन्न,अभिप्रायापरिज्ञानात् । क्षयोपशमस्यानित्यतां ध्वनयन्नाहमि (इ)-दमभियुक्तो यदुत-उत्पन्नपूर्वापि क्षयोपशमेन यदि तत्त्वावबोधकाले यदि स्यात्तर्ह्येव तत्त्वावबोधः । दृश्यन्ते चानेकेऽनेकविधक्षयोपशमभाजो ये क्वचित्कार्यविशेषे बुद्धिपाटवोपेता अपि नेतरकार्ये पाटवोपेता इति । तत्त्वावगमयोग्यसुबुद्धियोग्यप्रतिपादनाय 'योगेने'ति । ननु योगोऽप्राप्तयो.प्राप्तिः । न च ज्ञानमन्यत आगत्यात्मना सम्बध्यते, येन वक्तुं योग्यं स्यात् सुबुद्धियोगेनेति चेन्न, योगो ह्यत्र सम्बन्धमात्र एवाभिप्रेतः । सोऽपि गुणिगुणिनोः कथञ्चिद्भिन्नत्वात् नानुचितिमञ्चत्युच्यमानः । नहि प्रथमं साविर्भूताऽभूदधुनैव तस्या आविर्भावात् इत्यस्त्येव वाऽप्राप्तप्राप्तिः, न स्यादन्यथात्माऽऽकाशयोरपि संयुक्तता, तेषां द्रव्यत्वेन भिन्नत्वेऽपि क्षेत्रत्वेन भिन्नाधिकरणावृत्तित्वाद् । वैशेषिकाणां द्रव्यद्रव्ययोरिव कथञ्चिद् द्रव्यगुणयोरपि कथञ्चिद्भिन्नत्वात् स्यादेव योगयुक्तताऽत्रेति । नूत्नास्तु स्वसिद्धान्तादृतिमात्रमानसा नाऽत्रेक्षणीया अपि । संयोगस्य परस्परमीलनार्थत्वाद्विद्यते चेदं तयोरिति । तृतीया त्वत्रापि पूर्ववद्धेतावेव । 'निक्षमादि'ति पदमपि पूर्ववदेवाऽऽयोज्यम् । स्पष्टं चेदं यत् सुबुद्धियोगेनैव तत्त्वावगमो, न ज्ञानाभावे । अन्ये तु 'सुबुद्धियोगेने'त्यन्यथा व्याचक्षते-सुष्ठु-अनाग्रहा अनुग्रहमयी वा बुद्धिर्मतिर्यस्य स सुबुद्धिस्तादृशो गुरुस्तस्य योगेन- समागमेनेति । भवत्येव च तादृशानन्यसाधारणाऽसाधारणोपकारकरणप्रगुणगुरुगुणगुम्फितगुरुसमागमेनैव तत्त्वततितत्त्वावगमः । यदाह–विना गुरुभ्यो गुणनीरधिभ्यो, नार्थं विजानाति विचक्षणोऽपि । आकर्णदीर्घोज्ज्वललोचनोऽपि, दीपं विना पश्यति नान्धकारे ॥१॥ अपूर्वपूर्वरत्नरोहणाचल आह वाचकोऽपि-'गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि । तस्मा-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

द् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ।।१।। तथा 'नारककृतप्रवासोऽप्याप त्रिदशालयं प्रदेशिनृपः । महिमाऽचिन्त्यः स गुरोः केशिकुमारस्य बुद्धस्य' ।।१।। आर्षेऽपि-पुज्जा जस्स पसीयंति,संबुद्धा पुव्वसंथुआ । संपुण्णं लाभइस्संति, विउलं अट्ठियं सुयं ।।१।। न चानेवंविधस्यावगमो भवति प्रशस्यः । यदाह–'नहि भवति निर्विगोपकमनुपासितगुरुकुलस्य विज्ञानम् । प्रकटितपश्चाद्भागं पश्यत नृत्यं मयूरस्य ।।१।। उक्तं च पूज्यैरेवान्यत्र-॥ 'गुरुमूले सुयधम्मो' तथा 'सुंदरगुरुजोगो विय जस्स तओ एत्थ उचिओ'त्ति । स्पष्टसुगुरुपदानुच्चारणं तु गीतार्थस्यैव देशनार्हत्वप्रतिपादनाय । यदाह– ॥ 'अगीयत्थस्स वयणेणं अमियंपि न घुट्टए । गीयत्थस्स उ वयणेणं विसं हालाहलं पिबे' ।। धर्मर्षिरपि – जं जयइ अगीयत्थो जं च अगीयत्थनिस्सिओ जयइ । वट्टावेइ य गच्छं अणंतसंसारिओ होइ ।। पूज्या अपि– अगीयत्थस्स संसग्गि सव्वं तिविहेण वोसिरे । मुक्खमग्गपहे विग्घं पहंमि तेणगा जहा ।। धर्मकथनावसरेऽपि 'धम्मो जिणपण्णत्तो विबोहणो भविअपुंडरीयाणं । संसारसमुद्दमहणो पगप्पजइणा कहेयव्वो' ।। अगीतार्थस्तु, 'अन्नं कुदेसणाए कटुयरागंमि पाडेइ । इत्यादि प्रोचिवांसः प्रवचनप्रभावका इति सुष्ठूक्तं-'सुबुद्धियोगेने'-

॥ पूज्या यस्य प्रसीदन्ति सम्बुद्धाः पूर्वसंस्तुताः ।
सम्पूर्ण लम्भयिष्यन्ति विपुलमर्थिकं श्रुतम् ।।१।।

॥ गुरुमूले श्रुतधर्मः । सुन्दरगुरुयोगोऽपि च यस्य तकः अत्र उचितः ।

॥ अगीतार्थस्य वचनेन अमृतमपि न पिबेत् ।। गीतार्थस्य तु वचनेन विषं हालाहालं पिबेत् ।। यद् यतते अगीतार्थो यच्चागीतार्थनिश्रितो यतते वर्तयति च गच्छं अनन्तसंसारिको भवति । अगीतार्थस्य संसर्गं सर्वं त्रिविधेन व्युत्सृजेत् । मोक्षमार्गपथि विघ्नं पथि स्तेनका यथा ।। धर्मो जिनप्रज्ञप्तो विबोधनो भव्यपुण्डरीकाणाम् । संसारसमुद्रमथनः, प्रकल्पयतिना कथयितव्यः ।।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ति । न चैतदचारु । न च वाच्यमग्रेतनगाथायां गुरुसेवां प्रतिपादयिष्यतीति । तस्या विधेयत्वेन प्रतिपादनात् । अत्र तु तत्त्वविशेषावगमाय तन्निबन्धान्न पौनरुक्त्यमिति । न च मध्यस्थस्यापि सुगुरुपार्श्वेपि विनाऽऽस्तिक्येन यथावद्भवति तत्त्वावगमः, हंसपरमहंसयोरिव । तौ हि नाभिनिवेशवन्तौ, न च तयोर्न सुबुद्धियोगो, तथापि नावबुद्धयेतां तत्त्वमाभ्यामित्यास्तिक्ययोगायाऽऽह-'अत्थियाए य'त्ति । तत्र अस्ति जीवादिरिति मतिरस्य स आस्तिकः । 'नास्तिकाऽऽस्तिक दैष्टिक' (६।४।६६) मिति शब्दनिष्पत्तिः । स च द्विधा-धर्मत आस्तिको धर्मितश्चास्तिकः । धर्मतो हि ते आस्तिका अवबोद्धव्याः, ये यथार्थं विद्यमानं ज्ञानादिधर्मसमुदायं यथार्थतया श्रद्दधते । धर्मितोऽपि यथार्थं जीवादिपदार्थं यथार्थतया श्रद्दधानाः । ततश्च ये जीवस्य कर्तृत्व-यावच्छरीरव्यापित्व-पृथक्त्वादि निह्नुवते, ते धर्मनास्तिकाः । ये च जीवं परलोकं मोक्षं वाऽपलपन्ते, ते धर्मिनास्तिकाः । एतेन येऽज्ञातज्ञेयस्वरूपा यथा तथा प्रलपन्ति, ते निरस्ता द्रष्टव्याः । नहि स्वकपोलकल्पितपदार्थानङ्गीकारमात्रेण नास्तिकत्वं कथयितुं पार्यते केनापि । तथा सति सर्वेषामन्याऽन्यापेक्षया नास्तिकत्वापत्तेः । नहि किमपि दर्शनं तावत्तादृक् समस्ति, यत् सर्वदर्शनैः समानार्थश्रद्धानं स्यात् । यद्यपि जैनानां तु तदप्यस्ति । यतो न जैनैरेकान्तेन किञ्चिन्निषेध्यमस्ति, न च ते सर्वथा निषेध्या अपि नयभेदत्वात्तेषाम् । ॥ 'जावइया वयणपहा तावइया हुंति चेव-नयवाय'त्ति वचनात् । सर्वं च जैनैरङ्गीक्रियते स्यात्पक्षेणेति सर्वमस्ति सर्वज्ञशासने, न चान्येषामस्ति शासने सर्वज्ञशासनवक्तव्यता । तदाहुर्दिवाकरपादाः- 'उदधाविव सर्वसिन्धवस्समुदीर्णा-

॥ यावन्तो वचनपथाः तावन्तो भवन्ति एव नयवादाः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्त्वयि नाथ ! दृष्टयः । न च तासु भवान् विदृश्यते, प्रविभक्तासु सरित्स्ववोदधिः ॥ अन्यच्च- तैर्गृहीतमत इत्यपि न निषेध्यम् । यत आहुः— 'सुनिश्चितं नः परतन्त्रयुक्तिषु, स्फुरन्ति याः काश्चन सूक्तसम्पदः । तवैव ताः पूर्वमहार्णवोत्थिताः, जगत्प्रमाणं जिनवाक्यविप्रुषः ॥१॥ तथा ॥ जयइ सुयाणं पभवो' अन्यदपि 'सव्वप्पवायमूलं बारसंगं जिणेहिमक्खायं' इत्यादि । तस्यास्तिकस्य भावो जात्यर्थे ताप्रत्यये आस्तिकता- जीवास्तित्वाद्यङ्गीकारिका मतिः । यदाऽऽह॥ अत्थि अविणासधम्मा करेइ वेएइ अत्थि निव्वाणं । मोक्खोवाओ अत्थि उ छ सम्मत्तस्स ठाणाइं'॥१॥ति । तयाऽऽस्तिकतया । अत्रापि 'नियमादि'ति पदयोजना पूर्ववत्कार्या । तदभावे हि देशोनदशपूर्वधारकाणामभव्यानां न किञ्चित्सुबुद्धियोगेऽपि भव्यभावप्राप्तिरवलोक्यते । न च वाच्यं तेषां तत्त्वज्ञानमभूदेवेति, तादृशपरोपदेशमात्रकुशलज्ञानेन नास्त्यधिकारः, अनन्तशोऽवाप्तपूर्वत्वात् । न चैतदसिद्धम् । ॥'सव्वजिवाणंपि य णं अणंतसो गेविज्जगेसु उववाओ'त्ति वचनात् । न च तद् यतिलिङ्गग्रहणमन्तरा, न च तत्र न द्रव्यतः श्रुतावगमः । अत एव च देशोनदशपूर्वी यावद् भजनोक्ता सम्यक्श्रुतस्य

॥ चउदस दस य अभिन्ने नियमा सम्मं च सेसए भयणे'त्यादिना । तस्य तावत् श्रुतस्यावगमे न तत्त्वतत्त्वश्रद्धानं तेषां, निर्वाणश्रद्धानाभावात् । आस्तां श्रद्धानं, शङ्कापि तेषां निर्वाणविषयिणी न स्यात्,

॥ नयति श्रुतानां प्रभवः । सर्वप्रवादमूलं द्वादशाङ्गं जिनैराख्यातम् ।
॥ अस्ति अविनाशधर्मा करोति वेदयति अस्ति निर्वाणम् ।
मोक्षोपाय अस्ति तु षट् सम्यक्त्वस्य स्थानानि ॥
॥ सर्वजीवानामपि च अनन्तशो ग्रैवेयकेषु उपपातः ।
॥ 'चतुर्दश दश च अभिन्ने नियमात् सम्यक् च शेषके भजना ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

स्यादन्यथा स्वविषयिणी भव्यत्वाविनाभाविनी भव्यत्वाऽभव्यत्वविषयिणी शङ्का। अतः सुष्ठु प्रोक्तम्-आस्तिक्येनैव तत्त्वावगमः। चकारस्त्रयाणां समुच्चयार्थः। नहि केवलेन भवति कार्यं किञ्चिदपि। उत्तरोत्तरप्राधान्याच्चैवं क्रमः। यद्वा-पूर्वः पूर्वो हेतुरुत्तरस्योत्तरस्य। यन्न मध्यस्थताविनिर्मुक्तस्य भवति सुबुद्धियोगः। न च सुबुद्धित्यक्तसंसर्गस्य चाऽऽस्तिक्यम्। न च नास्तिकस्य स्यात् तत्त्वज्ञानमिति। ननु कथं भवति प्राक्तत्त्वावगमादास्तिक्यं ? सति च प्रागास्तिक्ये किं तत्त्वज्ञानेनेति चेत्। नात्र तावत् सम्यग्दर्शनानन्तरभाविविशिष्टतत्त्वावगमाधिकारः। नह्यत्र सम्यग्दर्शनश्रद्धेयजीवादिपदार्थनिरूपणं विधीयते, येन स्यादेवमाशङ्का, स्याद्वा तत्त्वाधिगमात् प्रागपि आस्तिक्यमोधत[*]:"तमेव सच्चं निस्संकं जं जिणेहिं पवेइय'मित्यादिविचारेण। यद्वा-ज्ञातदेवादिस्वरूपस्यापि सतोऽज्ञातपदार्थविशेषस्य स्यादेव प्रागपि आस्तिक्यम्। अवाप्तनिसर्गसम्यक्त्वस्याधिगमसम्यक्त्वाऽऽप्त्यवसरे वा स्यादेव निर्विवादं तत्त्वाधिगमात् प्रागास्तिक्यम्। स्वयमूह्यं वा सुधिया एतद्यथासार्वज्ञम्। एतत्त्रयेण किमित्याह-'ज्ञायते तत्त्वविशेष' इति। ज्ञायते-अवबुध्यते प्रागबुद्धोऽपि गुर्वादेर्गीतार्थस्य पार्श्वे। यद्वा-कस्यापि सुबुद्धेः पार्श्वे। जितशत्रोर्हि सुबुद्धयमात्यादेव तत्त्वावगम इत्यस्य ज्ञातधर्मकथाप्रसिद्धत्वात्। पठ्यते च-[॥] 'जो जेण सुद्धधम्मंमि ठाविओ संजएण गिहिणा वा। सो चेव तस्स भण्णइ धम्मगुरू धम्मदाणाओ ॥ अत एव च प्राक् 'सुबुद्धियोगेने'ति संयतश्रावकसामान्यवाचकपदेन पठितवान् प्रकरणकारः। मध्यस्थता-गुरुयोगाऽऽस्तिक्यानां फलमाह- 'ज्ञायत'इत्यनेन। भणितं च

[*] तदेव सत्यं निःशङ्कं यद् जिनैः प्रवेदितम्।

[॥] यो येन शुद्धधर्मे स्थापितः संयतेन गृहिणा वा।
स एव तस्य भण्यते धर्मगुरुः धर्मदानात् ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भट्टारकैरपि-'विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञान'मित्यादि। व्याख्याप्रज्ञप्तावपि व्याचख्युर्व्याख्याव्याख्यातव्याख्येयव्याख्येया:- 'सुस्सूसा सवण नाणे' इत्यादिसङ्ग्रहगाथया। तत्त्वानि-जीवादीनि, तेषां विशेष:- यथावस्थितं जडादिव्यावृत्त्या स्वरूपम्। एकतत्त्वशब्द-लोपाद्वा तत्त्वानि-सारभूतानि, नत्वन्यैश्छलजातिनिग्रहस्थानानीव कल्पितसमवायादीव प्रामाण्यादिभेदवद् यथा स्वमतिकल्पितम्। अनन्तर्भावनीयान्येवैतानीति वा तत्त्वानि। नह्यन्ययूथिकप्रतिपादित-षट्-षोडश-चतुर्विंश तपदार्थवत् एतानि क्वचिदप्यन्तर्भावयित्वा न्यूनानि कर्त्तुं पार्यन्ते। न च वाच्यं आश्रव-संवर-निर्जरा-मोक्षाणा-मस्त्येवाऽन्तर्भावो जीवाजीवयोरिति। परमार्थेन तत्त्वद्वयस्यैव प्ररूपणात्, आश्रवादीनां भेदेनोपन्यासस्तु साध्यतापन्नपरमपदप्रति-बन्धक-हेतुतादर्शनार्थमिति न तत्त्वव्याघात:। यद्वा-नैष विशेषोऽत्र बालबोधनीये। अन्वयेन हेतुत्वेऽवधारितेपि पूर्वं 'नियमादि'ति पदाद् व्यतिरेकेण हेतुत्वावधारणायाऽऽह- 'न अन्नह'त्ति। अन्यथा पूर्वोक्तमाध्यस्थसुबुद्धियोगास्तिक्यानामभावे न तत्त्वविशेषावगमो भवतीति तु स्वधिया सुधियाऽध्याहार्यम्। सुविवृतश्चायमर्थ: पूर्वं माध्यस्थ्यादीनामन्वयतानिरूपणे इति न पुनश्चर्च्यते। इत्थं वस्तुस्वरूपोपदर्शनेन ज्ञायते एव बुधैरेषामुपादेयता, इष्टसाधनता-कृतिसाध्यता-ज्ञानाधीनत्वात्तद्बुद्धे:, परं प्रस्तुतप्रकरणस्य मन्दमति-विबोधनार्थकत्वादाऽऽह स्पष्टं विधेयोपदेशम्-'इत्थ जइयव्वं'ति। इह सप्तमीबहुवचनान्तात् त्रव्विधाने इहेति निपातनात्। प्राकृते च 'त्रपो हित्थे (८।२।१६१) ति सूत्रेण त्थाऽऽदेशे 'इत्थे'ति। एषु-प्रस्तुत-गाथावर्णितत्वात् प्रत्यक्षेषु माध्यस्थ्यादिषु यतितव्यं-प्रयत्न: कार्य:। यवक्रयणन्यायेन यत्नकर्त्तव्यतायामापन्नायामपि स्पष्टत्वार्थं स्पष्टो-च्चार:। एवं विधिनाऽवाप्तो भवेत् येन तत्त्वागमस्तस्य कर्त्तव्यतामाह-

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

गुणगुरुसेवा सम्मं विणओ तेसिं तदत्थकरणं च ।
साहूण अणाहाण य सत्तणुरूवं निओएण ॥१९॥

गुणाः- '[1] पडिरूवो तेयस्सी जुगप्पहाणागमो महुरवक्को । गंभीरो-धिइमंतो उवएसपरो य आयरिओ ॥१॥ अप्परिसावी सोमो संग्गह-सीलो अभिग्गहमई य । अविकत्थणो अचवलो पसन्नहियओ गुरु होइ ॥२॥ (उपदेश०) एते चतुर्दश अनित्यत्वाद्या द्वादशभावना दशविधयतिधर्मश्चेति षट्त्रिंशत् । अथवा [2] 'देस-कुल-जाइ-रूव-संघयण-धिइजुओ अणासंसी । अविकत्थणो अमाई थिरपरिवाडी गहियवक्को ॥१॥ जियपरिसो जियनिद्दो मज्झत्थो देसकालभा-वण्णू । आसन्नलद्धपइभो णाणाविहदेसभासण्णू ॥२॥ पंचविहे आयारे कुसलो (जुत्तो) सुत्तत्थतदुभयविहिन्नू । आहरण-हेउ-कारण-नयनिउणो-गाहणाकुसलो॥३॥ससमय-परसमयविऊ गंभीरो दित्तिमं सिवो सोमो । गुणसयकलिओ जुग्गो पवयणसारं परिकहेउ' ॥ मिति षट्त्रिंशत् । यद्वा-षट्त्रिंशतः षट्त्रिंशिकास्तैर्युतो गुरुर्गुणगुरुः । गुणयुतो गुरुर्गुणगुरुरितिमध्यमपदलोपात् गुणगुरुस्तस्य । अनेन

---

[1] प्रतिरूपः तेजस्वी युगप्रधानागमो मधुरवाक्यः ।
गम्भीरो धृतिमान् उपदेशपरश्चाचार्यः ॥१॥
अपरिश्रावी सौम्यः संग्रहशीलः अभिग्रहमतिश्च ।
अविकत्थनः अचपलः प्रसन्नहृदयो गुरुर्भवति ॥२॥

[2] देश-कुल-जाति-रूप-संहनन-धृतियुतः अनाशंसी ।
अविकत्थनः अमायी स्थिरपरिपाटिः गृहीतवाक्यः ॥१॥
जितपर्षद् जितनिद्रो मध्यस्थो देशकालभावज्ञः ।
आसन्नलब्धप्रतिभो नानाविधदेशभाषाज्ञः ॥२॥
पञ्चविधे आचारे कुशलः सूत्रार्थतदुभयविधिज्ञः ।
आहरण-हेतु-कारण-नयनिपुणो ग्राहणाकुशलः ॥३॥
स्वसमय-परसमयविद् गम्भीरो दीप्तिमान् शिवो सौम्यः ।
गुणशतकलितो योग्यः प्रवचनसारं परिकथयितुम् ॥४॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नाम-स्थापना-द्रव्यगुरोर्व्यवच्छेदमाह, शुद्धभावस्यैव नाम-स्थापनाद्रव्याणामुपयुक्तत्वात् क्रियायाम् । अशुद्धे तु भावे कथङ्कारं भविता तत्समारोपः । अत एव पठ्यते-भावनिक्षेपशुद्धस्यैव निक्षेपचतुष्कशुद्धिः । नोच्यतेऽत्र बहुवक्तव्यं यत्तत् गौरवादिना । सेवा-पर्युपासना-औपचारिकविनयरूपा । यदाह-[1]"अब्भुट्ठाणं अंजलि-आसणदाणं अभिग्गह किई अ । सुस्सूसणमणुगच्छण संसाहण काय-अट्ठविहो ॥१॥ (दशवै०) आह च अमारिपडहोद्घोषणावाप्ताऽमर-यशोवपुःश्रीहेमसूरिरपि-'अभ्युत्थानं तदालोकेऽभियानं च तदागमे । शिरस्यञ्जलिसंश्लेषः, स्वयमासनढौकनम् ॥१॥ आसनाऽभिग्रहो भक्त्या, वन्दना पर्युपासनम् । अनुयानेऽनुगमश्चेति, प्रतिपत्तिरियं गुरोः' ॥२॥ (योग०) पठ्यते चागमेऽपि-'तं महाफलं खलु तहारूवस्स समणस्स वा माहणस्स वा नामगोयस्स वि सवणयाए किमंग पुण अभिगमण-वंदण-नमंसण-पज्जुवासणए ।' पूज्या एव व्याचक्रुर्ग्रंथान्तरे साधुसेवाया धर्माऽसाधारणकारणतां तत्फलं च । तदुक्तम् सकलदर्शनततिविततकुविकल्पनिरासपूर्वकयथार्थव्याख्या-विख्यातयशसि शास्त्रवार्त्तासमुच्चये प्रथमस्तबके-'साधुसेवा सदा भक्त्या, मैत्री सत्त्वेषु भावतः । आत्मीयग्रहमोक्षश्च धर्महेतुप्रसा-धनम् ॥६॥ उपदेशः शुभो नित्यं, दर्शनं धर्मचारिणाम् । स्थाने विनय इत्येतत्, साधुसेवाफलं महत् ॥७॥ न केवला भक्तिरूपा सेवा, किन्तु विनयोऽपीत्याह-'विनयस्तेषाम्' विनयश्च मोक्षप्राप्ति-मूलमेव । यत आह- [2] मूलाउ खंधप्पभवो दुमस्स खंधाउ पच्छा-

---

[1] अभ्युत्थानमञ्जलिः आसनदानमभिग्रहः कृतिश्च ।
सुश्रूषणमनुगमनं संसाधनं काय अष्टविधः ॥

[2] मूलात् स्कन्धप्रभवो द्रुमस्य स्कन्धात् पश्चात् समुपयान्ति शाखाः ।
शाखाभ्यः प्रशाखाः विरोहन्ति पत्राणि ततस्तस्य पुष्पं च फलं रसश्च ॥१॥
एवं धर्मस्य विनयो मूलं परमश्च तस्य मोक्षः ।
येन कीर्तिं श्रुतं श्लाघ्यं निःशेषं चाभिगच्छति ॥२॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

समुविंति साहा । साहप्पसाहा विरुहंति पत्ता तओसि पुप्फं च फलं रसो अ ॥१॥ एवं धम्मस्स विणओ मूलं परमो अ से मोक्खो । जेण किंत्ति सुअं सिग्घं, नीसेसं चाभिगच्छइ ॥२॥ (दशवै०) वाचकावतंसोऽप्युवाच'-न तथा सुमहार्घ्यैरपि वस्त्राभरणैरलङ्कृतो भाति । श्रुतशीलमूलनिकषो विनीतविनयो यथा भाति ॥ धन्यस्योपरि निपतत्यहितसमाचरणघर्मनिर्वापी । गुरुवदनमलयनिसृतो वचनरसश्चन्दनस्पर्शः ॥२॥ (प्रशम०) किं बहुनोक्तेन, सर्वेषामेव कल्याणानामेष एव भाजनम् । यदाह- 'विनयफलं शुश्रूषा गुरुशुश्रूषाफलं श्रुतज्ञानम् । ज्ञानस्य फलं विरतिर्विरतिफलं चाश्रवनिरोधः ॥१॥ संवरफलं तपोबलमथ तपसो निर्जराफलं दृष्टम् । तस्मात् क्रियानिवृत्तिःक्रियानिवृत्तेरयोगित्वम्॥२॥योगनिरोधाद्भवसन्ततिक्षयः सन्ततिक्षयान्मोक्षः । तस्मात्कल्याणानां सर्वेषां भाजनं विनयः ॥ (प्रशम०) विनयश्चात्र बहुमानादिरूपः, भक्तिरूपस्य गृहीतत्वात्, इति सुष्ठूक्तमादिविधेयं-'गुणगुरुसेवा सम्यक् तेषां विनयश्चे'ति । सा च न यथा कथञ्चित् किन्तु सम्यक् । असम्यग्विधाने हि न तत्फलभाग्भवति । नहि विषवेगयुक्तममृतमपि स्याज्जीवितवृद्धये भवति । 'सम्यगि'त्यस्योभयत्रापि कार्या योजना डमरूकमणिन्यायेन । यद्वा-पूर्वं सेवाशब्देन वैयावृत्त्यं भक्तदानादिरूपं विश्रामणादिरूपं वा, तस्य ह्यप्रतिपातित्वात् । पठ्यते च-

☆ 'सव्वं किर पडिवाई वेयावच्चं अपडिवाई । अथवा सेवाशब्देन पूर्वं भक्तिर्ग्राह्याऽत्र विनयशब्देन च बहुमानः । न केवलं सेवाविनयावेव किन्तु परमपीत्याह- 'तदत्थकरणं चे'ति । तेषां-पूर्वनिर्दिष्टानां गुणगुरूणां गुरूणां, पुनःपुनस्तच्छब्देन व्यपदेशः सन्ततं गुणगुरुगुरुगुणस्मरणस्य तद्वैयावृत्त्यादेश्चाऽवश्यकरणीयताज्ञापनाय गु-

☆ सर्वं किल प्रातपाति वैयावृत्त्यमप्रतिपाति ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

णरागित्तादर्शनाय वा । अर्थः-प्रयोजनमौषधादि, तस्य करणं-विधानं, स्वयमिति ज्ञेयमध्याहार्यम् । तथैव विनयशुद्धेः । नह्यन्यपार्श्वे तदर्थविधानं विधेयतयोदितं विधिविद्भिः । न चैवं विधाने भवति स्वात्मशुद्धिः । चकारः, पूर्वोक्तयोः समुच्चयार्थः । न केवला सेवा विनयो वा केवलः, किन्तु त्रयमप्येतदितिज्ञापनायेत्यर्थः । न केवलं सूरिप्रभृतीनां सेवादिकरणं किन्तु साधूनामपि, तदेतदाह-'साहूण' ति । साधयन्त्यपवर्गं पौरुषेयीभिः क्रियाभिरिति साधवः । ॥ निव्वाणसाहए जोए जम्हा साहंति साहुणो' इतिवचनात् । तेषामपि 'सेवा विनयस्तदर्थकरणं चे'त्यत्रापि योज्यम्, तेषामपि पञ्चपरमेष्ठ्यन्तर्गतत्वेनाऽऽराध्यतमत्वात् । केन गुणेनाऽऽराधनेति चेत्? आहुः श्रीश्रुतकेवलिपादाः—॥ 'विसयसुहनियत्ताणं विसुद्धचारित्तनियमजुत्ताणं । तच्चगुणसाहयाणं सहायकिच्चुज्जयाण नमो ॥१॥ असहाए सहायत्तं करंति मे संजमं करंतस्स । एएण कारणेणं नमामहं सव्वसाहूणं ॥२॥ (आव० नि०) ति । अन्यच्च-पूर्वं गुरुसेवायां यदुपदेशादि महत्फलमुक्तं, तदत्रापि समानमिति न संशयस्तत्सेवादौ योग्यतामञ्चति । भवति च तददर्शने तदुपदेशाश्रवणे च नन्दमणिकारवत् सुदृढस्यापि मिथ्यात्वप्राप्तिरिति करणीयैवैषामपि सेवा । ॥ 'जावज्जीवं सुसाहुणो गुरुणो' इति वाक्येन यावन्महाव्रतवतामाराध्यत्वात् । गुणगुरुगुरूणाम् पृथगुपन्यासश्च तेषामतिशयेनाऽऽरा-

---

॥ निर्वाणसाधकान् योगान् यस्मात् साधयन्ति साधवः ।

॥ विषयसुखनिवृत्तेभ्यः विशुद्धचारित्रनियमयुक्तेभ्यः ।
तथ्यगुणसाधकेभ्यः सहायकृत्योद्यतेभ्यो नमः ॥
असहायान् सहायत्वं कुर्वन्ति मम संयमं कुर्वतः ।
एतेन कारणेन नमाम्यहं सर्वसाधुभ्यः ॥

॥ यावज्जीवं सुसाधवः गुरवः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

ध्यताज्ञापनार्थम् । सा च तत्पूज्यत्वात्तेषां, पूज्यपूज्यस्य वाऽतिशयेन पूज्यत्वानपायादिति । साधवश्च गुणिन एव ग्राह्याः, न नामधारिणः,तेषां मोक्षप्रतिबन्धकत्वात् । आह च- ॥ 'ते पुण समिया गुत्ता पियदृढधम्मा जिइंदियकसाया । गंभीरा धितिमंता पण्णवणिज्जा महासत्ता ॥१॥ उस्सग्गववायाणं वियाणगा सेवगा जहासत्ति । भावविसुद्धिसमेया आणारुइणो य सम्मंति ॥२॥ सव्वत्थ अपडिबद्धा मेत्तादिगुणण्णिया य णियमेण । सत्ताइसु होंति दृढं इय आययमग्गतल्लिच्छा ।३। एवंविहा उ णेया सव्वणयमएण समयणीतिए । भावेणभाविएहि सइ चरणगुणट्ठिया साहू ॥४॥ (पञ्चाशक०) पार्श्वस्थादीनां चाऽवन्द्यत्वं स्पष्टमेव । ॥ पासत्थो ओसन्नो होइ कुसीलो तहेव संसत्तो । अहछंदो विय एए अवंदणिज्जा जिणमयंमि ॥१॥ हठाद्वन्दने तु-॥ पासत्थाइ वंदमाणस्स नेव कित्ती न निज्जरा होइ । जायइ कायकिलेसो बंधो कम्मस्स आणाई ॥१॥ पठितश्च तेषामप्यात्मनाशनं वन्दापने । ॥ 'सुट्ठुअरं नासंति अप्पाणं जे चरित्तपब्भट्ठा

॥ ते पुनः समिता गुप्ताः प्रियदृढधर्माणः जितेन्द्रियकषायाः ।
गम्भीरा धृतिमन्तः प्रज्ञापनीया महासत्त्वाः ।१।
उत्सर्गापवादयोर्विज्ञायकाः सेवका यथाशक्ति ।
भावविशुद्धिसमेताः आज्ञारुचयश्च सम्यगिति ॥२॥ सर्वत्राप्रतिबद्धा मैत्र्यादिगुणान्विताश्च नियमेन । सत्त्वादिषु भवन्ति दृढं इति आयतमार्गतल्लिप्सा ॥
एवंविधास्तु ज्ञेयाः सर्वनयमतेन समयनीत्या ।
भावेन भावितैः सदा चरणगुणस्थिताः साधवः ॥३॥
॥ पार्श्वस्थ अवसन्नो भवति कुशीलः तथैव संसक्तः ।
यथाच्छन्दोपि च एते अवन्दनीया जिनमते ॥१॥
॥ पार्श्वस्थादि वन्दमानस्य नैव कीर्तिर्न निर्जरा भवति ।
जायते कायक्लेशो बन्धः कर्मणः आज्ञादि ॥२॥
॥ सुष्ठुतरं नाशयन्ति आत्मानं ये चारित्रप्रभ्रष्टाः ।
गुरुजनं वन्दापयन्ति सुश्रमणं यथोक्तकारिणं च ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

गुरुजण वंदावेंति सुस्समणं जहुत्तकारिं च ॥१॥ (आव०) न केवलमेत एव न वन्द्याः, तत्संसर्गिणः सुसाधवोऽप्यवन्द्या एव। यदुक्तम्– ◈ असुइट्ठाणे पडिया चंपगमाला न कीरइ सीसे। पासत्थाईठाणेसु वट्टमाणा तह अपुज्जा ॥१॥ (आव०) न च वाच्यं ◈ 'नाणाहिओ वरतरं हीणो विहु पवयणं पभावंतो'। इतिवाक्यात् चरणरहितस्यापि श्रेष्ठतोक्तेर्ज्ञानादिगुणयुक्तानां कार्यैव सपर्येति। तदभिप्रायानवगमात्। तथाविधविशिष्टचारित्रविकलतैवाभिप्रेताऽत्र सूरिमुख्यैः 'हीण' इत्यनेन, न तु चारित्रशून्यता। व्यक्तश्चैष तत्रोत्तरगाथाकदम्बके[ॐ] 'नाणाहियस्स नाणं पुज्जइ नाणा पवत्तए चरणं। जहा खरो चंदणभारवाही भारस्स भागी न हु चंदणस्स। एवं खु नाणी चरणेण हीणो नाणस्स भागी न हु सोग्गइए ॥१॥ (उप०) अनेनैव ज्ञापयति-यत्पूर्वं पूज्यतोक्ता वरतरशब्देन, सोत्तरगुणाशुद्धिमतो, न तु प्रकटसेवादिना काकनाशं नष्टचारित्ररत्नस्य, तस्य तु सम्यक्त्वस्यापि विनाशोन्मुखत्वात्। तदाह- ◈ 'संपागडपडिसेवी काएसु वएसु जो न उज्जमइ। पवयणपाडणपरमो सम्मत्तं कोमलं तस्स। (उप०) यावद्भणितं पूज्यपादैः– ◈ 'छजीवनिकायदया-

◈ अशुचिस्थाने पतिता चंपकमाला न क्रियते शीर्षे।
पार्श्वस्थादिस्थानेषु वर्तमाना तथाऽपूज्याः ॥१॥
◈ ज्ञानाधिको वरतरं हीनोऽपि खु प्रवचनं प्रभावयन्।
◈ ज्ञानाधिकस्य ज्ञानं पूज्यते ज्ञानात् प्रवर्तते चरणम्।
यथा खरः चन्दनभारवाही भारस्य भागी नैव चन्दनस्य।
एवं खु ज्ञानी चरणेन हीनो ज्ञानस्य भागी नैव सुगतेः ॥
◈ संप्रकटप्रतिसेवी कायेषु व्रतेषु यो न उद्यच्छति।
प्रवचनपाटनपरमः सम्यक्त्वं कोमलं तस्य ॥
◈ षड्जीवनिकायदयावर्जितो नैव दीक्षितो न गृही।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

वज्जिओ नेव दिक्खिओ न गिही'तिवाक्येन तस्य कुमार्गता । प्रवचन-प्रभावनापि तस्यैव योग्या,यो गुणसुस्थितः तस्य । न तु गुणहीनस्य । यदाह- ॥ 'गुणसुट्ठियस्स वयणं घयमहुसित्तुव्व पावओ भाइ । गुण-हीणस्स न सोहइ णेहविहूणो जहा पईवो' ॥१॥ न च वाक्यमपि ग्राह्यतामेति चारित्रहीनस्य चारित्रवेषविडम्बकस्य । यदाह- क्षीरं भाजनसंस्थं न तथा वत्सस्य पुष्टिमावहति । आवल्गमानशिरसो यथा हि मातुः स्तनात्पिवतः ॥१॥ तद्वत् सुभाषितमयं क्षीरं दुःशील-भाजनगतं तु । न तथा पुष्टिं जनयति यथा हि गुणवन्मुखात्पति-तम् ॥२॥ शीतेऽपि यत्नलब्धो न सेव्यतेऽग्निर्यथा श्मशानस्थः । शीलविपन्नस्य वचः पथ्यमपि न सेव्यते तद्वत् ॥३॥ (न) वाक्यं ग्राह्यतामेत्येतावन्मात्रमेव न, किन्तु संसर्गोऽपि परिहार्य इत्यपि । यदुक्तम्- 'चारित्रेण विहीनः श्रुतवानपि नोपजीव्यते सद्भिः । शीतलजलपरिपूर्णः कुलजैश्चाण्डालकूप इव' ॥१॥ इति स्पष्टा चात्र श्रुतवतोऽपि चारित्ररहितस्य हेयता । न च ज्ञानमात्रस्य मुक्ति-विधायिता किन्तु निष्फलतैव । तदुक्तं दिवाकरपादैरपि 'यथाऽग-दपरिज्ञानं नाऽलमामयशान्तये । अचारित्रं तथा ज्ञानं, तथा बुद्ध्य-वसायतः' ॥१॥ क्रियाविहीनां च विबोधसम्पदम् । 'नाणं किरिया-रहियं' इत्यादि । एवमात्मश्रेयोनिःश्रेयसार्थकं गुणगुरुसाधुसेवादि प्रोच्याऽन्यदपि कर्त्तव्यमाह- 'अणाहाण य'त्ति । तत्र योगक्षेमङ्करो नाथः । अप्राप्तस्य प्राप्तिर्हि योगः, प्राप्तरक्षणं च क्षेमं, तयोः कारकः, स नाथो न विद्यते येषां तेऽनाथास्तेषां निराधाराणाम् । दृष्ट्वा हि तान् अवश्यं भवति करुणा सर्वज्ञवचनाऽऽस्पदीभूतहृदयाणां सहृदयाणाम् । तदुक्तम्—'दीनं हीनं जनं दृष्ट्वा, कृपा यस्य न

॥ गुणसुस्थितस्य वचनं घृतमधुसिक्त इव पावको भाति ।
गुणहीनस्य न शोभते स्नेहविहीनो यथा प्रदीपः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

जायते । सर्वज्ञभाषितो धर्मस्तस्य चित्ते न विद्यते ॥१॥ न चासंयताविरतेभ्यो यत्किञ्चित्प्रासुकमप्रासुकं वा,एषणीयमनेषणीयं वा दीयते तत्रैकान्तेन पापकर्मबन्ध एव भगवता प्रतिपादितः, न च तत्राल्पापि सम्भवति निर्जरा, ≒ 'एगंते से पावे कम्मे किज्जइ नत्थि से अप्पावि णिज्जरे'ति (भग०) वचनादिति वाच्यम् । तत्र पात्रबुद्धयैव दानविचारस्योपक्रमात् । पात्रबुद्धया चापात्रेभ्यो यत्किञ्चिद्दानेऽपि सर्वथा पापबन्धे को वा किमाह- तस्य मिथ्यास्वरूपत्वात् तत्सम्भवस्याऽनिवार्यत्वात् । न च गम्यते कथमेतत् । प्रकरणं हि तत्र पात्रदानस्य । प्रकरणेनैव च स्यादर्थपरिच्छित्तिः । द्रष्टव्यश्चात्रापि यथाश्रुतव्याख्याने स्याद्वादः, स चापेक्षयैव निर्धारणे भविष्यति, । निर्णीतश्चैषोऽर्थो निर्णयकरणपटुभिः । यतो यदि सर्वथाऽसंयतादिदानं प्रतिषिषित्सितं स्यान्नार्थोऽप्रासुकप्रासुकाऽनेषणीयैषणीयविचारेण, स हि संयतानामेव, कल्पाकल्पविभागभावात्तेषां कृतश्चायं तत्रेति निर्णीयते-नैष सामान्यदानविधिविषय उपन्यासः, किन्तु पात्रबुद्धिविषयः । न च वाच्यं प्रासुकैषणीयं दीयते चेन्न तदा स्यात्पापबन्धः, सूत्रे तस्यापि निषेधात् । अन्यच्च-एकान्तपापबन्धकथनेन हि निषेद्धा स्यादेव वृत्तिच्छेदकारित्वेन दुरन्तपापभाग् । तदुक्तं- ‖ जे यणं पडिसेहंति वित्तिच्छेयं करंति ते (सूत्रकृत०) इतिवचनात् । एतेन ये आहुः-एषणीयमपि दीयतेऽसंयताय पापमेव का वार्त्ताऽनेषणीयदाने ? इति ज्ञापनायेतरोपन्यास इति । ते निरस्ताः । एषणीयशब्देनैव तदभिप्रायस्य गतार्थत्वात् । न च निवारितमनुकम्पादानं जिनवरेन्द्रैः, स्वयमपि तु तदाऽऽचीर्णमेव सांवत्सरिकदान-देवदूष्यदानादिना । पठ्यते च-

‖ एकान्तः तस्य पापकर्म क्रियते नास्ति तस्य अल्पापि निर्जरा ।
‖ ये च प्रतिषेधयन्ति वृत्तिच्छेदं कुर्वन्ति ते ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

[1] 'अणुकंपादाणं पुण न कयावि जिणेहि पडिसिद्धं' । ति । न च नैष साध्वाचारः, [2] 'जे उ दाणं पसंसंति वहमिच्छंति पाणिणो' । त्ति (सूत्र०) वचनात् इति वाच्यम् । अवस्थाभेदविषयत्वादेतस्य । अन्यथा युगादिजिनवरेण यदुपदिष्टं शिल्पादि,दत्तं च सूनुभ्यो राज्यादि तत्तेषां दुर्गतय एव स्यात् । उपदिष्टं चानुकम्पादानं प्रदेशिने राज्ञे केशिकुमारश्रमणेन चतुर्ज्ञानवता,आर्यसुहस्तिपाद-पद्मकरन्दमधुकरेण सम्प्रतिराजेनाऽऽचीर्णमपि चेति सुस्थितं विधेयमेवाऽनुकम्पादानमिति । चकारो दीनादिसमुच्चयाय । यत्तैषामप्यर्थकरणं योग्यमेव । आसन्नीभावादर्थकरणमेवाऽत्र सम्बन्ध्यम् । न चानुकम्पालक्षण-सम्यक्त्वलक्षणवान् दीनं दृष्ट्वा कदाचिदपि तदुद्वारमकृत्वा सुखमाप्नोति । कारुण्यभावनाऽप्येवमेव निर्वहति 'परदुःखविनाशिनी तथा करुणे'तिवचनात् । पठ्यते च— 'औदार्यं कार्पण्यत्यागाद्विज्ञेयमाशयमहत्त्वम् । गुरुदीनादिष्वौचित्यवृत्तिकार्येतदत्यन्तम्' ॥१॥ गुर्वाज्ञया महादानताऽप्यस्याऽभिमतैव । 'न्यायात्तं स्वल्पमपि भृत्यानुपरोधतो महादानम् । दीनतपस्व्यादौ गुर्वनुज्ञया दानमन्यत्तु' ॥१॥ (षोडश०) अत एव पठ्यते- [3] 'नेव दारं पिहावेज्जा भुंजमाणो सुसावओ' । तथा 'अवंगुयदुवारा' इत्यादिनेत्यलमभिनिवेशग्रहग्रहिलैः सहातिप्रसङ्गेन । तदपि गुरुसेवादि अनाथानां चार्थकरणादि कथं कार्यमित्याह- 'सत्तणुरूवं'ति । शक्तिः- सामर्थ्यं शारीरं वाचिकं मानसिकं वा,तस्या अनुरूपं यथास्यात्तथा । न चाऽत्रानुरूपमित्यव्ययीभावः, तथात्वे चैत्यस्योपकुम्भमित्यत्रेव 'तृप्तार्थपूरणाव्यये' (३-१-८५) तिनि-

---

[1] अनुकम्पादानं पुनः न कदापि जिनैः प्रतिषिद्धम् ।

[2] ये तु दानं प्रशंसन्ति वधमिच्छन्ति प्राणिनः ।

[3] नैव द्वारं पिधापयेद् भुञ्जानः सुश्रावकः । अप्रावृतद्वाराः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

षेधेन षष्ठीसमासाभवनाद् अव्ययीभावस्याऽप्यव्ययत्वात्, किन्तु तत्पुरुषोऽयं रूपमनुगतोऽनुरूपः, शक्तेरनुरूपः शक्त्यनुरूपः । क्रिया-विशेषणत्वे चास्य शक्त्यनुरूपमिति । सेवादि हि सेवापरैः स्वश-क्तित्मनतिवृत्त्यैव कार्यम् । अन्यथाऽऽर्त्तादियोगेन दुर्गदुर्गतिगर्त्तानुसर-णात् । अत एव च पूज्यतमपूजाया अवसरनिरूपणायामनियमोऽपि तथाविधानाश्रित्याऽऽख्यातः । यदाहुः श्रीपूज्याः-[1]'सो पुण इह विण्णेओ संज्झाओ तिण्णि ताव ओहेण । वित्तिकिरियाविरुद्धो अहवा जो ज-स्स जावइओ ॥१॥ यावत् [2] 'वित्तीवोच्छेयंमि य गिहिणो सीज्जंति सव्वकिरियाओ । णिरवेक्खस्स उ जुत्तो संपुण्णो संजमो चेव'त्ति । (पञ्चा०)आस्तां तावदन्यत्, कृतार्थत्वेऽपि परमपथप्रापणप्रवणो-पदेशप्रवर्त्तनस्वभावत्वादुत्तमोत्तमश्रीमदर्हत्पूजायामप्याह- [3] वत्थे-ण बंधिऊणं णासं अहवा जहासमाहीए' इति । भवति च बोटिकवत्-स्वशक्त्यतिक्रमेणोद्यच्छन्नवाप्तमिथ्यात्वाद्यनर्थः । अत एव च तीर्थकरनिदानवर्णनेऽपि 'शक्तितस्त्यागतपसी (तत्त्वा०)'इत्याहुः । न चैवमवधार्यं निगूहनीया स्वशक्तिः सद्धर्माराधनासावधानैः, त-थात्वे वीर्याचारविराधनावधारणात् । तल्लक्षणं तु [4] 'अणिगूहिय-बलवीरिओ परक्कमइ जो जहुत्तमाउत्तो । जुंजइ य जहाथामं णायव्वो वीरियायारो'॥ (दशवै०)त्ति । न चेदं सेवादिकाम्यानुष्ठा-

---

[1] स पुन इह विज्ञेयः सन्ध्याः तिस्रस्तावदोघेन ।
वृत्तिक्रियाऽविरुद्धः अथवा यो यस्य यावत्कः ॥

[2] वृत्तिव्युच्छेदे च गृहिणः सीदन्ति सर्वक्रियाः ।
निरपेक्षस्य तु युक्तः सम्पूर्णः संयमश्चैव ॥

[3] वस्त्रेण बद्ध्वा नासामथवा यथासमाधि ।

[4] अनिगूहितबलवीर्यः पराक्रमते यो यथोक्तमायुक्तः ।
युनक्ति च यथास्थामं ज्ञातव्यो वीर्याचारः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

नान्तःपाति-विंशतिस्थानकादितपोवत् किन्तु जिनपूजादिवत् नैतिकमित्याह-'नियोगेने'ति। अवश्यंतया विधेयमेतत् गुणगुरुगुरुपर्युपासनालभ्यत्वाद् गुरुगुणानाम्। पठ्यते च साधुदानमाहात्म्ये अन्तराऽन्यानुषङ्गिकफललाभेऽपि पर्यवसाने परमपदश्रेष्ठतमसाधनभूतचरणाऽवाप्तिः।अवश्यकर्त्तव्यता चाऽस्याऽन्यत्रापि श्राद्धाऽहोरात्रचर्याव्याख्यानप्रस्तावे व्याख्यानाल्लभ्यते एव। ऊचुश्च— ≐ पच्चक्खाणं सवणं जइपुच्छाउचियकरणिज्जं'ति। अत एव च पठ्यते— ≐ 'तत्थ निवसेज्ज सड्ढो जत्थ साहूण हुज्ज उववाओ।' तथा ⋒ न य वसइ साहूजणविरहियंमि देसंमि बहुगुणे वि' इत्यादि। श्रमणानाश्रित्य तु स्पष्टं वेविद्यते एव सेवादेः करणीयता। यतो ⋒ विणओ सासणे मूलं, विणीओ संजओ भवे। विणयाओ विप्पमुक्कस्स, कओ धम्मो कओ तवो (आव०)॥१॥ विणओ आवहइ सिरिं लहइ विणीओ जसं च कित्तिं च। न कयाइ दुव्विणीओ सकज्जसिद्धिं समाणेइ (उप०)॥२॥ अणुवत्तगा विणीया बहुक्खमा निच्चभत्तिमंता य। गुरुकुलवासी अमुई धन्ना सीसा इह सुसीला॥३॥ (पञ्चवस्तु०) इत्याद्यनेकत्राऽनेकशः सविस्तारं व्याख्यातत्वात्।

कीदृशस्यैतदेकोनविंशतितमगाथोक्तं सम्पद्यते, तेन च स किं प्राप्नोत्यपूर्वमर्थमिति निदर्शयन्नाह—

≐ प्रत्याख्यानं श्रवणं यतिपृच्छा उचितकरणीयमिति।

⋒ तत्र निवसेत् श्राद्धः यत्र साधूनां भवेद् उपपातः।

≐ न च वसति साधुजनविरहिते देशे बहुगुणेऽपि।

⋒ विनयः शासने मूलं विनीतः संयतो भवेत्। विनयाद् विप्रमुक्तस्य कुतो धर्मः कुतस्तपः॥१॥ विनयः आवहति श्रियं लभते विनीतः यशश्च कीर्तिं च। न कदाचिद् दुर्विनीतः स्वकार्यसिद्धिं समानयति॥

⋒ अनुवर्तका विनीता बहुक्षमा नित्यभक्तिमन्तश्च।
गुरुकुलवासिन अमोचिनः धन्याः शिष्या इह सुशीलाः॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भव्वस्स चरमपुग्गलवत्तिणो पाय णं परं एयं।
एसो वि य लक्खिज्जइ भवविरहफलो इमेणं तु ॥२०॥

भविष्यति मुक्तिभागिति भव्यो–मुक्तेर्योग्यो 'भव्यगेयजन्यरम्यापात्याप्लाव्यं नवे'(५-१-७)ति कर्त्तरि यान्तनिपातः। भव्याभाविनी सिद्धिर्वाऽस्येति भव्यः, 'अभ्रादिभ्य'(७-२-४६)इत्यस्याऽऽकृतिगणत्वेनाप्रत्यये भव्योऽनादिभव्यत्वपारिणामिकभाववान्। आगमिको हि भावोऽयं, नहि हेतुगम्यः। यदाहुर्दिवाकरमिश्राः-[॥] दुविहो धम्मावाओ अहेउवाओ य हेउवाओ य। तत्थ उ अहेउवाओ भविआभविआदयो भाव'॥त्ति। न च भव्यत्वेऽभव्यत्वे वा भवति कश्चिद्धेतुतास्पदम्। ननु सम्यग्दर्शनादिसामग्री या परमसाधनी सा नाऽस्य भाविनीति व्यक्तोऽभव्यत्वे हेतुः। भाविनी चेद्भव्यत्वे,इतिचेत्। न, तस्य हेतुतायां भव्यतायामेव पर्यवसानात् चक्रदोषाऽऽपातात्। न च वाच्यं न भविष्यति शङ्कया प्रवृत्तिर्यतः स्यात् सम्यक् सम्यग्दर्शनादिसम्पत्तिरिति। शङ्काया एव प्रवृत्तिनियामकत्वात्। दृश्यते च कृषिकर्मणि फलसंशयस्यैव प्रवृतिजनकत्वम्। अत्र तु विशेषेण यतो भव्यत्वव्यापिनी भव्याभव्यत्वशङ्केति। तद्भावस्तु तथाभव्यत्वादेव, भव्यत्वपरिपाकश्चाऽकामनिर्जरा-स्वभाव-कालादिभ्यो भवत्येवेत्यलं प्रसङ्गेन। तस्यानादिभव्यत्वलक्षणपारिणामिकभावत एव। अत्र चैकवचनं जातौ, 'जात्याख्यायां न वैको०(२।२।१२१)'इतिवचनाद्। अनेनाऽभव्य-जातिभव्यव्यवच्छेदमाह। अन्त्यानां तावत्सम्यक्त्वादिप्राप्तियोग्यत्वे त्रसत्वाऽप्राप्तेर्न तत्प्राप्तिः, सरित्सहस्रश्रोतःस्रवाऽऽवर्त्तितयोजनसहस्रोद्वेधातिशयितोदकभरभ्राजिष्णुपयोधिपातालस्थपाषाणखनिस्थग्रावेव विशिष्टप्रतिमावस्थां

[॥] द्विविधो धर्मवाद अहेतुवादश्च हेतुवादश्च।
तत्र अहेतुवादो भव्याऽभव्यादयो भावाः॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

प्रति । न चैतावता नाऽसौ तदर्हः । एवमिमेपि न यत् त्रसादिभाव-मायान्ति वर्त्तमाने, नातीते चाऽऽगता, न चानागते आयास्यन्तीति । तेषां योग्यतासद्भावेऽपि न प्राप्तिः परमश्रेयःपथीभूतसम्यग्दर्श-नादीनाम् । पठ्यते च-॥ 'भव्वा वि ते अणंता जेहिं न पत्तो तसा-इपरिणामो' इति । आद्यास्तु प्राप्ता अपि त्रसादिभावमवाप्ता अपि मानुष्यकर्मभूम्याऽऽर्यदेशोत्तमजातिकुल-सर्वाक्षपाटवाऽऽयुःप्रभूतत्व-क-थकश्रवणानि न बोबुध्यन्ते, कर्मकुटिलताकल्मषात् । बुद्धा इव भास-न्तेऽपि देवलोकपूजर्द्धिख्यात्याद्यभिलाषेण प्रव्रजितवेषधरत्वमा-पन्नाः कदाचित्, परं तत्र न ते तात्पर्यत आगताः, किन्तु कर्मविवरेत-रद्वारपालप्रवेशितकृतपुण्यकद्रमकेतरद्रमकवत्तत्प्रवेशः सर्वज्ञशासन-पुरे । न आद्या अपि सर्वदैव योग्याः, किन्तु कदाचिदेव । तदाह– 'चरमपरावर्त्तवर्त्तिन' इति । चरम.-अपश्चिमो, नातः परः पुद्गल-परावर्त्तोऽन्योऽस्ति,तस्मिन्नेवान्त्यभागे सिद्धिगमात् । सति च सिद्धि-गमने पुनर्भवावतारामावेन पुद्गलस्यैव ग्रहणाभावः । तैजसकार्मण-योरप्यत्यन्तविरहात् का वार्त्ता पुद्गलपरावर्त्तस्य ?। 'सृपृपथि चरिकडिकर्देरम' (उणा० ३४७) इति मे चरमः, स चासौ परा-वर्त्तः, पदैकदेशे पदसमुदायोपचारात् भामाशब्देन सत्यभामा भीमशब्देन च भीमसेन इवाऽत्र परावर्त्तपदेन पुद्गलपरावर्त्तग्रहणम् । तत्रापि पुद्गलानां-पूरणगलनधर्म (र्मा) णामौदारिकादीनां परावर्त्तो-गृहीत्वा गृहीत्वा परिणमय्य परिणमय्याऽवलम्ब्याऽवलम्ब्य मोचनं यस्मिन् स पुद्गलपरावर्तः-अनन्तोत्सर्पिण्यवसर्पिणीकालमानः पारि-भाषिकः । यदाह– ॥ उस्सप्पिणी अणंता पुग्गलपरियट्टओ मुणे-यव्वो'। इति । तत्र वर्त्तिनो-वर्त्तनशीलो वर्त्ती तस्य । अत्र हि चरम-

॥ भव्या अपि ते अनन्ता यैर्न प्राप्तः त्रसादिपरिणामः ।

॥ उत्सर्पिण्यः अनन्ताः पुद्गलपरिवर्तको ज्ञातव्यः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

परावर्त्तवर्त्तित्वेनैव योग्यताभिधानम् । यदाह- 'स भवति कालादेव प्राधान्येन सुकृतादिभावेऽपि । ज्वरशमनौषधंसमयवदिति समयविदो विदुर्निपुण'।।मिति। तथात्वं चाऽवगाऽऽगमवचनापरिणतेः,सद्बोधाभावात् । यदाह- 'नाऽऽगमवचनं तदधः परिणमति सम्यग् नियम एषोऽत्रे'ति सुष्ठूक्तं-'चरमपरावर्त्तवर्त्तिन' इति । तत्रापि न समस्ते, किन्तु तत्प्रान्त्यभागे एव, यतो लब्धसम्यक्त्वस्याप्रतिपातिनो भवाष्टकेनैव सिद्धिगमनात् । प्रतिपातिनोऽपि अपार्धपुद्गलपरावर्तमात्रसंसारावस्थाननियमात् । तदुक्तं- ॥ 'अंतोमुहुत्तमित्तंपि फासियं जेहि हुज्ज सम्मत्तं । तेसिमवड्ढपोग्गलपरियट्टो चेव संसारो' ।।१।। इति प्रोचुः- 'प्राय एतत्' इति । न च वाच्यं तर्हि चरमान्त्यत्वेनैवाऽस्तु हेतुता, अन्त्यस्यापि चरमत्वानपायात् । तत्कारणसम्भवसूचनाय चैवं व्यपदेशः । यद्वा–अनन्त्यपुद्गलपरावर्त्तानां भव्यानां मोक्षानर्हाणामभव्यानामपि च द्रव्यतो भवत्येवैतल्लाभसम्भवः । यदाह– 'अभव्यस्यापि कस्यचिद्यथाप्रवृत्तिकरणतो ग्रन्थिमासाद्याऽर्हदादिविभूतिसन्दर्शनतः प्रयोजनान्तरतो वा प्रवर्त्तमानस्य श्रुतसामायिकलाभो भवति । न शेषलाभः- शेषाणां-सम्यक्त्वदेशसर्वविरतिसामायिकानां लाभो नेत्यर्थः । भव्यानप्याश्रित्यैवमेव । अनन्त्यावर्त्तेऽनन्तशः सर्वविरतिलाभस्य द्रव्यतोऽनेकशः पञ्चवस्त्वादौ प्रतिपादितत्वादिति प्रायः । न च द्रव्यभावभेदो लक्ष्यः परेषां । दुर्लक्ष्या हि पराशया इतिवचनात् । णकारश्चात्र वाक्यालङ्कारार्थः । प्रोचिरे च प्रवचनप्रणयनपटुभिर्गणभृद्भिः स्थानाङ्गदशमस्थाने अकारादय आलङ्कारिकाः । प्रोचे च तत्र णकारोपि 'तेणं काले ण'मित्यादिवत् । भवतीति क्रियाध्याहा-

॥ अन्तर्मुहूर्तमात्रमपि स्पर्शितं यैर्भवेत् सम्यक्त्वम् ।
तेषामपार्द्धपुद्गलपरिवर्त एव संसारः ।।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

र्या अत्र । किमिति चेदेतत्पूर्वगाथोपकल्पितं गुणगुरुसेवाविनयार्थ-करणसाध्वनाथकार्यविधानम् । परमिति अप्यर्थे सम्भावनायाम् । सम्भाव्यते एवंविधस्यैतत्प्राप्तिः । यद्वा-विशेषणार्थे परमिति । तथा च एतच्चरमपरावर्त्तवर्त्तिन एव, नान्यस्य । अत्र पक्षे प्रायःशब्दव्याख्यानं तु चरमान्त्यभागस्य हेतुत्वेऽपि चरममात्रस्य हेतुताकथनं चरमत्वानपायात्तस्येति ज्ञापनाय, तत्कारणानामवश्यंभावज्ञापनार्थं वेति द्योतनाय प्राय इति । यद्वा-परमित्युत्कृष्टं भावत इत्यर्थः । एवमधिकारिणमाख्याय फलमुपदर्शयन्नाह– 'एषोऽपि च लक्ष्यते भवविरहफलोऽनेनैवे'ति । तत्र एषः- माध्यस्थ्यसुबुद्धियोगाऽऽस्तिक्यज्ञाततत्त्वविशेषो गुणगुरुसेवादिविधानव्यापृतश्चरमपुद्गलपरावर्त्तवर्त्ती भव्यः । 'अपि चे'त्यभ्युच्चये । प्रथमं तावच्चरमपरावर्त्तेनैव भवविरहफललक्ष्यता सिद्धाऽस्ति, परमेतेनाधिकेति ज्ञापनाय । यद्वा-'अपि चे'त्यनेन धर्मोऽपि समुच्चीयते । अथवा-ये केचिन्मरुदेव्यादिवत् प्रान्तभाग एव निर्गन्तारो गन्तारश्च मोक्षं तेषां चरमावर्त्तत्वेन भवविरहफलता लक्ष्यते । परमयं तु अनेनैव तद्वानिति लक्ष्यते इति ज्ञापनाय'अपि चे'ति । यद्वाऽऽसतामन्ये, लब्धसम्यक्त्वदाढर्या देशविरति-सर्वविरतिमन्तः । ते हि लक्ष्यन्त एव तथाविधक्रियया भवविरहफलाः । परमयमतथाविधोऽप्यनेनैतावन्मात्रेण तत्त्वज्ञानगुरुसेवादिमात्रेणैव भवविरहफलो लक्ष्यते इतिज्ञापनाय । किमित्याह-लक्ष्यते-अनवाप्ततथाविधातीन्द्रियार्थवेदनवेदनैश्छद्मस्थैरपि ज्ञायते, अनुमानेन तैरपि ज्ञातुं शक्यत्वात् । अतीन्द्रिया नामार्थाः । कीदृश इत्याह– 'भवविरहफल'इति । भवन्ति कर्मवशवर्त्तिनः प्राणिनो जन्म-जरा-मरण-रोग-शोक-वियोग-संयोगादियुक्ता अस्मिन्निति भवः । 'पुंनाम्नी' (५।३।१३०) ति घः । तस्य विरहः- अत्यन्तवियोगो भवविरहः, स एव फलं-गुरुसेवादिजन्यः पर्यन्तः परिणामो यस्य स

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

भवविरहफलः । भवत्येव हि धर्माभ्यासातिशयाद् भवविरहो 'मुक्तिविशुद्धो मुक्तये' इति 'अभ्यासातिशयादुक्तं तद्विमुक्तेः प्रसाधकमि'ति च वचनात् । न च मुक्तेः परं फलमन्यदस्ति, शेषस्य सम्पदादेर्विपाकविरसत्वात्, 'सर्वमतोऽयद् दुःखकारण'मिति-वचनात् । देवत्वावाप्तिरपि न तत्त्वतः फलभूता, किन्तु स्वार्थासिद्धौ विश्रामरूपा । तदुक्तं- यस्तु यतिर्घटमानः सम्यक्त्वज्ञानशीलसम्पन्नः । वीर्यमनिगूहमानः शक्त्यनुरूपं प्रयत्नेन ॥१॥ संहननाऽऽयुर्बलकालवीर्यसम्पत्समाधिवैकल्यात् । कर्मातिगौरवाद्वा स्वार्थमकृत्वोपरममेति ॥२॥ सौधर्मादिष्वन्यतमकेषु सर्वार्थसिद्धिचरमेषु । स भवति देवो वैमानिको महर्द्धिद्युतिवपुष्कः ॥३॥ तत्र सुरलोकसौख्यं चिरमनुभूय स्थितिक्षयात्तस्मात् । पुनरपि मनुष्यलोके गुणवत्सु मनुष्यसङ्घेषु ॥४॥ जन्म समवाप्य कुलबन्धुविभवरूपबलबुद्धिसम्पन्नः । श्रद्धा-सम्यक्त्व-ज्ञान-संवर-तपोबलसमग्रः ॥५॥ पूर्वोक्तभावनाभावितान्तरात्मा विधूतसंसारः । सेत्स्यति ततः परं वा स्वर्गान्तरितस्त्रिभवभावात् ॥६॥ (प्रशम०) न च साधूनुद्दिश्यैवाऽयं फललाभः, श्रावकानाश्रित्यापि तथाभणनात् । 'यश्चेह जिनवरमते गृहाश्रमी निश्चितः सुविदितार्थः' इत्यादि यावत् 'शुद्धः स सिद्धिमेष्यति भवाष्टकाभ्यन्तरे नियमात्' । इति । विरहशब्देन चैतस्य श्रीहरिभद्रसूरिसूत्रितत्वं गम्यते । पूज्यैर्हि यावन्तो विहिताः ग्रन्थाः प्रवचनरत्नाकरावतारतीर्थकल्पाः तावत्सु विरहशब्दोन्यस्तो, येन ज्ञायेरन् प्रकरणबोद्धृभिः श्रीपूज्यकृतिरेषा इति । केनैवं लक्ष्यते ? इति चेदाह- 'अनेन तु' । तुरवधारणे । अनेनैव तत्त्वज्ञानगुणगुरुसेवादिनैव । नान्यन्निमित्तं । तस्य तथात्वलक्षणेन चेदं व्यभिचारि । भवति चाव्यभिचारिणा साधनेनाऽप्रत्यक्षोऽपि तदविनाभाव्यर्थो निश्चित इति सुष्ठूक्तमनेनैव भवविरहफलो लक्ष्यते

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

इति । समाप्तिद्योतनायाऽऽह-'इति प्रथमाधिकारविंशिका' । इतिः समाप्तौ । प्रथमा-आद्या, अधिकारप्रधाना विंशिका-विंशतिगाथाप्रमाणा ग्रन्थपद्धतिर्विंशिकाऽधिकारविंशिका । अस्यां हि केवलाधिकाराणां लोकानादित्वादिसिद्धपरमसुखाऽवसानानां सूचनैव प्रायेण कृतेति यथार्थाभिधानैवेयमधिकारविंशिकेति ।

भद्रमस्तु श्रमणसङ्घाय गुणरत्नरत्नाकराय ।

–: प्रशस्तिः :–

व्यापद् यदीया त्रिपदी जगत्यां, पदार्थसार्थानवलम्बमाना ।
न यत्र धत्तं त्रितयं पदानां, बुधास्तया तन्न वदन्ति वस्तु ॥१॥
चित्रातिचित्रं तु गणेशचित्ते, व्यधात् समस्तश्रुतभावशक्तिम् ।
प्रविष्टपूर्वा नतिरस्तु तस्मै, तादृग्गवी यस्य मुखात् प्रजाता ॥२॥
ज्ञानादिधर्मैकनिधेः सुधर्म-गणेशितुः शुद्धगणेऽन्ववाये ।
नभोङ्गणे सूर्यसमाः प्रभाऽऽढ्या, गणेशिनोऽनन्तगुणा बभूवुः ॥३॥
पारम्पर्येऽजनि समगुणोऽभिख्ययाऽन्वर्थया यो,
वित्तो विश्वे गुणजलनिधिः प्राप्तभूपप्रतिष्ठः ।
शास्त्राचारस्तप इति गणोऽनेकगीतार्थगीत–
स्तीर्थोद्योती त्रिदशनिलयैर्वन्दनीयस्स विज्ञैः ॥४॥
बभूव तत्रामितशक्तिरत्न-प्रभावसन्त्रासितलोकदोःस्थ्यः ।
सत्तर्कशास्त्रो मुनिसार्थसेव्यो, गच्छोऽतिवित्तः किल सागराऽऽख्यः ॥५॥
तत्राभवन् मुनिवरा[1] जयवीरसिन्धु-
सङ्ज्ञाः सुवादकुशलाः गणिनः प्रसिद्धाः
वादे महेन्द्रपुरि त्रिस्तुतिका दयान–
न्दाख्याश्च यैरुदयपूर्नगरे निरस्ताः ॥६॥
के तान् स्तुवन्ति जयवीरगणीन्न सन्तो,

[1] जद्वेरसागर नामानः ।

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

यैरुद्धृतं विगतवस्त्रगणात्सुतीर्थम् ।
(नग्नाटविघ्ननिचयादवितं सुतीर्थम्) वित्तं च कौङ्कुमिदं जगति प्रभावा-त्तीर्थप्रभावननभोङ्गणसूर्यकल्पान् ।.७।।
इतश्च कार्पटे द्रङ्गे मग्ना-भिख्या धनेश्वराः । न रमायां न रामायां, मग्नाः किन्त्वाऽऽर्हतोदितौ ।।१।। आबाल्याद्विषयोद्विग्ना आग्रहात्परिणिन्यिरे । पित्रुद्वेगनिरासाय, महत्सेवापदं हि तत् ।।२।। न च कस्तूरिकामोदः, प्रच्छन्नस्तिष्ठति क्वचित् । धर्मरङ्गोऽपि तत्तेषां, क्षेत्रं नासोढ नाशितुम् ।।३।। * जयवीरोदितिसुधा-मग्नैस्तैर्विषयाः समे । विषवज्जज्ञिरे नाक्ताः, भावै रामाकृतैस्तके ।।४।। उद्वेगपरिहारायाऽवात्सुस्ते तत्समीपगाः । रामासङ्गो महर्षीणा-मपि स्याद्भ्रुवकृन्न किम् ।।५।। ऊषुस्ते द्रव्यतो गेहे, परिव्रज्यामनोरथाः । यमुनां यमुनाकान्तां, पूर्णपुत्रमनोरथाम् ।।६।। अवेक्ष्य भवनिर्विण्णाश्चित्तं चक्रुर्व्रतादृतौ । नाऽभुक्तं क्षीयते कर्मेत्यस्थुर्गेहेषु दुःखिताः ।।७।। अन्तर्वत्नीं पुनः प्रेक्ष्य यमुनां प्रत्यवोधयन् । संसारविषपूर्णाब्धि-मग्नाः खिद्यन्ति हाऽङ्गिनः ।।८।। चित्रं नराः पशुक्रीडां, कृत्वा नन्दन्ति मानसे । आनन्दो दारुणो भावी, प्राणिव्रातप्रबाधनः ।।९।। बुबोध यमुना मौनं, धर्ममाचष्ट न क्षमा । विधातुं तत् समादास्ये शीलं व्रतपदं लघु ।।१०।। अग्रहीषुस्तया साकं, दधतो व्रतभावनाः । कुक्षिगोऽजनि धौरेय-स्वप्नसूचितसत्त्वभाक् ।।११।। नन्दनो नन्दनो लोक-लोचनस्येति नन्दितौ । चक्रतुर्हेमचन्द्राऽऽख्यां, पितरौ मोदगर्वितौ ।।१२।। आद्यस्य गुणरत्नाब्धेः, स्वप्नलाभानुसारतः । कृताख्या मणिवद्दीप्रगुणस्यास्ति मणिः पुनः ।।१३।। अधीतिनौ समे शास्त्रे, तर्कबुद्ध्या विदांवरौ । कन्यावुदूढौ योग्ये हि, योग्यं वयसि शोभते ।।१४।। तावीक्षयित्वा विष्णुर्हलिनाविव सङ्गतौ ।

* जह्वेरसागर इति

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

मुमुदे जनको दध्यौ सुन्दरामागमोदितिम् ॥१५॥ देवाय जगतीशाय, गुरवे ज्ञानभानवे । यदिष्टं दीयते तच्चेत् सपर्या सर्वभद्रिका ॥१६॥ अङ्गीक्रियेते गुरुणा, नेमौ नेमविगूहितौ । तदिमौ बोधयाम्याशु यथा स्यातां प्रभावकौ ॥१७॥ उभयत्र हितो वप्ता, बोधयँस्तौ यथागमम् । मन्ये वैराग्यभावोऽपि, तयोः स्वस्याऽहितःपुरा ॥१८॥ वंचसोद्बोधितस्तौ तद्वैराग्याढचौ बभूवतुः । आत्मा वै जायते पुत्रः, श्रुतिमेतां शिश्रियतुः ॥१९॥ प्राव्राजिष्टामुभौ तत्राऽव्रजल्लघोर्व-धूटिका । उपनृपसभं न्याये-नाऽऽत्तुं स्वेनं मदाविला ॥२०॥ कृपार्द्र-स्तं न्वदात्तस्यै, नासौ त्वस्थात्तया चिरम् । गर्भंगो निश्चयः केना-न्यथाकर्त्तुं हि पार्यते ॥२१॥ गत्वा ग्रामान्तरे पार्श्वे, सुगुरोर्व्रत-मादद्दे । जयवीरस्य तेनाऽप्यभ्यधाय्यानन्द इत्यसौ ॥२२॥

ज्ञात्वाऽलं स्वस्य पट्टाचलशिखरभुवे न्यस्य तं तत्र जग्मु-
र्भास्वन्तो भाभराढचा दिवि सुरनिचयं बोद्धुकामाः सुधर्मे ।
निम्बापुर्यां यमीशाऽऽवृतनिखिलदिशोऽ॰ष्टाब्धिमुन्यब्जवर्षे,
रक्तस्तत् सद्गुणानां सिततरमधुना तद्यशो गाति लोकः ॥२३॥

तेषां पट्टोदयाद्रौ खररुचिरिव यो भासयामास भावान्,
स्थित्वा तेनेयमाद्या भविक सुखकरी ख्यापिता विंशिकाऽऽढचा ।
नाऽभून्मे बुद्धिरिद्धा न च श्रुतसरणिर्वीक्ष्यतेऽत्रावचूर्णि-
रन्यान् ग्रन्थानवेक्ष्य प्रचुरमतिकृतान् शैशवाऽर्हा व्यधायि ॥२४॥

क्षुण्णं यदत्र शोध्यं तत्, सन्तो यद्गुणधारकाः ।
तेभ्योऽर्पयाम्यमुं येऽस्य, पठनश्रवणोद्यताः ॥२५॥

॰ १९४८

॥ समाप्तोऽयं ग्रन्थः ॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust

| मूर्त्तिस्थापनम् |

ज्ञानाऽऽवृतेः साधनमाह सार्वः, ज्ञानस्य तद्धारयतस्तथैव ।
तत्साधनानामपलापितादिना, सम्यग्दृशः सच्चरणेऽपि तद्वत् ॥१॥
अत्राऽबुधा वेषमृषेर्दधानाः, श्रद्धालुताभावविहीनधर्माः ।
भवानुरक्ताः जडताऽऽढ्यचित्ताः, स्वकीयपूजाप्रवरा विचख्युः ॥२॥
अस्माकमाशातनया हि भाव्यं, यदि स्पृशेदङ्घ्रिरिहासनादि ।
न पुस्तकादेर्न च सार्वमूर्त्तेः, पदप्रधट्टे किमपीह दूषणम् ॥३॥
श्रीपञ्चमाङ्गे गणधारिभिर्नता, श्रुतस्य साध्याङ्गतया लिपीयम् ।
तथापि मोहो बलवान् ह्यमीषां, तमो यथा कौशिकगोत्रजानाम् ॥४॥
दिवस्पतिः स्वस्य सभाप्रदेशे, न क्रीडते यत् स्वसुराङ्गनाभिः ।
तं पुण्यकर्मास्थ्यतुलप्रभावं, प्रेक्षेत मूढः कथमार्त्तभावः ॥५॥
अस्थ्नां करोत्यात्महिताय सेवां, शान्ताणवो यन्न परत्र लभ्याः ।
मूर्त्तित्रयं सर्वजनप्रणम्यं, चक्रुः सुरास्तीर्थकरस्वभावम् ॥६॥
प्रणम्य तं योगिमुखा निषेदुः, स्थाने स्वकीयेऽग्रत एव तासाम् ।
सद्दृष्टिराद्रो गणभृच्च तुर्यो, जातोऽत एवेति सदा प्रणम्या ॥७॥
आशातनां यस्त्यजति त्रयाणां, तत्साधनानां च तनोति भक्तिम् ।
भवेत् स ऐश्वर्यमवाप्य सिद्ध, आनन्दपाथोधिसमावतारः ॥८॥
कल्लोललोले नरजीविते पुमान्, लब्धे न रत्नत्रितयं क्षिनोति यः ।
समर्जितानेककठोरकर्मा, कथं पुनस्तस्य मुदब्धियोगः ? ॥९॥

P. P. Ac. Gunratansuriji M.S. Jin Gun Aaradhak Trust